
॥ श्रीहरिः ॥

17

श्रीमद्भगवद्गीता

पदच्छेद, अन्वय
साधारण भाषाटीकासहित



गीताप्रेस गोरखपुर
GITA PRESS, GORAKHPUR [SINCE 1923]

जयदयाल गोयन्दका

ॐ श्रीपरमात्मने नमः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥

अथ श्रीमद्भगवद्गीता

[तत्त्वविवेचनीके अनुसार]

भाषाटीकासहित

अथ प्रथमोऽध्यायः

प्रधान-विषय—१ से ११ तक दोनों सेनाओंके प्रधान-प्रधान शूर-वीरोंकी गणना और सामर्थ्यका कथन, (१२—१९) दोनों सेनाओंकी शंखध्वनिका कथन, (२०—२७) अर्जुनद्वारा सेनानिरीक्षणका प्रसंग, (२८—४७) मोहसे व्याप्त हुए अर्जुनके कायरता, स्नेह और शोकयुक्त वचन।

[धृतराष्ट्रका युद्ध-विवरण-विषयक प्रश्न।]

धृतराष्ट्र उवाच

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥ १॥

पदच्छेदः—

धर्मक्षेत्रे, कुरुक्षेत्रे, समवेताः, युयुत्सवः, मामकाः, पाण्डवाः, च, एव, किम्, अकुर्वत, सञ्जय॥ १॥

अन्वयः शब्दार्थः अन्वयः शब्दार्थः

धृतराष्ट्र बोले—

सञ्जय	= हे संजय!	**युयुत्सवः**	= युद्धकी इच्छावाले
धर्मक्षेत्रे	= धर्मभूमि	**मामकाः**	= मेरे
कुरुक्षेत्रे	= कुरुक्षेत्रमें	**च**	= और
समवेताः	= एकत्रित		

एव	= *	**किम्**	= क्या
पाण्डवाः	= पाण्डुके पुत्रोंने	**अकुर्वत**	= किया ?

[द्रोणाचार्यके पास जाकर दुर्योधनके बातचीत आरम्भ करनेका वर्णन।]

सञ्जय उवाच

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्॥ २॥

दृष्ट्वा, तु, पाण्डवानीकम्, व्यूढम्, दुर्योधनः, तदा, आचार्यम्, उपसङ्गम्य, राजा, वचनम्, अब्रवीत्॥ २॥

इसपर संजय बोले—

तदा	= उस समय	**दृष्ट्वा**	= देखकर
राजा	= राजा	**तु**	= और
दुर्योधनः	= दुर्योधनने	**आचार्यम्**	= द्रोणाचार्यके
व्यूढम्	= व्यूहरचनायुक्त	**उपसङ्गम्य**	= पास जाकर (यह)
पाण्डवानीकम्	= पाण्डवोंकी सेनाको	**वचनम्**	= वचन
		अब्रवीत्	= कहा।

[विशाल पाण्डवसेना देखनेके लिये द्रोणाचार्यसे दुर्योधनकी प्रार्थना।]

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता॥ ३॥

पश्य, एताम्, पाण्डुपुत्राणाम्, आचार्य, महतीम्, चमूम्, व्यूढाम्, द्रुपदपुत्रेण, तव, शिष्येण, धीमता॥ ३॥

आचार्य	= हे आचार्य!	**द्रुपदपुत्रेण**	= द्रुपदपुत्र धृष्टद्युम्नद्वारा
तव	= आपके	**व्यूढाम्**	= व्यूहाकार खड़ी की हुई
धीमता	= बुद्धिमान्		
शिष्येण	= शिष्य		

* यहाँ 'एव' शब्द समुच्चयार्थक ही है।

पाण्डुपुत्राणाम्	= पाण्डु-पुत्रोंकी	**चमूम्**	= सेनाको
एताम्	= इस		
महतीम्	= बड़ी भारी	**पश्य**	= देखिये।

[पाण्डवसेनाके प्रमुख योद्धाओंके नाम।]

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

अत्र, शूराः, महेष्वासाः, भीमार्जुनसमाः, युधि,
युयुधानः, विराटः, च, द्रुपदः, च, महारथः ॥ ४ ॥
धृष्टकेतुः, चेकितानः, काशिराजः, च, वीर्यवान्,
पुरुजित्, कुन्तिभोजः, च, शैब्यः, च, नरपुङ्गवः ॥ ५ ॥
युधामन्युः, च, विक्रान्तः, उत्तमौजाः, च, वीर्यवान्,
सौभद्रः, द्रौपदेयाः, च, सर्वे, एव, महारथाः ॥ ६ ॥

अत्र	= इस सेनामें	**च**	= और
महेष्वासाः	= बड़े-बड़े धनुषोंवाले	**विराटः**	= विराट
च	= तथा	**च**	= तथा
युधि	= युद्धमें	**महारथः**	= महारथी
भीमार्जुनसमाः	= भीम और अर्जुनके समान	**द्रुपदः**	= राजा द्रुपद,
शूराः	= शूर-वीर	**धृष्टकेतुः**	= धृष्टकेतु
युयुधानः	= सात्यकि	**च**	= और
		चेकितानः	= चेकितान
		च	= तथा

वीर्यवान्	= बलवान्	**वीर्यवान्**	= बलवान्
काशिराजः	= काशिराज,	**उत्तमौजाः**	= उत्तमौजा,
पुरुजित्	= पुरुजित्,	**सौभद्रः**	= सुभद्रापुत्र अभिमन्यु
कुन्तिभोजः	= कुन्तिभोज		
च	= और	**च**	= एवं
नरपुङ्गवः	= मनुष्योंमें श्रेष्ठ	**द्रौपदेयाः**	= द्रौपदीके पाँचों पुत्र—(ये)
शैब्यः	= शैब्य,		
विक्रान्तः	= पराक्रमी	**सर्वे, एव**	= सभी
युधामन्युः	= युधामन्यु	**महारथाः**	= महारथी
च	= तथा	**(सन्ति)**	= हैं।

[अपनी सेनाके प्रधान सेना-नायकोंको भलीभाँति जाननेके लिये द्रोणाचार्यसे दुर्योधनकी प्रार्थना।]

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम।
नायका मम सैन्यस्य सञ्ज्ञार्थं तान्ब्रवीमि ते॥ ७॥

अस्माकम्, तु, विशिष्टाः, ये, तान्, निबोध, द्विजोत्तम,
नायकाः, मम, सैन्यस्य, सञ्ज्ञार्थम्, तान्, ब्रवीमि, ते॥ ७॥

द्विजोत्तम	= हे ब्राह्मणश्रेष्ठ!	**ते**	= आपकी
अस्माकम्	= अपने पक्षमें	**सञ्ज्ञार्थम्**	= जानकारीके लिये
तु	= भी	**मम**	= मेरी
ये	= जो	**सैन्यस्य**	= सेनाके (जो-जो)
विशिष्टाः	= प्रधान		
(सन्ति)	= हैं,	**नायकाः**	= सेनापति (हैं),
तान्	= उनको (आप)	**तान्**	= उनको
निबोध	= समझ लीजिये।	**ब्रवीमि**	= बतलाता हूँ।

[उनमेंसे कुछके नाम और सब वीरोंके पराक्रम तथा युद्ध-कौशलका वर्णन।]

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च॥ ८॥

भवान्, भीष्मः, च, कर्णः, च, कृपः, च, समितिञ्जयः, अश्वत्थामा, विकर्णः, च, सौमदत्तिः, तथा, एव, च॥ ८॥

एक तो स्वयम्—

भवान्	= आप—द्रोणाचार्य	**च**	= तथा
च	= और	**तथा**	= वैसे
भीष्मः	= पितामह भीष्म	**एव**	= ही
च	= तथा	**अश्वत्थामा**	= अश्वत्थामा,
कर्णः	= कर्ण	**विकर्णः**	= विकर्ण
च	= और	**च**	= और
समितिञ्जयः	= संग्रामविजयी	**सौमदत्तिः**	= सोमदत्तका पुत्र भूरिश्रवा
कृपः	= कृपाचार्य		

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः॥ ९॥

अन्ये, च, बहवः, शूराः, मदर्थे, त्यक्तजीविताः, नानाशस्त्रप्रहरणाः, सर्वे, युद्धविशारदाः॥ ९॥

तथा—

अन्ये	= और	**शूराः**	= शूरवीर
च	= भी	**नानाशस्त्र-प्रहरणाः**	= अनेक प्रकारके शस्त्रास्त्रोंसे सुसज्जित (और)
मदर्थे	= मेरे लिये	**सर्वे**	= सब-के-सब
त्यक्तजीविताः	= जीवनकी आशा त्याग देनेवाले	**युद्धविशारदाः**	= युद्धमें चतुर
बहवः	= बहुत-से	**(सन्ति)**	= हैं।

[दुर्योधनका पाण्डव-सेनाकी अपेक्षा अपनी सेनाको अजेय बतलाना।]

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्॥ १०॥

अपर्याप्तम्, तत्, अस्माकम्, बलम्, भीष्माभिरक्षितम्,
पर्याप्तम्, तु, इदम्, एतेषाम्, बलम्, भीमाभिरक्षितम्॥ १०॥

और—

भीष्माभिरक्षितम् = भीष्मपितामह-द्वारा रक्षित
अस्माकम् = हमारी
तत् = वह
बलम् = सेना
अपर्याप्तम् = सब प्रकारसे अजेय है
तु = और
भीमाभिरक्षितम् = भीमद्वारा रक्षित
एतेषाम् = इन लोगोंकी
इदम् = यह
बलम् = सेना
पर्याप्तम् = जीतनेमें सुगम है।

[सब वीरोंसे भीष्मकी रक्षा करनेके लिये दुर्योधनका अनुरोध।]

अयनेषु च सर्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि॥ ११॥

अयनेषु, च, सर्वेषु, यथाभागम्, अवस्थिताः,
भीष्मम्, एव, अभिरक्षन्तु, भवन्तः, सर्वे, एव, हि॥ ११॥

च = इसलिये
सर्वेषु = सब
अयनेषु = मोर्चोंपर
यथाभागम् = अपनी-अपनी जगह
अवस्थिताः = स्थित रहते हुए
भवन्तः = आपलोग
सर्वे, एव = सभी
हि = निःसन्देह
भीष्मम् = भीष्मपितामहकी
एव = ही
अभिरक्षन्तु = सब ओरसे रक्षा करें।

[दुर्योधनकी प्रसन्नताके लिये भीष्मके गरजकर शंख बजानेका और कौरव-सेनामें शंख-नगारे आदि विभिन्न बाजोंके एक साथ बज उठनेका वर्णन।]

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्॥ १२॥

तस्य, सञ्जनयन्, हर्षम्, कुरुवृद्धः, पितामहः,
सिंहनादम्, विनद्य, उच्चैः, शङ्खम्, दध्मौ, प्रतापवान्॥ १२॥

इस प्रकार द्रोणाचार्यसे कहते हुए दुर्योधनके वचनोंको सुनकर—

कुरुवृद्धः = कौरवोंमें वृद्ध
प्रतापवान् = बड़े प्रतापी
पितामहः = पितामह भीष्मने
तस्य = उस (दुर्योधन)-के (हृदयमें)
हर्षम् = हर्ष
सञ्जनयन् = उत्पन्न करते हुए
उच्चैः = उच्च स्वरसे
सिंहनादम् = सिंहकी दहाड़-के समान
विनद्य = गरजकर
शङ्खम् = शंख
दध्मौ = बजाया।

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥ १३॥

ततः, शङ्खाः, च, भेर्यः, च, पणवानकगोमुखाः,
सहसा, एव, अभ्यहन्यन्त, सः, शब्दः, तुमुलः, अभवत्॥ १३॥

ततः = इसके पश्चात्
शङ्खाः = शंख
च = और
भेर्यः = नगारे
च = तथा
पणवानक-गोमुखाः = ढोल, मृदंग और नरसिंघे आदि बाजे
सहसा = एक साथ
एव = ही
अभ्यहन्यन्त = बज उठे। (उनका)
सः = वह
शब्दः = शब्द
तुमुलः = बड़ा भयंकर
अभवत् = हुआ।

[क्रमशः श्रीकृष्ण, अर्जुन, भीमसेन, युधिष्ठिर, नकुल, सहदेव तथा पाण्डव-सेनाके अन्यान्य समस्त विशिष्ट योद्धाओंद्वारा अपने-अपने शंखोंका बजाया जाना।]

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

ततः, श्वेतैः, हयैः, युक्ते, महति, स्यन्दने, स्थितौ,
माधवः, पाण्डवः, च, एव, दिव्यौ, शङ्खौ, प्रदध्मतुः ॥ १४ ॥

ततः	= इसके अनन्तर	**माधवः**	= श्रीकृष्ण महाराज
श्वेतैः	= सफेद	**च**	= और
हयैः	= घोड़ोंसे	**पाण्डवः**	= अर्जुनने
युक्ते	= युक्त	**एव**	= भी
महति	= उत्तम	**दिव्यौ**	= अलौकिक
स्यन्दने	= रथमें	**शङ्खौ**	= शंख
स्थितौ	= बैठे हुए	**प्रदध्मतुः**	= बजाये।

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥

पाञ्चजन्यम्, हृषीकेशः, देवदत्तम्, धनञ्जयः,
पौण्ड्रम्, दध्मौ, महाशङ्खम्, भीमकर्मा, वृकोदरः ॥ १५ ॥

उनमें—

हृषीकेशः	= श्रीकृष्ण महाराजने	**भीमकर्मा**	= भयानक कर्मवाले
पाञ्चजन्यम्	= पांचजन्य-नामक,	**वृकोदरः**	= भीमसेनने
धनञ्जयः	= अर्जुनने	**पौण्ड्रम्**	= पौण्ड्र नामक
देवदत्तम्	= देवदत्त नामक (और)	**महाशङ्खम्**	= महाशंख
		दध्मौ	= बजाया।

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ॥ १६॥

अनन्तविजयम्, राजा, कुन्तीपुत्रः, युधिष्ठिरः,
नकुलः, सहदेवः, च, सुघोषमणिपुष्पकौ॥ १६॥

कुन्तीपुत्रः = कुन्तीपुत्र
राजा = राजा
युधिष्ठिरः = युधिष्ठिरने
अनन्तविजयम् = अनन्तविजय नामक (और)
नकुलः = नकुल
च = तथा
सहदेवः = सहदेवने
सुघोष-मणिपुष्पकौ = सुघोष और मणिपुष्पक नामक शंख (बजाये)।

काश्यश्च परमेष्वासः शिखण्डी च महारथः।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः॥ १७॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक्॥ १८॥

काश्यः, च, परमेष्वासः, शिखण्डी, च, महारथः,
धृष्टद्युम्नः, विराटः, च, सात्यकिः, च, अपराजितः॥ १७॥
द्रुपदः, द्रौपदेयाः, च, सर्वशः, पृथिवीपते,
सौभद्रः, च, महाबाहुः, शङ्खान्, दध्मुः, पृथक्, पृथक्॥ १८॥

परमेष्वासः = श्रेष्ठ धनुषवाले
काश्यः = काशिराज
च = और
महारथः = महारथी
शिखण्डी = शिखण्डी
च = एवं
धृष्टद्युम्नः = धृष्टद्युम्न
च = तथा
विराटः = राजा विराट
च = और
अपराजितः = अजेय
सात्यकिः = सात्यकि,
द्रुपदः = राजा द्रुपद
च = एवं

द्रौपदेयाः	= द्रौपदीके पाँचों पुत्र	पृथिवीपते	= हे राजन्!
च	= और	सर्वशः	= सब ओरसे
महाबाहुः	= बड़ी भुजावाले	पृथक्-पृथक्	= अलग-अलग
सौभद्रः	= सुभद्रापुत्र अभिमन्यु— (इन सभीने)	शङ्खान्	= शंख
		दध्मुः	= बजाये।

[पाण्डव-सेनाकी भयंकर शंख-ध्वनिसे आकाश और पृथ्वीके गूँज उठने तथा दुर्योधनादिके व्यथित होनेका वर्णन।]

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥ १९॥

सः, घोषः, धार्तराष्ट्राणाम्, हृदयानि, व्यदारयत्, नभः, च, पृथिवीम्, च, एव, तुमुलः, व्यनुनादयन्॥ १९॥

च	= और	एव	= भी
सः	= उस	व्यनुनादयन्	= गुँजाते हुए
तुमुलः	= भयानक	धार्तराष्ट्राणाम्	= धार्तराष्ट्रोंके यानि आपके पक्षवालोंके
घोषः	= शब्दने		
नभः	= आकाश		
च	= और	हृदयानि	= हृदय
पृथिवीम्	= पृथ्वीको	व्यदारयत्	= विदीर्ण कर दिये।

[धृतराष्ट्रपुत्रोंको युद्धके लिये तैयार देखकर अर्जुनका श्रीकृष्णसे अपना रथ दोनों सेनाओंके बीचमें ले चलनेके लिये कहना।]

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः॥ २०॥
हृषीकेशं तदा वाक्यमिदमाह महीपते।

अभय.

अर्जुन उवाच

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत॥ २१॥

अथ, व्यवस्थितान्, दृष्ट्वा, धार्तराष्ट्रान्, कपिध्वजः,
प्रवृत्ते, शस्त्रसम्पाते, धनुः, उद्यम्य, पाण्डवः॥ २०॥
हृषीकेशम्, तदा, वाक्यम्, इदम्, आह, महीपते,
सेनयोः, उभयोः, मध्ये, रथम्, स्थापय, मे, अच्युत॥ २१॥

महीपते	= हे राजन्!	**उद्यम्य**	= उठाकर
अथ	= इसके बाद	**हृषीकेशम्**	= हृषीकेश श्रीकृष्ण महाराजसे
कपिध्वजः	= कपिध्वज		
पाण्डवः	= अर्जुनने		
व्यवस्थितान्	= मोर्चा बाँधकर डटे हुए	**इदम्**	= यह
		वाक्यम्	= वचन
धार्तराष्ट्रान्	= धृतराष्ट्र- सम्बन्धियोंको	**आह**	= कहा—
		अच्युत	= हे अच्युत!
दृष्ट्वा	= देखकर,	**मे**	= मेरे
तदा	= उस	**रथम्**	= रथको
शस्त्रसम्पाते	= शस्त्र चलनेकी तैयारीके	**उभयोः**	= दोनों
		सेनयोः	= सेनाओंके
प्रवृत्ते	= समय	**मध्ये**	= बीचमें
धनुः	= धनुष	**स्थापय**	= खड़ा कीजिये।

[रथको वहीं खड़े रखनेका संकेत करके सबको देखनेकी इच्छा प्रकट करना।]

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे॥ २२॥

यावत्, एतान्, निरीक्षे, अहम्, योद्धुकामान्, अवस्थितान्,
कैः, मया, सह, योद्धव्यम्, अस्मिन्, रणसमुद्यमे॥ २२॥

और—

यावत्	= जबतक (कि)	**अस्मिन्**	= इस
अहम्	= मैं	**रणसमुद्यमे**	= युद्धरूप व्यापारमें
अवस्थितान्	= युद्ध-क्षेत्रमें डटे हुए	**मया**	= मुझे
		कैः	= किन-किनके
योद्धुकामान्	= युद्धके अभिलाषी	**सह**	= साथ
एतान्	= इन विपक्षी योद्धाओंको	**योद्धव्यम्**	= युद्ध करना योग्य है (तबतक उसे खड़ा रखिये)।
निरीक्षे	= भली प्रकार देख लूँ (कि)		

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः॥ २३॥

योत्स्यमानान्, अवेक्षे, अहम्, ये, एते, अत्र, समागताः, धार्तराष्ट्रस्य, दुर्बुद्धेः, युद्धे, प्रियचिकीर्षवः॥ २३॥

और—

दुर्बुद्धेः	= दुर्बुद्धि	**समागताः**	= आये हैं (इन)
धार्तराष्ट्रस्य	= दुर्योधनका		
युद्धे	= युद्धमें		
प्रियचिकीर्षवः	= हित चाहनेवाले	**योत्स्यमानान्**	= युद्ध करनेवालोंको
ये	= जो-जो		
एते	= ये राजालोग	**अहम्**	= मैं
अत्र	= इस सेनामें	**अवेक्षे**	= देखूँगा।

[रथको दोनों सेनाओंके बीचमें खड़ा करके श्रीकृष्णका युद्धके लिये एकत्रित सब वीरोंको देखनेके लिये अर्जुनसे कहना।]

सञ्जय उवाच

एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्॥ २४॥

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति॥ २५॥

एवम्, उक्तः, हृषीकेशः, गुडाकेशेन, भारत,
सेनयोः, उभयोः, मध्ये, स्थापयित्वा, रथोत्तमम्॥ २४॥

भीष्मद्रोणप्रमुखतः, सर्वेषाम्, च, महीक्षिताम्,
उवाच, पार्थ, पश्य, एतान्, समवेतान्, कुरून्, इति॥ २५॥

संजय बोले—

भारत	= हे धृतराष्ट्र!	**च**	= तथा
गुडाकेशेन	= अर्जुनद्वारा	**सर्वेषाम्**	= सम्पूर्ण
एवम्	= इस प्रकार	**महीक्षिताम्**	= राजाओंके सामने
उक्तः	= कहे हुए	**रथोत्तमम्**	= उत्तम रथको
		स्थापयित्वा	= खड़ा करके
हृषीकेशः	= महाराज श्रीकृष्णचन्द्रने	**इति**	= इस प्रकार
		उवाच	= कहा (कि)
उभयोः	= दोनों	**पार्थ**	= हे पार्थ! (युद्धके लिये)
सेनयोः	= सेनाओंके		
मध्ये	= बीचमें	**समवेतान्**	= जुटे हुए
भीष्मद्रोणप्रमुखतः	= भीष्म और द्रोणाचार्यके सामने	**एतान्**	= इन
		कुरून्	= कौरवोंको
		पश्य	= देख।

[स्वजन-समुदायको देखकर अर्जुनके व्याकुल होनेका तथा अर्जुनके द्वारा अपनी शोकाकुल स्थितिका वर्णन।]

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा॥ २६॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि।

तत्र, अपश्यत्, स्थितान्, पार्थः, पितॄन्, अथ, पितामहान्,
आचार्यान्, मातुलान्, भ्रातॄन्, पुत्रान्, पौत्रान्, सखीन् ॥ २६ ॥
तथा श्वशुरान्, सुहृदः, च, एव, सेनयोः, उभयोः, अपि,

अथ	= इसके बाद	**भ्रातॄन्**	= भाइयोंको,
पार्थः	= पृथापुत्र अर्जुनने	**पुत्रान्**	= पुत्रोंको,
तत्र	= उन	**पौत्रान्**	= पौत्रोंको
उभयोः	= दोनों		
एव	= ही	**तथा**	= तथा
सेनयोः	= सेनाओंमें	**सखीन्**	= मित्रोंको,
स्थितान्	= स्थित	**श्वशुरान्**	= ससुरोंको
पितॄन्	= ताऊ-चाचोंको,	**च**	= और
पितामहान्	= दादों-परदादोंको,	**सुहृदः**	= सुहृदोंको
आचार्यान्	= गुरुओंको,	**अपि**	= भी
मातुलान्	= मामाओंको,	**अपश्यत्**	= देखा।

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥ २७ ॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत्।

तान्, समीक्ष्य, सः, कौन्तेयः, सर्वान्, बन्धून् अवस्थितान्, ॥ २७ ॥
कृपया, परया, आविष्टः, विषीदन्, इदम्, अब्रवीत्,

इस प्रकार—

तान्	= उन	**परया**	= अत्यन्त
अवस्थितान्	= उपस्थित	**कृपया**	= करुणासे
सर्वान्	= सम्पूर्ण	**आविष्टः**	= युक्त होकर
बन्धून्	= बन्धुओंको		
समीक्ष्य	= देखकर	**विषीदन्**	= शोक करते हुए
सः	= वे	**इदम्**	= यह (वचन)
कौन्तेयः	= कुन्तीपुत्र अर्जुन	**अब्रवीत्**	= बोले।

अर्जुन उवाच

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्॥ २८॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥ २९॥

दृष्ट्वा, इमम्, स्वजनम्, कृष्ण, युयुत्सुम्, समुपस्थितम्॥ २८॥
सीदन्ति, मम, गात्राणि, मुखम्, च, परिशुष्यति,
वेपथुः, च, शरीरे, मे, रोमहर्षः, च, जायते॥ २९॥

अर्जुन बोले—

कृष्ण	= हे कृष्ण!, (युद्ध-क्षेत्रमें)	**सीदन्ति**	= शिथिल हुए जा रहे हैं
		च	= और
समुपस्थितम्	= डटे हुए	**मुखम्**	= मुख
युयुत्सुम्	= युद्धके अभिलाषी	**परिशुष्यति**	= सूखा जा रहा है
		च	= तथा
इमम्	= इस	**मे**	= मेरे
स्वजनम्	= स्वजन-समुदायको	**शरीरे**	= शरीरमें
		वेपथुः	= कम्प
दृष्ट्वा	= देखकर	**च**	= एवं
मम	= मेरे	**रोमहर्षः**	= रोमांच
गात्राणि	= अंग	**जायते**	= हो रहा है।

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥ ३०॥

गाण्डीवम्, स्रंसते, हस्तात्, त्वक्, च, एव, परिदह्यते,
न, च, शक्नोमि, अवस्थातुम्, भ्रमति, इव, च, मे, मनः॥ ३०॥

तथा—

हस्तात्	= हाथसे	मे	= मेरा
गाण्डीवम्	= गाण्डीव धनुष	मनः	= मन
स्रंसते	= गिर रहा है	भ्रमति, इव	= भ्रमित-सा हो रहा है,
च	= और		
त्वक्	= त्वचा	(अतः)	= इसलिये (मैं)
एव	= भी	अवस्थातुम्	= खड़ा रहनेको
परिदह्यते	= बहुत जल रही है	च	= भी
च	= तथा	न शक्नोमि	= समर्थ नहीं हूँ।

[युद्धके विपरीत परिणामका वर्णन।]

निमित्तानि च पश्यामि विपरीतानि केशव।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे॥ ३१॥

निमित्तानि, च, पश्यामि, विपरीतानि, केशव, न, च, श्रेयः, अनुपश्यामि, हत्वा, स्वजनम्, आहवे॥ ३१॥

और—

केशव	= हे केशव! (मैं)	स्वजनम्	= स्वजन-समुदायको
निमित्तानि	= लक्षणोंको		
च	= भी	हत्वा	= मारकर
विपरीतानि	= विपरीत ही	श्रेयः	= कल्याण
पश्यामि	= देख रहा हूँ (तथा)	च	= भी
		न	= नहीं
आहवे	= युद्धमें	अनुपश्यामि	= देखता।

[अर्जुनकी विजय और राज्य-सुख न चाहनेकी युक्तिपूर्ण दलील।]

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा॥ ३२॥

न, काङ्क्षे, विजयम्, कृष्ण, न, च, राज्यम्, सुखानि, च,
किम्, नः, राज्येन, गोविन्द, किम्, भोगैः, जीवितेन, वा॥ ३२॥

और—

कृष्ण	= हे कृष्ण! (मैं)	**गोविन्द**	= हे गोविन्द!
न	= न (तो)	**नः**	= हमें (ऐसे)
विजयम्	= विजय	**राज्येन**	= राज्यसे
काङ्क्षे	= चाहता हूँ	**किम्**	= क्या प्रयोजन है
च	= और	**वा**	= अथवा (ऐसे)
न	= न		
राज्यम्	= राज्य	**भोगैः**	= भोगोंसे (और)
च	= तथा	**जीवितेन**	= जीवनसे (भी)
सुखानि	= सुखोंको (ही)।	**किम्**	= क्या (लाभ है)?

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥ ३३॥

येषाम्, अर्थे, काङ्क्षितम्, नः, राज्यम्, भोगाः, सुखानि, च,
ते, इमे, अवस्थिताः, युद्धे, प्राणान्, त्यक्त्वा, धनानि, च॥ ३३॥

क्योंकि—

नः	= हमें	**इमे**	= ये सब
येषाम्	= जिनके	**धनानि**	= धन
अर्थे	= लिये	**च**	= और
राज्यम्	= राज्य,	**प्राणान्**	= जीवन (की आशा)-को
भोगाः	= भोग		
च	= और		
सुखानि	= सुखादि	**त्यक्त्वा**	= त्यागकर
काङ्क्षितम्	= अभीष्ट हैं,	**युद्धे**	= युद्धमें
ते	= वे (ही)	**अवस्थिताः**	= खड़े हैं।

[अर्जुनद्वारा आचार्यादि स्वजनोंका वर्णन तथा इनको न मारनेकी इच्छा प्रकट करना।]

आचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥ ३४ ॥

आचार्याः, पितरः, पुत्राः, तथा, एव, च, पितामहाः,
मातुलाः, श्वशुराः, पौत्राः, श्यालाः, सम्बन्धिनः, तथा ॥ ३४ ॥

जो कि—

आचार्याः	= गुरुजन	**श्वशुराः**	= ससुर,
पितरः	= ताऊ-चाचे,	**पौत्राः**	= पौत्र,
पुत्राः	= लड़के	**श्यालाः**	= साले
च	= और	**तथा**	= तथा (और भी)
तथा, एव	= उसी प्रकार	**सम्बन्धिनः**	= सम्बन्धी लोग (हैं)।
पितामहाः	= दादे,		
मातुलाः	= मामे,		

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥

एतान्, न, हन्तुम्, इच्छामि, घ्नतः, अपि, मधुसूदन,
अपि, त्रैलोक्यराज्यस्य, हेतोः, किम्, नु, महीकृते ॥ ३५ ॥

इसलिये—

मधुसूदन	= हे मधुसूदन! (मुझे)	**अपि**	= भी (मैं)
घ्नतः	= मारनेपर	**एतान्**	= इन सबको
अपि	= भी (अथवा)	**हन्तुम्**	= मारना
त्रैलोक्यराज्यस्य	= तीनों लोकोंके राज्यके	**न**	= नहीं
		इच्छामि	= चाहता; (फिर)
		महीकृते	= पृथ्वीके लिये (तो)
हेतोः	= लिये	**नु किम्**	= कहना ही क्या है?

[आततायी होनेपर भी दुर्योधनादि स्वजनोंको मारनेमें पापकी प्राप्ति और सुख तथा प्रसन्नताका अभाव बतलाना।]

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥

निहत्य, धार्तराष्ट्रान्, नः, का, प्रीतिः, स्यात्, जनार्दन, पापम्, एव, आश्रयेत्, अस्मान्, हत्वा, एतान्, आततायिनः ॥ ३६ ॥

जनार्दन	= हे जनार्दन!	**एतान्**	= इन
धार्तराष्ट्रान्	= धृतराष्ट्रके पुत्रोंको	**आततायिनः**	= आततायियोंको
निहत्य	= मारकर	**हत्वा**	= मारकर (तो)
नः	= हमें	**अस्मान्**	= हमें
का	= क्या	**पापम्**	= पाप
प्रीतिः	= प्रसन्नता	**एव**	= ही
स्यात्	= होगी?	**आश्रयेत्**	= लगेगा।

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान्।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥ ३७॥

तस्मात्, न, अर्हाः, वयम्, हन्तुम्, धार्तराष्ट्रान्, स्वबान्धवान्, स्वजनम्, हि, कथम्, हत्वा, सुखिनः, स्याम, माधव॥ ३७॥

तस्मात्	= अतएव	**न, अर्हाः**	= योग्य नहीं हैं;
माधव	= हे माधव!	**हि**	= क्योंकि
स्वबान्धवान्	= अपने ही बान्धव	**स्वजनम्**	= अपने ही कुटुम्बको
धार्तराष्ट्रान्	= धृतराष्ट्रके पुत्रोंको	**हत्वा**	= मारकर (हम)
हन्तुम्	= मारनेके लिये	**कथम्**	= कैसे
वयम्	= हम	**सुखिनः**	= सुखी
		स्याम	= होंगे?

[अर्जुनका कुलके नाश और मित्रद्रोहसे होनेवाले पापसे बचनेके लिये युद्ध न करना उचित बतलाना।]

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्॥ ३८॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन॥ ३९॥

यद्यपि, एते, न, पश्यन्ति, लोभोपहतचेतसः, कुलक्षयकृतम्, दोषम्, मित्रद्रोहे, च, पातकम्॥ ३८॥
कथम्, न, ज्ञेयम्, अस्माभिः, पापात्, अस्मात्, निवर्तितुम्, कुलक्षयकृतम्, दोषम्, प्रपश्यद्भिः, जनार्दन॥ ३९॥

यद्यपि	= यद्यपि	**जनार्दन**	= हे जनार्दन!
लोभोपहतचेतसः	= लोभसे भ्रष्टचित्त हुए	**कुलक्षयकृतम्**	= कुलके नाशसे उत्पन्न
एते	= ये लोग	**दोषम्**	= दोषको
कुलक्षयकृतम्	= कुलके नाशसे उत्पन्न	**प्रपश्यद्भिः**	= जाननेवाले
दोषम्	= दोषको	**अस्माभिः**	= हमलोगोंको
च	= और	**अस्मात्**	= इस
मित्रद्रोहे	= मित्रोंसे विरोध करनेमें	**पापात्**	= पापसे
पातकम्	= पापको	**निवर्तितुम्**	= हटनेके लिये
न	= नहीं	**कथम्**	= क्यों
पश्यन्ति	= देखते, (तो भी)	**न**	= नहीं
		ज्ञेयम्	= विचार करना चाहिये?

[कुल-नाशसे उत्पन्न होनेवाले दोषोंका विस्तारपूर्वक वर्णन।]

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत॥ ४०॥

कुलक्षये, प्रणश्यन्ति, कुलधर्माः, सनातनाः,
धर्मे, नष्टे, कुलम्, कृत्स्नम्, अधर्मः, अभिभवति, उत॥ ४०॥

क्योंकि—

कुलक्षये	= कुलके नाशसे	**कृत्स्नम्**	= सम्पूर्ण
सनातनाः	= सनातन	**कुलम्**	= कुलमें
कुलधर्माः	= कुलधर्म	**अधर्मः**	= पाप
प्रणश्यन्ति	= नष्ट हो जाते हैं,	**उत**	= भी
धर्मे	= धर्मके	**अभिभवति**	= बहुत फैल जाता है।
नष्टे	= नाश हो जानेपर		

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः॥ ४१॥

अधर्माभिभवात्, कृष्ण, प्रदुष्यन्ति, कुलस्त्रियः,
स्त्रीषु, दुष्टासु, वार्ष्णेय, जायते, वर्णसङ्करः॥ ४१॥

तथा—

कृष्ण	= हे कृष्ण!	**वार्ष्णेय**	= हे वार्ष्णेय!
अधर्माभिभवात्	= पापके अधिक बढ़ जानेसे	**स्त्रीषु**	= स्त्रियोंके
कुलस्त्रियः	= कुलकी स्त्रियाँ	**दुष्टासु**	= दूषित हो जानेपर
प्रदुष्यन्ति	= अत्यन्त दूषित हो जाती हैं (और)	**वर्णसङ्करः**	= वर्णसंकर
		जायते	= उत्पन्न होता है—

सङ्करो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥ ४२॥

सङ्करः, नरकाय, एव, कुलघ्नानाम्, कुलस्य, च,
पतन्ति, पितरः, हि, एषाम्, लुप्तपिण्डोदकक्रियाः॥ ४२॥

और वह—

सङ्करः	= वर्णसंकर	**क्रियाः**	= क्रियावाले अर्थात् श्राद्ध और तर्पणसे वंचित
कुलघ्नानाम्	= कुलघातियोंको		
च	= और		
कुलस्य	= कुलको		
नरकाय	= नरकमें ले जानेके लिये	**एषाम्**	= इनके
एव	= ही (होता है)	**पितरः**	= पितरलोग
लुप्तपिण्डोदक-	= लुप्त हुई पिण्ड और जलकी	**हि**	= भी
		पतन्ति	= अधोगतिको प्राप्त होते हैं।

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥ ४३॥

दोषैः, एतैः, कुलघ्नानाम्, वर्णसङ्करकारकैः, उत्साद्यन्ते, जातिधर्माः, कुलधर्माः, च, शाश्वताः॥ ४३॥

और—

एतैः	= इन	**कुलधर्माः**	= कुल-धर्म
वर्णसङ्करकारकैः	= वर्णसंकरकारक	**च**	= और
दोषैः	= दोषोंसे		
कुलघ्नानाम्	= कुलघातियोंके	**जातिधर्माः**	= जाति-धर्म
शाश्वताः	= सनातन	**उत्साद्यन्ते**	= नष्ट हो जाते हैं।

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम॥ ४४॥

उत्सन्नकुलधर्माणाम्, मनुष्याणाम्, जनार्दन, नरके, अनियतम्, वासः, भवति, इति, अनुशुश्रुम॥ ४४॥

तथा—

जनार्दन	= हे जनार्दन!	**अनियतम्**	= अनिश्चित कालतक
उत्सन्नकुल-धर्माणाम्	= जिनका कुल-धर्म नष्ट हो गया है, (ऐसे)	**नरके**	= नरकमें
		वासः	= वास
		भवति	= होता है,
		इति	= ऐसा (हम)
मनुष्याणाम्	= मनुष्योंका	**अनुशुश्रुम**	= सुनते आये हैं।

[राज्य और सुखादि लोभसे स्वजनोंको मारनेके लिये की हुई युद्धकी तैयारीको महान् पापका आरम्भ बतलाना एवं अर्जुनका दुर्योधनादिद्वारा अपने मारे जानेको श्रेष्ठ बतलाना।]

अहो बत महत्पापं कर्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

अहो, बत, महत्, पापम्, कर्तुम्, व्यवसिताः, वयम्,
यत्, राज्यसुखलोभेन, हन्तुम्, स्वजनम्, उद्यताः ॥ ४५ ॥

अहो	= हा!	**व्यवसिताः**	= तैयार हो गये हैं,
बत	= शोक!	**यत्**	= जो
वयम्	= हमलोग (बुद्धिमान् होकर भी)	**राज्यसुखलोभेन**	= राज्य और सुखके लोभसे
महत्	= महान्	**स्वजनम्**	= स्वजनोंको
पापम्	= पाप	**हन्तुम्**	= मारनेके लिये
कर्तुम्	= करनेको	**उद्यताः**	= उद्यत हो गये हैं।

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥ ४६ ॥

यदि, माम्, अप्रतीकारम्, अशस्त्रम्, शस्त्रपाणयः,
धार्तराष्ट्राः, रणे, हन्युः, तत्, मे, क्षेमतरम्, भवेत्॥ ४६ ॥

यदि	= यदि	**रणे**	= रणमें
माम्	= मुझ	**हन्युः**	= मार डालें (तो)
अशस्त्रम्	= शस्त्ररहित (एवं)	**तत्**	= वह (मारना भी)
अप्रतीकारम्	= सामना न करनेवालेको	**मे**	= मेरे लिये
शस्त्रपाणयः	= शस्त्र हाथमें लिये हुए	**क्षेमतरम्**	= अधिक कल्याण-कारक
धार्तराष्ट्राः	= धृतराष्ट्रके पुत्र	**भवेत्**	= होगा।

[युद्ध न करनेका निश्चय करके शोकनिमग्न अर्जुनके शस्त्रत्यागपूर्वक रथपर बैठ जानेकी बात कहकर संजयद्वारा अध्यायसमाप्ति।]

सञ्जय उवाच

एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

एवम्, उक्त्वा, अर्जुनः, सङ्ख्ये, रथोपस्थे, उपाविशत्,
विसृज्य, सशरम्, चापम्, शोकसंविग्नमानसः ॥ ४७ ॥

संजय बोले कि—

सङ्ख्ये	= रणभूमिमें	**सशरम्**	= बाणसहित
शोकसंविग्न-मानसः	= शोकसे उद्विग्न मनवाला	**चापम्**	= धनुषको
अर्जुनः	= अर्जुन	**विसृज्य**	= त्यागकर
एवम्	= इस प्रकार	**रथोपस्थे**	= रथके पिछले भागमें
उक्त्वा	= कहकर	**उपाविशत्**	= बैठ गया।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

ॐ श्रीपरमात्मने नमः

अथ द्वितीयोऽध्यायः

प्रधान-विषय—*१ से १० तक अर्जुनकी कायरताके विषयमें श्रीकृष्णार्जुनका संवाद, (११—३०) सांख्ययोगका विषय, (३१—३८) क्षात्रधर्मके अनुसार युद्ध करनेकी आवश्यकताका निरूपण, (३९—५३) निष्काम कर्मयोगका विषय, (५४—७२) स्थिरबुद्धि पुरुषके लक्षण और उसकी महिमा।*

[संजयद्वारा अर्जुनके विषादका वर्णन।]

सञ्जय उवाच

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥ १॥

तम्, तथा, कृपया, आविष्टम्, अश्रुपूर्णाकुलेक्षणम्, विषीदन्तम्, इदम्, वाक्यम्, उवाच, मधुसूदनः॥ १॥

संजय बोले कि—

तथा	= उस प्रकार	**तम्**	= उस अर्जुनके प्रति
कृपया	= करुणासे		
आविष्टम्	= व्याप्त (और)	**मधुसूदनः**	= भगवान् मधुसूदनने
अश्रुपूर्णाकुलेक्षणम्	= आँसुओंसे पूर्ण तथा व्याकुल नेत्रोंवाले	**इदम्**	= यह
		वाक्यम्	= वचन
विषीदन्तम्	= शोकयुक्त	**उवाच**	= कहा।

[श्रीकृष्णद्वारा अर्जुनके मोह और कायरतायुक्त विषादकी निन्दा एवं उसे युद्धके लिये उत्साहित करना।]

श्रीभगवानुवाच

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥ २॥

कुतः, त्वा, कश्मलम्, इदम्, विषमे, समुपस्थितम्,
अनार्यजुष्टम्, अस्वर्ग्यम्, अकीर्तिकरम्, अर्जुन ॥ २ ॥

श्रीभगवान् बोले—

अर्जुन = हे अर्जुन!
त्वा = तुझे (इस)
विषमे = असमयमें
इदम् = यह
कश्मलम् = मोह
कुतः = किस हेतुसे
समुपस्थितम् = प्राप्त हुआ?

(यतः) = क्योंकि
अनार्यजुष्टम् = न तो यह श्रेष्ठ पुरुषोंद्वारा आचरित है,
अस्वर्ग्यम् = न स्वर्गको देनेवाला है और
अकीर्तिकरम् = न कीर्तिको करनेवाला ही है।

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप॥ ३ ॥

क्लैब्यम्, मा, स्म, गमः, पार्थ, न, एतत्, त्वयि, उपपद्यते,
क्षुद्रम्, हृदयदौर्बल्यम्, त्यक्त्वा, उत्तिष्ठ, परन्तप ॥ ३ ॥

इसलिये—

पार्थ = हे अर्जुन!
क्लैब्यम् = नपुंसकताको
मा, स्म, गमः = मत प्राप्त हो,
त्वयि = तुझमें
एतत् = यह
न, उपपद्यते = उचित नहीं जान पड़ती।

परन्तप = हे परंतप!
क्षुद्रम्, हृदयदौर्बल्यम् = हृदयकी तुच्छ दुर्बलताको
त्यक्त्वा = त्यागकर
उत्तिष्ठ = युद्धके लिये खड़ा हो जा।

[अर्जुनका भीष्म-द्रोण आदि पूज्य गुरुजनोंको मारनेकी अपेक्षा भिक्षान्नद्वारा निर्वाह श्रेष्ठ बतलाना।]

अर्जुन उवाच

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन॥ ४॥

कथम्, भीष्मम्, अहम्, सङ्ख्ये, द्रोणम्, च, मधुसूदन, इषुभिः, प्रति, योत्स्यामि, पूजार्हौ, अरिसूदन॥ ४॥

तब अर्जुन बोले कि—

मधुसूदन	= हे मधुसूदन!	**द्रोणम्**	= द्रोणाचार्यके
अहम्	= मैं	**प्रति योत्स्यामि**	= विरुद्ध लड़ूँगा?
सङ्ख्ये	= रणभूमिमें		
कथम्	= किस प्रकार	**(यतः)**	= क्योंकि
इषुभिः	= बाणोंसे	**अरिसूदन**	= हे अरिसूदन!
भीष्मम्	= भीष्मपितामह	**(तौ)**	= वे दोनों ही
च	= और	**पूजार्हौ**	= पूजनीय हैं।

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान्॥ ५॥

गुरून्, अहत्वा, हि, महानुभावान्, श्रेयः, भोक्तुम्, भैक्ष्यम्, अपि, इह, लोके, हत्वा, अर्थकामान्, तु, गुरून्, इह, एव, भुञ्जीय, भोगान्, रुधिरप्रदिग्धान्॥ ५॥

इसलिये इन—

महानुभावान्	= महानुभाव	**इह**	= इस
गुरून्	= गुरुजनोंको	**लोके**	= लोकमें
अहत्वा	= न मारकर (मैं)	**भैक्ष्यम्**	= भिक्षाका अन्न

अपि	= भी	**(अपि)**	= भी
भोक्तुम्	= खाना	**इह**	= इस लोकमें
श्रेयः	= कल्याणकारक (समझता हूँ)।	**रुधिरप्रदिग्धान्**	= रुधिरसे सने हुए
हि	= क्योंकि	**अर्थकामान्**	= अर्थ और कामरूप
गुरून्	= गुरुजनोंको	**भोगान्, एव**	= भोगोंको ही
हत्वा	= मारकर	**तु**	= तो
		भुञ्जीय	= भोगूँगा।

[युद्ध करने या न करनेके विषयमें अर्जुनका संशय।]

न चैतद्विद्मः कतरन्नो गरीयो-
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

न, च, एतत्, विद्मः, कतरत्, नः, गरीयः, यत्, वा, जयेम, यदि, वा, नः, जयेयुः, यान्, एव, हत्वा, न, जिजीविषामः, ते, अवस्थिताः, प्रमुखे, धार्तराष्ट्राः ॥ ६ ॥

और हम—

एतत्	= यह	**यत्, वा**	= अथवा (यह भी नहीं जानते कि)
च	= भी	**जयेम**	= उन्हें हम जीतेंगे
न	= नहीं	**यदि, वा**	= या
विद्मः	= जानते (कि)	**नः**	= हमको (वे)
नः	= हमारे लिये (युद्ध करना और न करना—इन)	**जयेयुः**	= जीतेंगे। (और)
		यान्	= जिनको
		हत्वा	= मारकर (हम)
कतरत्	= दोनोंमेंसे कौन-सा	**न, जिजीविषामः**	= जीना भी नहीं चाहते,
गरीयः	= श्रेष्ठ है		

ते	= वे	**प्रमुखे**	= हमारे सामने मुकाबलेमें
एव	= ही (हमारे आत्मीय)		
धार्तराष्ट्राः	= धृतराष्ट्रके पुत्र	**अवस्थिताः**	= खड़े हैं।

[मोह और कायरतारूप दोषोंका वर्णन करते हुए भगवान्‌के शरण होकर उनसे कल्याणप्रद उपदेश-हेतु अर्जुनकी प्रार्थना।]

कार्पण्यदोषोपहतस्वभावः

पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥ ७॥

कार्पण्यदोषोपहतस्वभावः, पृच्छामि, त्वाम्, धर्मसम्मूढचेताः, यत्, श्रेयः, स्यात्, निश्चितम्, ब्रूहि, तत्, मे, शिष्यः, ते, अहम्, शाधि, माम्, त्वाम्, प्रपन्नम्॥ ७॥

इसलिये—

कार्पण्य-दोषोपहत-स्वभावः	= कायरतारूप दोषसे उपहत हुए स्वभाव-वाला (तथा)	**स्यात्**	= हो,
		तत्	= वह
		मे	= मेरे लिये
		ब्रूहि	= कहिये; (क्योंकि)
धर्मसम्मूढचेताः	= धर्मके विषयमें मोहितचित्त हुआ (मैं)	**अहम्**	= मैं
		ते	= आपका
त्वाम्	= आपसे	**शिष्यः**	= शिष्य हूँ (इसलिये)
पृच्छामि	= पूछता हूँ (कि)	**त्वाम्**	= आपके
यत्	= जो (साधन)	**प्रपन्नम्**	= शरण हुए
निश्चितम्	= निश्चित	**माम्**	= मुझको
श्रेयः	= कल्याणकारक	**शाधि**	= शिक्षा दीजिये।

[अर्जुनका त्रिलोकीके निष्कण्टक राज्यको भी शोकनिवृत्तिमें कारण न मानकर वैराग्यका भाव प्रदर्शित करना।]

न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं-
राज्यं सुराणामपि चाधिपत्यम्॥ ८ ॥

न, हि, प्रपश्यामि, मम, अपनुद्यात्, यत्, शोकम्, उच्छोषणम्, इन्द्रियाणाम्, अवाप्य, भूमौ, असपत्नम्, ऋद्धम्, राज्यम्, सुराणाम्, अपि, च, आधिपत्यम्॥ ८ ॥

हि	= क्योंकि	**(तत्)**	= उस (उपाय)-को
भूमौ	= भूमिमें	**न**	= नहीं
असपत्नम्	= निष्कण्टक,	**प्रपश्यामि**	= देखता हूँ,
ऋद्धम्	= धनधान्य-सम्पन्न	**यत्**	= जो
राज्यम्	= राज्यको	**मम**	= मेरी
च	= और		
सुराणाम्	= देवताओंके	**इन्द्रियाणाम्**	= इन्द्रियोंके
आधिपत्यम्	= स्वामीपनेको	**उच्छोषणम्**	= सुखानेवाले
अवाप्य	= प्राप्त होकर	**शोकम्**	= शोकको
अपि	= भी (मैं)	**अपनुद्यात्**	= दूर कर सके ।

[(संजयद्वारा वर्णित) अर्जुनका युद्ध न करनेके लिये कहकर चुप होना तथा भगवान्‌का मुसकराकर बोलना।]

सञ्जय उवाच

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥ ९ ॥

एवम्, उक्त्वा, हृषीकेशम्, गुडाकेशः, परन्तप, न, योत्स्ये, इति, गोविन्दम्, उक्त्वा, तूष्णीम्, बभूव, ह॥ ९ ॥

संजय बोले—

परन्तप	= हे राजन्!	**गोविन्दम्**	= श्रीगोविन्द, भगवान्से
गुडाकेशः	= निद्राको जीतनेवाले अर्जुन	**न, योत्स्ये**	= 'युद्ध नहीं करूँगा'
हृषीकेशम्	= अन्तर्यामी श्रीकृष्ण महाराजके प्रति	**इति**	= यह
		ह	= स्पष्ट
		उक्त्वा	= कहकर
एवम्	= इस प्रकार	**तूष्णीम्**	= चुप
उक्त्वा	= कहकर (फिर)	**बभूव**	= हो गये।

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः॥ १०॥

तम्, उवाच, हृषीकेशः, प्रहसन्, इव, भारत,
सेनयोः, उभयोः, मध्ये, विषीदन्तम्, इदम्, वचः॥ १०॥

उसके पश्चात्—

भारत	= हे भरतवंशी धृतराष्ट्र!	**मध्ये**	= बीचमें
		विषीदन्तम्	= शोक करते हुए
हृषीकेशः	= अन्तर्यामी श्रीकृष्ण महाराज	**तम्**	= उस अर्जुनको
		प्रहसन्, इव	= हँसते हुए-से
		इदम्	= यह
उभयोः	= दोनों	**वचः**	= वचन
सेनयोः	= सेनाओंके	**उवाच**	= बोले।

[भगवान्का अर्जुनके प्रति उपदेश प्रारम्भ।]

श्रीभगवानुवाच

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥ ११॥

अशोच्यान्, अन्वशोचः, त्वम्, प्रज्ञावादान्, च भाषसे,
गतासून्, अगतासून्, च, न, अनुशोचन्ति, पण्डिताः॥ ११॥

श्रीभगवान् बोले—हे अर्जुन!—

त्वम्	= तू	**गतासून्**	= जिनके प्राण चले गये हैं, उनके लिये
अशोच्यान्	= न शोक करने-योग्य मनुष्योंके लिये	**च**	= और
अन्वशोचः	= शोक करता है	**अगतासून्**	= जिनके प्राण नहीं गये हैं, उनके लिये (भी)
च	= और	**पण्डिताः**	= पण्डितजन
प्रज्ञावादान्	= पण्डितोंके-से वचनोंको	**न, अनुशोचन्ति**	= शोक नहीं करते।
भाषसे	= कहता है; (परंतु)		

[आत्माकी नित्यता और निर्विकारताका निरूपण।]

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥ १२॥

न, तु, एव, अहम्, जातु, न, आसम्, न, त्वम्, न, इमे, जनाधिपाः,
न, च, एव, न, भविष्यामः, सर्वे, वयम्, अतः, परम्॥ १२॥

न	= न	**इमे**	= ये
तु	= तो	**जनाधिपाः**	= राजालोग
(एवम्)	= ऐसा	**न**	= नहीं
एव	= ही (है कि)	**(आसन्)**	= थे
अहम्	= मैं	**च**	= और
जातु	= किसी कालमें	**न**	= न
न	= नहीं	**(एवम्)**	= ऐसा
आसम्	= था (अथवा)	**एव**	ही (है कि)
त्वम्	= तू		
न	= नहीं	**अतः**	= इससे
(आसीः)	= था (अथवा)	**परम्**	= आगे

वयम्	= हम	**न**	= नहीं
सर्वे	= सब	**भविष्यामः**	= रहेंगे।

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ १३॥

देहिनः, अस्मिन्, यथा, देहे, कौमारम्, यौवनम्, जरा, तथा, देहान्तरप्राप्तिः, धीरः, तत्र, न, मुह्यति॥ १३॥

किंतु—

यथा	= जैसे	**तथा**	= वैसे ही
देहिनः	= जीवात्माकी	**देहान्तरप्राप्तिः**	= अन्य शरीरकी प्राप्ति होती है;
अस्मिन्	= इस		
देहे	= देहमें	**तत्र**	= उस विषयमें
कौमारम्	= बालकपन,	**धीरः**	= धीर पुरुष
यौवनम्	= जवानी (और)		
जरा	= वृद्धावस्था (होती है)	**न, मुह्यति**	= मोहित नहीं होता।

[समस्त भोगोंको अनित्य बतलाकर सुख-दुःखादि द्वन्द्वोंको सहन करनेके लिये आज्ञा।]

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥ १४॥

मात्रास्पर्शाः, तु, कौन्तेय, शीतोष्णसुखदुःखदाः, आगमापायिनः, अनित्याः, तान्, तितिक्षस्व, भारत॥ १४॥

कौन्तेय	= हे कुन्तीपुत्र!	**तु**	= तो
शीतोष्ण-सुखदुःखदाः	= सर्दी-गर्मी और सुख-दुःखको देनेवाले	**आगमापायिनः**	= उत्पत्ति-विनाशशील (और)
मात्रास्पर्शाः	= इन्द्रिय और विषयोंके संयोग	**अनित्याः**	= अनित्य हैं, (इसलिये)

भारत	= हे भारत!	**तितिक्षस्व**	= सहन कर।
तान्	= उनको (तू)		

[उक्त सहनशीलताको मोक्षप्राप्तिमें हेतु बतलाना।]

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥ १५॥

यम्, हि, न, व्यथयन्ति, एते, पुरुषम्, पुरुषर्षभ, समदुःखसुखम्, धीरम्, सः, अमृतत्वाय, कल्पते॥ १५॥

हि	= क्योंकि	**एते**	= ये (इन्द्रिय और विषयोंके संयोग)
पुरुषर्षभ	= हे पुरुषश्रेष्ठ!		
समदुःखसुखम्	= दुःख-सुखको समान समझनेवाले	**न व्यथयन्ति**	= व्याकुल नहीं करते,
यम्	= जिस	**सः**	= वह
धीरम्	= धीर	**अमृतत्वाय**	= मोक्षके
पुरुषम्	= पुरुषको	**कल्पते**	= योग्य होता है।

[सत् और असत्का लक्षण।]

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥ १६॥

न, असतः, विद्यते, भावः, न, अभावः, विद्यते, सतः, उभयोः, अपि, दृष्टः, अन्तः, तु, अनयोः, तत्त्वदर्शिभिः॥ १६॥

और हे अर्जुन!—

असतः	= असत् (वस्तु) की (तो)	**विद्यते**	= है
		तु	= और
भावः	= सत्ता	**सतः**	= सत्का
न	= नहीं	**अभावः**	= अभाव

न	= नहीं	**अपि**	= ही
विद्यते	= है। (इस प्रकार)	**अन्तः**	= तत्त्व
अनयोः	= इन	**तत्त्वदर्शिभिः**	= तत्त्वज्ञानी पुरुषोंद्वारा
उभयोः	= दोनोंका	**दृष्टः**	= देखा गया है—

[सत् और असत् वस्तुके स्वरूपका निरूपण एवं अर्जुनको युद्ध करनेकी आज्ञा।]

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति॥ १७॥

अविनाशि, तु, तत्, विद्धि, येन्, सर्वम्, इदम्, ततम्, विनाशम्, अव्ययस्य, अस्य, न, कश्चित्, कर्तुम्, अर्हति॥ १७॥

इस न्यायके अनुसार—

अविनाशि	= नाशरहित	**ततम्**	= व्याप्त है।
तु	= तो (तू)	**अस्य**	= इस
तत्	= उसको	**अव्ययस्य**	= अविनाशीका
विद्धि	= जान,	**विनाशम्**	= विनाश
येन	= जिससे	**कर्तुम्**	= करनेमें
इदम्	= यह		
सर्वम्	= सम्पूर्ण जगत् (दृश्यवर्ग)	**कश्चित्**	= कोई भी
		न, अर्हति	= समर्थ नहीं है।

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥ १८॥

अन्तवन्तः, इमे, देहाः, नित्यस्य, उक्ताः, शरीरिणः, अनाशिनः, अप्रमेयस्य, तस्मात्, युध्यस्व, भारत॥ १८॥

और इस—

अनाशिनः	= नाशरहित,	**नित्यस्य**	= नित्यस्वरूप
अप्रमेयस्य	= अप्रमेय,	**शरीरिणः**	= जीवात्माके

इमे	= ये सब	**तस्मात्**	= इसलिये
देहाः	= शरीर	**भारत**	= हे भरतवंशी अर्जुन! (तू)
अन्तवन्तः	= नाशवान्		
उक्ताः	= कहे गये हैं।	**युध्यस्व**	= युद्ध कर।

[आत्माको मरने या मारनेवाला समझनेवालोंको अज्ञानी बतलाना।]

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥ १९॥

यः, एनम्, वेत्ति, हन्तारम्, यः, च, एनम्, मन्यते, हतम्,
उभौ तौ, न, विजानीतः, न, अयम्, हन्ति, न, हन्यते॥ १९॥

और—

यः	= जो	**उभौ**	= दोनों ही
एनम्	= इस आत्माको	**न**	= नहीं
हन्तारम्	= मारनेवाला	**विजानीतः**	= जानते; (क्योंकि)
वेत्ति	= समझता है		
च	= तथा	**अयम्**	= यह आत्मा (वास्तवमें)
यः	= जो		
एनम्	= इसको	**न**	= न (तो किसीको)
हतम्	= मरा	**हन्ति**	= मारता है (और)
मन्यते	= मानता है,	**न**	= न (किसीके द्वारा)
तौ	= वे	**हन्यते**	= मारा जाता है।

[जन्मादि छः विकारोंसे रहित आत्मस्वरूपका निरूपण।]

न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो-
न हन्यते हन्यमाने शरीरे॥ २०॥

न, जायते, म्रियते, वा, कदाचित्, न, अयम्, भूत्वा, भविता, वा, न, भूयः, अजः, नित्यः, शाश्वतः, अयम्, पुराणः, न, हन्यते, हन्यमाने, शरीरे॥ २० ॥

अयम्	= यह आत्मा	**भविता**	= होनेवाला (ही) है। (क्योंकि)
कदाचित्	= किसी कालमें भी	**अयम्**	= यह
न	= न (तो)	**अजः**	= अजन्मा,
जायते	= जन्मता है	**नित्यः**	= नित्य,
वा	= और	**शाश्वतः**	= सनातन (और)
न	= न	**पुराणः**	= पुरातन (है);
म्रियते	= मरता (ही) है	**शरीरे**	= शरीरके
वा	= तथा	**हन्यमाने**	= मारे जानेपर भी (यह)
न	= न (यह)	**न**	= नहीं
भूत्वा	= उत्पन्न होकर	**हन्यते**	= मारा जाता।
भूयः	= फिर		

[आत्मतत्त्ववित् किसीको भी मारने या मरवानेवाला नहीं होता—यह कथन।]

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २१ ॥

वेद, अविनाशिनम्, नित्यम्, यः, एनम्, अजम्, अव्ययम्, कथम् सः, पुरुषः, पार्थ, कम्, घातयति, हन्ति, कम्॥ २१ ॥

पार्थ	= हे पृथापुत्र अर्जुन!	**अजम्**	= अजन्मा (और)
यः	= जो	**अव्ययम्**	= अव्यय
पुरुषः	= पुरुष	**वेद**	= जानता है,
एनम्	= इस आत्माको	**सः**	= वह (पुरुष)
अविनाशिनम्	= नाशरहित,	**कथम्**	= कैसे
नित्यम्	= नित्य,	**कम्**	= किसको

घातयति	= मरवाता है (और)	**कम्**	= किसको
(कथम्)	= कैसे	**हन्ति**	= मारता है ?

[मनुष्यके कपड़े बदलनेका उदाहरण देते हुए शरीरान्तर-प्राप्तिका तत्त्व समझाना।]

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही॥ २२॥

वासांसि, जीर्णानि, यथा, विहाय, नवानि, गृह्णाति, नरः, अपराणि, तथा, शरीराणि, विहाय, जीर्णानि, अन्यानि, संयाति, नवानि, देही॥ २२॥

और यदि तू कहे कि मैं तो शरीरोंके वियोगका शोक करता हूँ तो यह भी उचित नहीं है; क्योंकि—

यथा	= जैसे	**तथा**	= वैसे ही
नरः	= मनुष्य	**देही**	= जीवात्मा
जीर्णानि	= पुराने	**जीर्णानि**	= पुराने
वासांसि	= वस्त्रोंको	**शरीराणि**	= शरीरोंको
विहाय	= त्यागकर	**विहाय**	= त्यागकर
अपराणि	= दूसरे	**अन्यानि**	= दूसरे
नवानि	= नये (वस्त्रोंको)	**नवानि**	= नये (शरीरोंको)
गृह्णाति	= ग्रहण करता है,	**संयाति**	= प्राप्त होता है।

[आत्मतत्त्वको अच्छेद्य, अदाह्य, अक्लेद्य और अशोष्य तथा नित्य, सर्वगत, स्थाणु, अचल, सनातन, अव्यक्त, अचिन्त्य एवं निर्विकार कहकर उसके लिये शोक करना अनुचित बतलाना।]

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ २३॥

न, एनम्, छिन्दन्ति, शस्त्राणि, न, एनम्, दहति, पावकः,
न, च, एनम्, क्लेदयन्ति, आपः, न, शोषयति, मारुतः ॥ २३ ॥

और हे अर्जुन!—

एनम्	= इस आत्माको	**एनम्**	= इसको
शस्त्राणि	= शस्त्र	**आपः**	= जल
न	= नहीं	**न**	= नहीं
छिन्दन्ति	= काट सकते,	**क्लेदयन्ति**	= गला सकता
एनम्	= इसको	**च**	= और
पावकः	= आग	**मारुतः**	= वायु
न	= नहीं	**न**	= नहीं
दहति	= जला सकती,	**शोषयति**	= सुखा सकता।

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ २४॥

अच्छेद्यः, अयम्, अदाह्यः, अयम्, अक्लेद्यः, अशोष्यः, एव,च,
नित्यः, सर्वगतः, स्थाणुः, अचलः, अयम्, सनातनः ॥ २४ ॥

क्योंकि—

अयम्	= यह आत्मा	**अयम्**	= यह आत्मा
अच्छेद्यः	= अच्छेद्य है;	**नित्यः**	= नित्य
अयम्	= यह आत्मा	**सर्वगतः**	= सर्वव्यापी,
अदाह्यः	= अदाह्य,	**अचलः**	= अचल,
अक्लेद्यः	= अक्लेद्य	**स्थाणुः**	= स्थिर रहनेवाला, (और)
च	= और		
एव	= निःसंदेह		
अशोष्यः	= अशोष्य है (तथा)	**सनातनः**	= सनातन है।

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥ २५॥

अव्यक्तः, अयम्, अचिन्त्यः, अयम्, अविकार्यः, अयम्, उच्यते,
तस्मात्, एवम्, विदित्वा, एनम्, न, अनुशोचितुम्, अर्हसि ॥ २५ ॥

और—

अयम्	= यह आत्मा	**एनम्**	= इस आत्माको
अव्यक्तः	= अव्यक्त है,	**एवम्**	= उपर्युक्त प्रकारसे
अयम्	= यह आत्मा	**विदित्वा**	= जानकर (तू)
अचिन्त्यः	= अचिन्त्य है, (और)	**अनुशोचितुम्**	= शोक करनेके
अयम्	= यह आत्मा	**न, अर्हसि**	= योग्य नहीं है, अर्थात् तुझे, शोक करना उचित नहीं है।
अविकार्यः	= विकाररहित		
उच्यते	= कहा जाता है।		
तस्मात्	= इससे (हे अर्जुन!)		

[आत्माको जन्मने-मरनेवाला माननेपर भी शरीरकी अनित्यताको समझकर शोक करनेका निषेध।]

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि॥ २६॥

अथ, च, एनम्, नित्यजातम्, नित्यम्, वा, मन्यसे, मृतम्, तथापि, त्वम्, महाबाहो, न, एवम्, शोचितुम्, अर्हसि॥ २६॥

अथ	= किंतु	**मृतम्**	= मरनेवाला
च	= यदि	**मन्यसे**	= मानता है,
त्वम्	= तू	**तथापि**	= तो भी
एनम्	= इस आत्माको	**महाबाहो**	= हे महाबाहो! (तू)
नित्यजातम्	= सदा जन्मनेवाला	**एवम्**	= इस प्रकार
वा	= तथा	**शोचितुम्**	= शोक करनेको
नित्यम्	= सदा	**न, अर्हसि**	= योग्य नहीं है।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ २७॥

जातस्य, हि, ध्रुवः, मृत्युः, ध्रुवम्, जन्म, मृतस्य, च, तस्मात्, अपरिहार्ये, अर्थे, न, त्वम्, शोचितुम्, अर्हसि॥ २७॥

हि	= क्योंकि (इस मान्यताके अनुसार)	जन्म	= जन्म
जातस्य	= जन्मे हुएकी	ध्रुवम्	= निश्चित है।
मृत्युः	= मृत्यु	तस्मात्	= इससे (भी इस)
ध्रुवः	= निश्चित है	अपरिहार्ये	= बिना उपायवाले
च	= और	अर्थे	= विषयमें
मृतस्य	= मरे हुएका	त्वम्	= तू
		शोचितुम्	= शोक करनेको
		न, अर्हसि	= योग्य नहीं है।

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना॥ २८॥

अव्यक्तादीनि, भूतानि, व्यक्तमध्यानि, भारत, अव्यक्तनिधनानि, एव, तत्र, का, परिदेवना॥ २८॥

और ये भीष्मादिकोंके शरीर मायामय होनेसे अनित्य हैं, इससे शरीरोंके लिये भी शोक करना उचित नहीं; क्योंकि—

भारत	= हे अर्जुन!	व्यक्तमध्यानि	= बीचमें ही, प्रकट हैं; (फिर)
भूतानि	= सम्पूर्ण प्राणी		
अव्यक्तादीनि	= जन्मसे पहले अप्रकट थे (और)	तत्र	= ऐसी स्थितिमें
अव्यक्त-निधनानि, एव	= मरनेके बाद भी अप्रकट हो जानेवाले हैं, (केवल)	का	= क्या
		परिदेवना	= शोक करना है?

[आत्मतत्त्वके द्रष्टा, वक्ता और श्रोताकी दुर्लभताका प्रतिपादन।]

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित्॥ २९॥

आश्चर्यवत्, पश्यति, कश्चित्, एनम्, आश्चर्यवत्, वदति,
तथा, एव, च, अन्यः, आश्चर्यवत्, च, एनम्, अन्यः,
शृणोति, श्रुत्वा, अपि, एनम्, वेद, न, च, एव, कश्चित्॥ २९ ॥

और हे अर्जुन! यह आत्मतत्त्व बड़ा गहन है, इसलिये—

कश्चित् = कोई एक महापुरुष ही
एनम् = इस आत्माको
आश्चर्यवत् = आश्चर्यकी भाँति
पश्यति = देखता है
च = और
तथा = वैसे
एव = ही
अन्यः = दूसरा कोई महापुरुष ही (इसके तत्त्वका)
आश्चर्यवत् = आश्चर्यकी भाँति
वदति = वर्णन करता है
च = तथा
अन्यः = दूसरा कोई, (अधिकारी पुरुष ही)
एनम् = इसे
आश्चर्यवत् = आश्चर्यकी भाँति
शृणोति = सुनता है
च = और
कश्चित् = कोई-कोई (तो)
श्रुत्वा = सुनकर
अपि = भी
एनम् = इसको
न, एव = नहीं
वेद = जानता।

[आत्मतत्त्व सर्वथा अवध्य होनेके कारण किसी भी प्राणीके लिये शोक करनेका निषेध।]

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥ ३० ॥

देही, नित्यम्, अवध्यः, अयम्, देहे, सर्वस्य, भारत,
तस्मात्, सर्वाणि, भूतानि, न, त्वम्, शोचितुम्, अर्हसि॥ ३० ॥

भारत	= हे अर्जुन!	**तस्मात्**	= इस कारण
अयम्	= यह	**सर्वाणि**	= सम्पूर्ण
देही	= आत्मा	**भूतानि**	= प्राणियोंके लिये
सर्वस्य	= सबके		
देहे	= शरीरोंमें	**त्वम्**	= तू
नित्यम्	= सदा ही	**शोचितुम्**	= शोक करनेको
अवध्यः	= अवध्य है*	**न, अर्हसि**	= योग्य नहीं है।

क्षात्रधर्मकी दृष्टिसे युद्धको अर्जुनका स्वधर्म बतलाकर उसके त्यागको सब प्रकारसे अनुचित सिद्ध करना।

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते॥ ३१॥

स्वधर्मम्, अपि, च, अवेक्ष्य, न, विकम्पितुम्, अर्हसि
धर्म्यात्, हि, युद्धात्, श्रेयः, अन्यत्, क्षत्रियस्य, न, विद्यते॥ ३१॥

च	= तथा	**हि**	= क्योंकि
स्वधर्मम्	= अपने धर्मको	**क्षत्रियस्य**	= क्षत्रियके लिये
अवेक्ष्य	= देखकर	**धर्म्यात्**	= धर्मयुक्त
अपि	= भी (तू)	**युद्धात्**	= युद्धसे (बढ़कर)
विकम्पितुम्	= भय करने-	**अन्यत्**	= दूसरा (कोई)
न, अर्हसि	= योग्य नहीं, है यानी तुझे, भय नहीं करना, चाहिये;	**श्रेयः**	= कल्याणकारी कर्तव्य
		न	= नहीं
		विद्यते	= है।

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्॥ ३२॥

---

* जिसका वध नहीं किया जा सके।

यदृच्छया, च, उपपन्नम्, स्वर्गद्वारम्, अपावृतम्,
सुखिनः, क्षत्रियाः, पार्थ, लभन्ते, युद्धम्, ईदृशम्॥ ३२॥

और—

पार्थ	= हे पार्थ!	**ईदृशम्**	= इस प्रकारके
यदृच्छया	= अपने-आप	**युद्धम्**	= युद्धको
उपपन्नम्	= प्राप्त हुए	**सुखिनः**	= भाग्यवान्
च	= और	**क्षत्रियाः**	= क्षत्रियलोग, (ही)
अपावृतम्	= खुले हुए		
स्वर्गद्वारम्	= स्वर्गके द्वाररूप	**लभन्ते**	= पाते हैं।

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥ ३३॥

अथ, चेत्, त्वम्, इमम्, धर्म्यम्, सङ्ग्रामम्, न, करिष्यसि,
ततः, स्वधर्मम्, कीर्तिम्, च, हित्वा, पापम्, अवाप्स्यसि॥ ३३॥

अथ	= किंतु	**ततः**	= तो
चेत्	= यदि	**स्वधर्मम्**	= स्वधर्म
त्वम्	= तू	**च**	= और
इमम्	= इस	**कीर्तिम्**	= कीर्तिको
धर्म्यम्	= धर्मयुक्त	**हित्वा**	= खोकर
सङ्ग्रामम्	= युद्धको	**पापम्**	= पापको
न	= नहीं		
करिष्यसि	= करेगा	**अवाप्स्यसि**	= प्राप्त होगा।

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते॥ ३४॥

अकीर्तिम्, च, अपि, भूतानि, कथयिष्यन्ति, ते, अव्ययाम्,
सम्भावितस्य, च, अकीर्तिः, मरणात्, अतिरिच्यते॥ ३४॥

च	= तथा	**अव्ययाम्**	= बहुत कालतक रहनेवाली
भूतानि	= सब लोग		
ते	= तेरी	**अकीर्तिम्**	= अपकीर्तिका

अपि = भी
कथयिष्यन्ति = कथन करेंगे
च = और
सम्भावितस्य = माननीय पुरुष-के लिये
अकीर्तिः = अपकीर्ति
मरणात् = मरणसे (भी)
अतिरिच्यते = बढ़कर है।

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्॥ ३५॥

भयात्, रणात्, उपरतम्, मंस्यन्ते, त्वाम्, महारथाः, येषाम्, च, त्वम्, बहुमतः, भूत्वा, यास्यसि, लाघवम्॥ ३५॥

च = और
येषाम् = जिनकी (दृष्टिमें)
त्वम् = तू (पहले)
बहुमतः = बहुत सम्मानित
भूत्वा = होकर (अब)
लाघवम् = लघुताको
यास्यसि = प्राप्त होगा, (वे)
महारथाः = महारथी लोग
त्वाम् = तुझे
भयात् = भयके कारण
रणात् = युद्धसे
उपरतम् = हटा हुआ
मंस्यन्ते = मानेंगे।

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्॥ ३६॥

अवाच्यवादान्, च, बहून्, वदिष्यन्ति, तव, अहिताः, निन्दन्तः, तव, सामर्थ्यम्, ततः, दुःखतरम्, नु, किम्॥ ३६॥

तव = तेरे
अहिताः = वैरी लोग
तव = तेरे
सामर्थ्यम् = सामर्थ्यकी
निन्दन्तः = निन्दा करते हुए (तुझे)
बहून् = बहुत-से
अवाच्यवादान् = न कहनेयोग्य वचन
च = भी
वदिष्यन्ति = कहेंगे;

ततः	= उससे	**नु**	= और
दुःखतरम्	= अधिक दुःख	**किम्**	= क्या होगा ?

[इस लोक और परलोक—दोनोंमें लाभप्रद बतलाकर अर्जुनको युद्धके लिये तैयार होनेकी आज्ञा देना।]

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

हतः, वा, प्राप्स्यसि, स्वर्गम्, जित्वा, वा, भोक्ष्यसे, महीम्, तस्मात्, उत्तिष्ठ, कौन्तेय, युद्धाय, कृतनिश्चयः ॥ ३७ ॥

वा	= या (तो तू युद्धमें)	**भोक्ष्यसे**	= भोगेगा।
हतः	= मारा जाकर	**तस्मात्**	= इस कारण
स्वर्गम्	= स्वर्गको	**कौन्तेय**	= हे अर्जुन! (तू)
प्राप्स्यसि	= प्राप्त होगा	**युद्धाय**	= युद्धके लिये
वा	= अथवा (संग्राममें)	**कृतनिश्चयः**	= निश्चय करके
जित्वा	= जीतकर		
महीम्	= पृथ्वीका राज्य	**उत्तिष्ठ**	= खड़ा हो जा।

[युद्धादि समस्त शास्त्रविहित कर्मोंका भली प्रकार आचरण करते हुए भी पापसे निर्लिप्त रहनेका उपाय—समत्व।]

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

सुखदुःखे, समे, कृत्वा, लाभालाभौ, जयाजयौ, ततः, युद्धाय, युज्यस्व, न, एवम्, पापम्, अवाप्स्यसि ॥ ३८ ॥

यदि तुझे स्वर्ग तथा राज्यकी इच्छा न हो तो भी—

जयाजयौ	= जय-पराजय	**कृत्वा**	= समझकर,
लाभालाभौ	= लाभ-हानि (और)	**ततः**	= उसके बाद
		युद्धाय	= युद्धके लिये
सुखदुःखे	= सुख-दुःखको		
समे	= समान	**युज्यस्व**	= तैयार हो जा,

एवम्	= इस प्रकार (युद्ध करनेसे तू)	**पापम्**	= पापको
		न	= नहीं
		अवाप्स्यसि	= प्राप्त होगा।

[कर्मबन्धनोंको काटनेमें हेतु, कर्मयोगविषयक बुद्धिका वर्णन करनेकी प्रस्तावना।]

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि॥ ३९॥

एषा, ते, अभिहिता, साङ्ख्ये, बुद्धिः, योगे, तु, इमाम्, शृणु, बुद्ध्या, युक्तः, यया, पार्थ, कर्मबन्धम्, प्रहास्यसि॥ ३९॥

पार्थ	= हे पार्थ!	**योगे**	= कर्मयोगके विषयमें
एषा	= यह	**शृणु**	= सुन—
बुद्धिः	= बुद्धि	**यया**	= जिस
ते	= तेरे लिये	**बुद्ध्या**	= बुद्धिसे
साङ्ख्ये	= ज्ञानयोगके, विषयमें *	**युक्तः**	= युक्त हुआ (तू)
		कर्मबन्धम्	= कर्मोंके बन्धनको
अभिहिता	= कही गयी	**प्रहास्यसि**	= भलीभाँति त्याग देगा यानी सर्वथा नष्ट कर डालेगा।
तु	= और (अब तू)		
इमाम्	= इसको		

[कर्मयोगकी महिमाका वर्णन।]

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥ ४०॥

न, इह, अभिक्रमनाशः, अस्ति, प्रत्यवायः, न, विद्यते, स्वल्पम्, अपि, अस्य, धर्मस्य, त्रायते, महतः, भयात्॥ ४०॥

और—

इह	= इस कर्मयोगमें	**न**	= नहीं
अभिक्रमनाशः	= आरम्भका अर्थात् बीजका नाश	**अस्ति**	= है (और)

* अध्याय ३ श्लोक ३ की टिप्पणीमें इसका विस्तार देखना चाहिये।

प्रत्यवायः	= उलटा फलरूप दोष (भी)	**स्वल्पम्**	= थोड़ा-सा
न	= नहीं	**अपि**	= भी (साधन जन्म-मृत्युरूप)
विद्यते	= है, (बल्कि)	**महतः**	= महान्
अस्य	= इस कर्मयोगरूप	**भयात्**	= भयसे
धर्मस्य	= धर्मका	**त्रायते**	= रक्षा कर लेता है।

[निश्चयात्मिका बुद्धिका और अव्यवसायी सकाम पुरुषोंकी बुद्धियोंका भेदनिरूपण।]

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥ ४१॥

व्यवसायात्मिका, बुद्धिः, एका, इह, कुरुनन्दन, बहुशाखाः, हि, अनन्ताः, च, बुद्धयः, अव्यवसायिनाम्॥ ४१॥

और—

कुरुनन्दन	= हे अर्जुन!	**अव्यवसायिनाम्**	= अस्थिर विचारवाले विवेकहीन सकाम मनुष्योंकी
इह	= इस कर्मयोगमें		
व्यवसायात्मिका	= निश्चयात्मिका	**बुद्धयः**	= बुद्धियाँ
बुद्धिः	= बुद्धि	**हि**	= निश्चय ही
		बहुशाखाः	= बहुत भेदोंवाली
एका	= एक ही	**च**	= और
(भवति)	= होती है; (किंतु)	**अनन्ताः**	= अनन्त (होती हैं)।

[स्वर्गपरायण सकाम मनुष्योंके स्वभावका वर्णन।]

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥ ४३॥
भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ ४४॥

याम्, इमाम्, पुष्पिताम्, वाचम्, प्रवदन्ति, अविपश्चितः, वेदवादरताः, पार्थ, न, अन्यत्, अस्ति, इति, वादिनः ॥ ४२ ॥
कामात्मानः, स्वर्गपराः, जन्मकर्मफलप्रदाम्, क्रियाविशेषबहुलाम्, भोगैश्वर्यगतिम्, प्रति ॥ ४३ ॥
भोगैश्वर्यप्रसक्तानाम्, तया, अपहृतचेतसाम्, व्यवसायात्मिका, बुद्धिः, समाधौ, न, विधीयते ॥ ४४ ॥

और—

पार्थ = हे अर्जुन!

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

वीतरागभयक्रोधाः, मन्मयाः, माम्, उपाश्रिताः, बहवः, ज्ञानतपसा, पूताः, मद्भावम्, आगताः ॥ १० ॥

---

* सर्वशक्तिमान् सच्चिदानन्दघन परमात्मा अज, अविनाशी और सर्वभूतोंके परमगति तथा परम आश्रय हैं, वे केवल धर्मको स्थापन करने और संसारका उद्धार करनेके लिये ही अपनी योगमायासे सगुणरूप होकर प्रकट होते हैं, इसलिये परमेश्वरके समान सुहृद्, प्रेमी और पतितपावन दूसरा कोई नहीं है, ऐसा समझकर जो पुरुष परमेश्वरका अनन्य प्रेमसे निरन्तर चिन्तन करता हुआ आसक्तिरहित संसारमें बरतता है, वही उनको तत्त्वसे जानता है।

और हे अर्जुन! पहले भी—

वीतराग-भयक्रोधाः = जिनके राग, भय और क्रोध सर्वथा नष्ट हो गये थे (और)

मन्मयाः = जो मुझमें अनन्य प्रेमपूर्वक स्थित रहते थे, (ऐसे)

माम् = मेरे

उपाश्रिताः = आश्रित रहनेवाले

बहवः = बहुत-से भक्त (उपर्युक्त)

ज्ञानतपसा = ज्ञानरूप तपसे

पूताः = पवित्र होकर

मद्भावम् = मेरे स्वरूपको

आगताः = प्राप्त हो चुके हैं।

[श्रीभगवान्‌का अपना भजन करनेवालेको उसी प्रकार भजनेका कथन।]

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ ११॥

ये, यथा, माम्, प्रपद्यन्ते, तान्, तथा, एव, भजामि, अहम्, मम्, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः॥ ११॥

क्योंकि—

पार्थ = हे अर्जुन!

ये = जो भक्त

माम् = मुझे

यथा = जिस प्रकार

प्रपद्यन्ते = भजते हैं,

अहम् = मैं (भी)

तान् = उनको

तथा, एव = उसी प्रकार

भजामि = भजता हूँ; (क्योंकि)

मनुष्याः = सभी मनुष्य

सर्वशः = सब प्रकारसे

मम = मेरे (ही)

वर्त्म = मार्गका

अनुवर्तन्ते = अनुसरण करते हैं।

[देवताओंकी उपासनाका लौकिक फल शीघ्र प्राप्त होनेका कथन।]

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥ १२॥

काङ्क्षन्तः, कर्मणाम्, सिद्धिम्, यजन्ते, इह, देवताः, क्षिप्रम्, हि, मानुषे, लोके, सिद्धिः, भवति, कर्मजा ॥ १२ ॥

जो मुझे तत्त्वसे नहीं जानते हैं, वे—

इह = इस
मानुषे = मनुष्य-
लोके = लोकमें
कर्मणाम् = कर्मोंके
सिद्धिम् = फलको
काङ्क्षन्तः = चाहनेवाले (लोग)
देवताः = देवताओंका
यजन्ते = पूजन किया करते हैं;
हि = क्योंकि (उनको)
कर्मजा = कर्मोंसे उत्पन्न होनेवाली
सिद्धिः = सिद्धि
क्षिप्रम् = शीघ्र
भवति = मिल जाती है।

[चारों वर्णोंकी रचना करनेमें भगवान्‌के अकर्तापनका कथन।]

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

चातुर्वर्ण्यम्, मया, सृष्टम्, गुणकर्मविभागशः, तस्य, कर्तारम्, अपि, माम्, विद्धि, अकर्तारम्, अव्ययम् ॥ १३ ॥

तथा हे अर्जुन!—

चातुर्वर्ण्यम् = ब्राह्मण, क्षत्रिय, वैश्य और शूद्र इन चार वर्णों- का समूह,
गुणकर्म-विभागशः = गुण और कर्मोंके विभागपूर्वक
मया = मेरे द्वारा
सृष्टम् = रचा गया है। (इस प्रकार)
तस्य = उस (सृष्टिरचनादि- कर्म) -का
कर्तारम् = कर्ता होनेपर
अपि = भी
माम् = मुझ
अव्ययम् = अविनाशी परमेश्वरको (तू वास्तवमें)

अकर्तारम्	= अकर्ता (ही)	**विद्धि**	= जान।

[श्रीभगवान्‌के कर्मोंकी दिव्यता और उनके जाननेका फल।]

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥ १४॥

न, माम्, कर्माणि, लिम्पन्ति, न, मे, कर्मफले, स्पृहा, इति, माम्, यः, अभिजानाति, कर्मभिः, न, सः, बध्यते॥ १४॥

क्योंकि—

कर्मफले	= कर्मोंके फलमें	**यः**	= जो
मे	= मेरी	**माम्**	= मुझे
स्पृहा	= स्पृहा	**अभिजानाति**	= तत्त्वसे जान लेता है,
न	= नहीं है, (इसलिये)		
माम्	= मुझे	**सः**	= वह (भी)
कर्माणि	= कर्म	**कर्मभिः**	= कर्मोंसे
न, लिम्पन्ति	= लिप्त नहीं करते—	**न**	= नहीं
इति	= इस प्रकार	**बध्यते**	= बँधता।

[पूर्वज मुमुक्षुओंकी भाँति निष्काम कर्म करनेके लिये आज्ञा।]

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्॥ १५॥

एवम्, ज्ञात्वा, कृतम्, कर्म, पूर्वैः, अपि, मुमुक्षुभिः, कुरु, कर्म, एव, तस्मात्, त्वम्, पूर्वैः, पूर्वतरम्, कृतम्॥ १५॥

तथा—

पूर्वैः	= पूर्वकालके	**ज्ञात्वा**	= जानकर (ही)
मुमुक्षुभिः	= मुमुक्षुओंने	**कर्म**	= कर्म
अपि	= भी	**कृतम्**	= किये हैं।
एवम्	= इस प्रकार	**तस्मात्**	= इसलिये

त्वम् = तू (भी)
पूर्वैः = पूर्वजोंद्वारा
पूर्वतरम्, कृतम् = सदासे किये जानेवाले
कर्म = कर्मोंको
एव = ही
कुरु = कर

[कर्म और अकर्मको तत्त्वसे जाननेका फल।]

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १६॥

किम्, कर्म, किम्, अकर्म, इति, कवयः, अपि, अत्र, मोहिताः, तत्, ते, कर्म, प्रवक्ष्यामि, यत्, ज्ञात्वा, मोक्ष्यसे, अशुभात्॥ १६॥

परंतु—

कर्म = कर्म
किम् = क्या है? (और)
अकर्म = अकर्म
किम् = क्या है?—
इति = इस प्रकार (इसका)
अत्र = निर्णय करनेमें
कवयः = बुद्धिमान् पुरुष
अपि = भी
मोहिताः = मोहित हो जाते हैं। (इसलिये)
तत् = वह
कर्म = कर्म-तत्त्व (मैं)
ते = तुझे
प्रवक्ष्यामि = भलीभाँति समझाकर कहूँगा,
यत् = जिसे
ज्ञात्वा = जानकर (तू)
अशुभात् = अशुभसे अर्थात् कर्मबन्धनसे
मोक्ष्यसे = मुक्त हो जायगा।

[कर्म, अकर्म और विकर्मके स्वरूपको जाननेके लिये प्रेरणा।]

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥ १७॥

कर्मणः, हि, अपि, बोद्धव्यम्, बोद्धव्यम्, च, विकर्मणः, अकर्मणः, च, बोद्धव्यम्, गहना, कर्मणः, गतिः॥ १७॥

कर्मणः = कर्मका (स्वरूप)
अपि = भी
बोद्धव्यम् = जानना चाहिये
च = और
अकर्मणः = अकर्मका (स्वरूप भी)
बोद्धव्यम् = जानना चाहिये;
च = तथा
विकर्मणः = विकर्मका (स्वरूप भी)
बोद्धव्यम् = जानना चाहिये;
हि = क्योंकि
कर्मणः = कर्मकी
गतिः = गति
गहना = गहन है।

[कर्ममें अकर्म और अकर्ममें कर्मको तत्त्वसे जाननेका फल।]

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥ १८॥

कर्मणि, अकर्म, यः, पश्येत्, अकर्मणि, च, कर्म, यः,
सः, बुद्धिमान्, मनुष्येषु, सः, युक्तः, कृत्स्नकर्मकृत्॥ १८॥

यः = जो मनुष्य
कर्मणि = कर्ममें
अकर्म = अकर्म
पश्येत् = देखता है
च = और
यः = जो
अकर्मणि = अकर्ममें
कर्म = कर्म (देखता है),
सः = वह
मनुष्येषु = मनुष्योंमें
बुद्धिमान् = बुद्धिमान् है (और)
सः = वह
युक्तः = योगी
कृत्स्नकर्मकृत् = समस्त कर्मोंको करनेवाला है।

[कामना और संकल्परहित आचरणवाले ज्ञानीकी प्रशंसा।]

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ १९॥

यस्य, सर्वे, समारम्भाः, कामसङ्कल्पवर्जिताः, ज्ञानाग्निदग्धकर्माणम्, तम्, आहुः, पण्डितम्, बुधाः ॥ १९ ॥

और हे अर्जुन!—

यस्य = जिसके

सर्वे = सम्पूर्ण (शास्त्रसम्मत)

समारम्भाः = कर्म

कामसङ्कल्प-वर्जिताः = बिना कामना और संकल्पके होते हैं (तथा)

ज्ञानाग्निदग्ध-कर्माणम् = जिसके समस्त कर्म ज्ञानरूप अग्निके द्वारा भस्म हो गये हैं,

तम् = उस महापुरुषको

बुधाः = ज्ञानीजन (भी)

पण्डितम् = पण्डित

आहुः = कहते हैं।

[फलासक्तिको त्यागकर कर्म करनेवालेकी प्रशंसा।]

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥ २० ॥

त्यक्त्वा, कर्मफलासङ्गम्, नित्यतृप्तः, निराश्रयः, कर्मणि, अभिप्रवृत्तः, अपि, न, एव, किंचित्, करोति,सः ॥ २० ॥

और जो पुरुष—

कर्मफलासङ्गम् = समस्त कर्मोंमें और उनके फलमें आसक्ति-का (सर्वथा)

त्यक्त्वा = त्याग करके

निराश्रयः = संसारके आश्रयसे रहित हो गया है (और)

नित्यतृप्तः = परमात्मामें नित्य तृप्त है,

सः = वह

कर्मणि = कर्मोंमें

अभिप्रवृत्तः = भलीभाँति बरतता हुआ

अपि = भी (वास्तवमें)

किंचित् = कुछ
एव = भी
न = नहीं
करोति = करता।

[केवल शरीर-सम्बन्धी कर्म करते हुए संन्यासीको पाप न लगनेका कथन।]

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ २१॥

निराशीः, यतचित्तात्मा, त्यक्तसर्वपरिग्रहः, शारीरम्, केवलम्, कर्म, कुर्वन्, न, आप्नोति, किल्बिषम्॥ २१॥

और—

यतचित्तात्मा = जिसका अन्तः-करण और इन्द्रियोंके सहित शरीर जीता हुआ है (और)

त्यक्तसर्वपरिग्रहः = जिसने समस्त भोगोंकी सामग्रीका परित्याग कर दिया है, (ऐसा)

निराशीः = आशारहित पुरुष
केवलम् = केवल
शारीरम् = शरीर-सम्बन्धी
कर्म = कर्म
कुर्वन् = करता हुआ (भी)
किल्बिषम् = पापको
न = नहीं
आप्नोति = प्राप्त होता।

[निष्काम कर्मयोगके साधकके लक्षण और कर्मोंसे न बँधनेका कथन।]

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥ २२॥

यदृच्छालाभसन्तुष्टः, द्वन्द्वातीतः, विमत्सरः, समः, सिद्धौ, असिद्धौ, च, कृत्वा, अपि, न, निबध्यते॥ २२॥

और—

यदृच्छालाभसन्तुष्टः = जो बिना इच्छाके अपने-आप प्राप्त हुए पदार्थमें सदा संतुष्ट रहता है,

विमत्सरः = जिसमें ईर्ष्याका सर्वथा अभाव हो गया है,

द्वन्द्वातीतः = जो हर्ष-शोक आदि द्वन्द्वोंसे सर्वथा अतीत हो गया है—(ऐसा)
सिद्धौ = सिद्धि
च = और
असिद्धौ = असिद्धिमें
समः = सम रहनेवाला कर्मयोगी (कर्म)
कृत्वा = करता हुआ
अपि = भी (उनसे)
न = नहीं
निबध्यते = बँधता।

[यज्ञार्थ कर्म करनेवाले ज्ञानीके सम्पूर्ण कर्म नष्ट हो जानेका कथन।]

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥ २३॥

गतसङ्गस्य, मुक्तस्य, ज्ञानावस्थितचेतसः,
यज्ञाय, आचरतः, कर्म, समग्रम्, प्रविलीयते॥ २३॥

क्योंकि—

गतसङ्गस्य = जिसकी आसक्ति सर्वथा नष्ट हो गयी है,
मुक्तस्य = जो देहाभिमान और ममतासे रहित हो गया है,
ज्ञानावस्थित-चेतसः = जिसका चित्त निरन्तर परमात्मा-के ज्ञानमें स्थित रहता है—(ऐसे केवल)
यज्ञाय = यज्ञसम्पादनके लिये (कर्म)
आचरतः = करनेवाले मनुष्यके
समग्रम् = सम्पूर्ण
कर्म = कर्म
प्रविलीयते = भलीभाँति विलीन हो जाते हैं।

[ब्रह्म-यज्ञका कथन।]

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना॥ २४॥

ब्रह्म, अर्पणम्, ब्रह्म, हविः, ब्रह्माग्नौ, ब्रह्मणा, हुतम्,
ब्रह्म, एव, तेन, गन्तव्यम्, ब्रह्मकर्मसमाधिना ॥ २४ ॥

उन यज्ञके लिये आचरण करनेवाले पुरुषोंमेंसे कोई तो इस भावसे यज्ञ करते हैं कि—

अर्पणम् = (जिस यज्ञमें) अर्पण अर्थात् स्रुवा आदि (भी)
ब्रह्म = ब्रह्म है (और)
हविः = हवन किये जाने योग्य द्रव्य (भी)
ब्रह्म = ब्रह्म है (तथा)
ब्रह्मणा = ब्रह्मरूप कर्ताके द्वारा
ब्रह्माग्नौ = ब्रह्मरूप अग्निमें
हुतम् = आहुति देनारूप क्रिया (भी ब्रह्म है)-
तेन = उस
ब्रह्मकर्म-समाधिना = ब्रह्मकर्ममें स्थित रहनेवाले योगीद्वारा
गन्तव्यम् = प्राप्त किये जानेयोग्य (फल भी)
ब्रह्म = ब्रह्म
एव = ही है।

[देव-यज्ञ और ज्ञान-यज्ञका कथन।]

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

दैवम्, एव, अपरे, यज्ञम्, योगिनः, पर्युपासते,
ब्रह्माग्नौ, अपरे, यज्ञम्, यज्ञेन, एव, उपजुह्वति ॥ २५ ॥

और—

अपरे = दूसरे
योगिनः = योगीजन
दैवम् = देवताओंके पूजनरूप
यज्ञम् = यज्ञका
एव = ही
पर्युपासते = भलीभाँति अनुष्ठान किया करते हैं

और
अपरे = अन्य (योगीजन)
ब्रह्माग्नौ = परब्रह्म परमात्मारूप अग्निमें (अभेददर्शनरूप)
यज्ञेन = यज्ञके द्वारा
एव = ही
यज्ञम् = आत्मरूप यज्ञका
उपजुह्वति = हवन* किया करते हैं।

[इन्द्रियसंयमरूप यज्ञ और विषयहवनरूप यज्ञका कथन।]

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति॥ २६॥

श्रोत्रादीनि, इन्द्रियाणि, अन्ये, संयमाग्निषु, जुह्वति,
शब्दादीन्, विषयान्, अन्ये, इन्द्रियाग्निषु, जुह्वति॥ २६॥

अन्ये = अन्य (योगीजन)
श्रोत्रादीनि = श्रोत्र आदि
इन्द्रियाणि = समस्त इन्द्रियोंको
संयमाग्निषु = संयमरूप अग्नियोंमें
जुह्वति = हवन किया करते हैं (और)
अन्ये = दूसरे (योगीलोग)
शब्दादीन् = शब्दादि
विषयान् = समस्त विषयोंको
इन्द्रियाग्निषु = इन्द्रियरूप अग्नियोंमें
जुह्वति = हवन किया करते हैं।

[अन्तःकरण-संयमरूप यज्ञ।]

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥ २७॥

सर्वाणि, इन्द्रियकर्माणि, प्राणकर्माणि, च, अपरे,
आत्मसंयमयोगाग्नौ, जुह्वति, ज्ञानदीपिते॥ २७॥

---

* परब्रह्म परमात्मामें ज्ञानद्वारा एकीभावसे स्थित होना ही ब्रह्मरूप अग्निमें यज्ञके द्वारा "यज्ञका हवन" करना है।

अपरे = दूसरे (योगीजन)
सर्वाणि, इन्द्रियकर्माणि = इन्द्रियोंकी सम्पूर्ण क्रियाओंको
च = और
प्राणकर्माणि = प्राणोंकी समस्त क्रियाओंको
ज्ञानदीपिते = ज्ञानसे प्रकाशित
आत्मसंयम-योगाग्नौ = आत्मसंयम-योगरूप अग्निमें
जुह्वति = हवन किया करते हैं* ।

[द्रव्ययज्ञ, तपयज्ञ, योगयज्ञ और स्वाध्यायरूप ज्ञानयज्ञका कथन।]

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

द्रव्ययज्ञाः, तपोयज्ञाः, योगयज्ञाः, तथा, अपरे, स्वाध्यायज्ञानयज्ञाः, च, यतयः, संशितव्रताः ॥ २८ ॥

अपरे = कई पुरुष
द्रव्ययज्ञाः = द्रव्य-सम्बन्धी यज्ञ करनेवाले हैं, (कितने ही)
तपोयज्ञाः = तपस्यारूप यज्ञ करनेवाले हैं
तथा = तथा (दूसरे कितने ही)
योगयज्ञाः = योगरूप यज्ञ करनेवाले हैं
च = और (कितने ही)
संशितव्रताः = अहिंसादि तीक्ष्ण व्रतोंसे युक्त
यतयः = यत्नशील पुरुष
स्वाध्यायज्ञानयज्ञाः = स्वाध्यायरूप ज्ञानयज्ञ करनेवाले हैं।

[यज्ञरूपसे चतुर्विध प्राणायामका कथन और सब प्रकारके यज्ञ करनेवालोंकी प्रशंसा।]

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

---

* सच्चिदानन्दघन परमात्माके सिवा अन्य किसीका भी न चिन्तन करना ही उन सबका "हवन करना" है।

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः॥ ३०॥

अपाने, जुह्वति, प्राणम्, प्राणे, अपानम्, तथा, अपरे,
प्राणापानगती, रुद्ध्वा, प्राणायामपरायणाः॥ २९॥

अपरे, नियताहाराः, प्राणान्, प्राणेषु, जुह्वति,
सर्वे, अपि, एते, यज्ञविदः, यज्ञक्षपितकल्मषाः॥ ३०॥

और—

अपरे = दूसरे (कितने ही योगीजन)
अपाने = अपानवायुमें
प्राणम् = प्राणवायुको
जुह्वति = हवन करते हैं।
तथा = वैसे ही (अन्य योगीजन)
प्राणे = प्राणवायुमें
अपानम् = अपानवायुको (हवन करते हैं तथा)
अपरे = अन्य (कितने ही)
नियताहाराः = नियमित आहार* करनेवाले
प्राणायामपरायणाः = प्राणायामपरायण पुरुष
प्राणापानगती = प्राण और अपानकी गतिको
रुद्ध्वा = रोककर
प्राणान् = प्राणोंको
प्राणेषु = प्राणोंमें (ही)
जुह्वति = हवन किया करते हैं।
एते = ये
सर्वे, अपि = सभी (साधक)
यज्ञक्षपित-कल्मषाः = यज्ञोंद्वारा पापोंका नाश कर देनेवाले (और)
यज्ञविदः = यज्ञोंको जाननेवाले हैं।

* गीता अध्याय ६ श्लोक १७ में देखना चाहिये।

[यज्ञ करनेवालोंको सनातन ब्रह्मकी प्राप्तिका कथन और न करनेवालोंकी निन्दा।]

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम॥ ३१॥

यज्ञशिष्टामृतभुजः, यान्ति, ब्रह्म, सनातनम्, न, अयम्, लोकः, अस्ति, अयज्ञस्य, कुतः, अन्यः, कुरुसत्तम॥ ३१॥

और—

कुरुसत्तम = हे कुरुश्रेष्ठ अर्जुन!
यज्ञशिष्टामृतभुजः = यज्ञसे बचे हुए अमृतका अनुभव करनेवाले (योगीजन)
सनातनम् = सनातन
ब्रह्म = परब्रह्म परमात्माको
यान्ति = प्राप्त होते हैं (और)
अयज्ञस्य = यज्ञ न करनेवाले पुरुषके लिये (तो)
अयम् = यह
लोकः = मनुष्यलोक भी (सुखदायक)
न = नहीं
अस्ति = है, (फिर)
अन्यः = परलोक
कुतः = कैसे (सुखदायक हो सकता है)?

[सभी यज्ञ क्रियाद्वारा सम्पादित होनेयोग्य बतलाना।]

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे॥ ३२॥

एवम्, बहुविधाः, यज्ञाः, विततताः, ब्रह्मणः, मुखे, कर्मजान्, विद्धि, तान्, सर्वान्, एवम्, ज्ञात्वा, विमोक्ष्यसे॥ ३२॥

एवम् = इस प्रकार (और भी)
बहुविधाः = बहुत तरहके
यज्ञाः = यज्ञ

ब्रह्मणः	= वेदकी	**विद्धि**	= जान,
मुखे	= वाणीमें		
विततताः	= विस्तारसे कहे गये हैं।	**एवम्**	= इस प्रकार (तत्त्वसे)
तान्	= उन		
सर्वान्	= सबको (तू)		
कर्मजान्	= मन, इन्द्रिय और शरीरकी क्रिया-द्वारा सम्पन्न होनेवाले	**ज्ञात्वा**	= जानकर (उनके अनुष्ठान-द्वारा तू कर्मबन्धनसे सर्वथा)
		विमोक्ष्यसे	= मुक्त हो जायगा।

[द्रव्ययज्ञकी अपेक्षा ज्ञानयज्ञके श्रेष्ठत्वका कथन।]

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥ ३३॥

श्रेयान्, द्रव्यमयात्, यज्ञात्, ज्ञानयज्ञः, परन्तप, सर्वम्, कर्म, अखिलम्, पार्थ, ज्ञाने, परिसमाप्यते॥ ३३॥

और—

परन्तप, पार्थ	= हे परंतप अर्जुन!	**अखिलम्**	= यावन्मात्र
द्रव्यमयात्	= द्रव्यमय	**सर्वम्**	= सम्पूर्ण
यज्ञात्	= यज्ञकी अपेक्षा	**कर्म**	= कर्म
ज्ञानयज्ञः	= ज्ञानयज्ञ	**ज्ञाने**	= ज्ञानमें
श्रेयान्	= अत्यन्त श्रेष्ठ है (तथा)	**परिसमाप्यते**	= समाप्त हो जाते हैं।

[तत्त्वज्ञान-हेतु ज्ञानवानोंकी शरण जानेका कथन।]

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ ३४॥

तत्, विद्धि, प्रणिपातेन, परिप्रश्नेन, सेवया, उपदेक्ष्यन्ति, ते, ज्ञानम्, ज्ञानिनः, तत्त्वदर्शिनः ॥ ३४ ॥

तत् = उस ज्ञानको (तू तत्त्वदर्शी ज्ञानियोंके पास जाकर)

विद्धि = समझ, (उनको)

प्रणिपातेन = भलीभाँति दण्डवत्-प्रणाम करनेसे, (उनकी)

सेवया = सेवा करनेसे और कपट छोड़कर

परिप्रश्नेन = सरलतापूर्वक प्रश्न करनेसे

ते = वे

तत्त्वदर्शिनः = परमात्मतत्त्व-को भली-भाँति जाननेवाले

ज्ञानिनः = ज्ञानी महात्मा (तुझे उस)

ज्ञानम् = तत्त्वज्ञानका

उपदेक्ष्यन्ति = उपदेश करेंगे—

[तत्त्वज्ञानका फल।]

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥ ३५ ॥

यत्, ज्ञात्वा, न, पुनः, मोहम्, एवम्, यास्यसि, पाण्डव, येन, भूतानि, अशेषेण, द्रक्ष्यसि, आत्मनि, अथो, मयि॥ ३५ ॥

कि—

यत् = जिसको

ज्ञात्वा = जानकर

पुनः = फिर (तू)

एवम् = इस प्रकार

मोहम् = मोहको

न = नहीं

यास्यसि = प्राप्त होगा (तथा)

पाण्डव = हे अर्जुन!

येन = जिस ज्ञानके द्वारा (तू)

भूतानि	= सम्पूर्ण भूतोंको	**मयि**	= मुझ सच्चिदानन्दघन परमात्मामें
अशेषेण	= नि:शेष भावसे (पहले)		
आत्मनि	= अपनेमें[1] (और)		
अथो	= पीछे	**द्रक्ष्यसि**	= देखेगा[2] ।

[ज्ञानरूप नौकाद्वारा अतिशय पापीका उद्धार।]

अपि चेदसि पापेभ्य: सर्वेभ्य: पापकृत्तम:।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥ ३६॥

अपि, चेत्, असि, पापेभ्य:, सर्वेभ्य:, पापकृत्तम:,
सर्वम्, ज्ञानप्लवेन, एव, वृजिनम्, सन्तरिष्यसि॥ ३६॥

चेत्	= यदि (तू अन्य)	**ज्ञानप्लवेन**	= ज्ञानरूप नौकाद्वारा
सर्वेभ्य:	= सब	**एव**	= नि:सन्देह
पापेभ्य:	= पापियोंसे	**सर्वम्**	= सम्पूर्ण
अपि	= भी	**वृजिनम्**	= पाप-समुद्रसे
पापकृत्तम:	= अधिक पाप करनेवाला	**सन्तरिष्यसि**	= भलीभाँति तर जायगा।
असि	= है, (तो भी तू)		

[ज्ञानको अग्निकी भाँति कर्मोंको भस्म करनेवाला बतलाना।]

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्नि: सर्वकर्माणि भस्मसात्कुरुते तथा॥ ३७॥

यथा, एधांसि, समिद्ध:, अग्नि:, भस्मसात्, कुरुते, अर्जुन,
ज्ञानाग्नि:, सर्वकर्माणि, भस्मसात्, कुरुते, तथा॥ ३७॥

१- गीता अध्याय ६ श्लोक २९ में देखना चाहिये।

२- गीता अध्याय ६ श्लोक ३० में देखना चाहिये।

क्योंकि—

अर्जुन	= हे अर्जुन!	**कुरुते**	= कर देता है,
यथा	= जैसे	**तथा**	= वैसे ही
समिद्धः	= प्रज्वलित	**ज्ञानाग्निः**	= ज्ञानरूप अग्नि
अग्निः	= अग्नि	**सर्वकर्माणि**	= सम्पूर्ण कर्मोंको
एधांसि	= ईंधनोंको	**भस्मसात्**	= भस्ममय
भस्मसात्	= भस्ममय	**कुरुते**	= कर देता है।

[ज्ञानकी अतिशय पवित्रता और शुद्धान्तःकरण कर्मयोगीको अपने-आप तत्त्वज्ञानकी प्राप्ति।]

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥ ३८॥

न, हि, ज्ञानेन, सदृशम्, पवित्रम्, इह, विद्यते, तत्, स्वयम्, योगसंसिद्धः, कालेन, आत्मनि, विन्दति॥ ३८॥

इसलिये—

इह	= इस संसारमें	**कालेन**	= कितने ही कालसे
ज्ञानेन	= ज्ञानके	**योगसंसिद्धः**	= कर्मयोगके द्वारा शुद्धान्तःकरण हुआ मनुष्य
सदृशम्	= समान		
पवित्रम्	= पवित्र करनेवाला		
हि	= निःसन्देह (कुछ भी)	**स्वयम्**	= अपने-आप (ही)
न	= नहीं		
विद्यते	= है।	**आत्मनि**	= आत्मामें
तत्	= उस ज्ञानको	**विन्दति**	= पा लेता है।

[ज्ञानके पात्रका और ज्ञानसे परम-शान्तिकी प्राप्तिका कथन।]

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ ३९॥

श्रद्धावान्, लभते, ज्ञानम्, तत्परः, संयतेन्द्रियः,
ज्ञानम्, लब्ध्वा, पराम्, शान्तिम्, अचिरेण, अधिगच्छति ॥ ३९ ॥

और हे अर्जुन!—

संयतेन्द्रियः = जितेन्द्रिय,
तत्परः = साधनपरायण (और)
श्रद्धावान् = श्रद्धावान् मनुष्य
ज्ञानम् = ज्ञानको
लभते = प्राप्त होता है (तथा)
ज्ञानम् = ज्ञानको
लब्ध्वा = प्राप्त होकर (वह)
अचिरेण = बिना विलम्बके— तत्काल ही (भगवत्प्राप्तिरूप)
पराम् = परम
शान्तिम् = शान्तिको
अधिगच्छति = प्राप्त हो जाता है।

[अज्ञ और संशयात्मा अश्रद्धालु पुरुषकी निन्दा।]

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

अज्ञः, च, अश्रद्दधानः, च, संशयात्मा, विनश्यति,
न, अयम्, लोकः, अस्ति, न, परः, न, सुखम्, संशयात्मनः ॥ ४० ॥

और हे अर्जुन!—

अज्ञः = विवेकहीन
च = और
अश्रद्दधानः = श्रद्धारहित
संशयात्मा = संशययुक्त मनुष्य
विनश्यति = परमार्थसे अवश्य भ्रष्ट हो जाता है (ऐसे)
संशयात्मनः = संशययुक्त मनुष्यके लिये
न = न
अयम् = यह
लोकः = लोक
अस्ति = है,
न = न
परः = परलोक है
च = और
न = न
सुखम् = सुख (ही है)।

[संशयरहित निष्काम कर्मयोगीकी कर्मबन्धनसे मुक्ति।]

योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय॥ ४१॥

योगसन्न्यस्तकर्माणम्, ज्ञानसञ्छिन्नसंशयम्,
आत्मवन्तम्, न, कर्माणि, निबध्नन्ति, धनञ्जय॥ ४१॥

और—

धनञ्जय = हे धनंजय!

योग-सन्न्यस्त-कर्माणम् = जिसने कर्मयोगकी विधिसे समस्त कर्मोंका परमात्मामें अर्पण कर दिया है (और)

ज्ञानसञ्छिन्न-संशयम् = जिसने विवेकद्वारा समस्त संशयोंका नाश कर दिया है,

(ऐसे)

आत्मवन्तम् = वशमें किये हुए अन्तःकरणवाले पुरुषको

कर्माणि = कर्म

न = नहीं

निबध्नन्ति = बाँधते।

[निष्काम कर्मयोगमें स्थित होकर युद्ध करनेके लिये आज्ञा]

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥ ४२॥

तस्मात्, अज्ञानसम्भूतम्, हृत्स्थम्, ज्ञानासिना, आत्मनः,
छित्त्वा, एनम्, संशयम्, योगम्, आतिष्ठ, उत्तिष्ठ, भारत॥ ४२॥

तस्मात् = इसलिये

भारत = हे भरतवंशी अर्जुन! (तू)

हृत्स्थम् = हृदयमें स्थित

एनम् = इस

अज्ञानसम्भूतम् = अज्ञानजनित

आत्मनः = अपने

संशयम् = संशयका

ज्ञानासिना = विवेकज्ञानरूप तलवारद्वारा

छित्त्वा = छेदन करके

योगम् = समत्वरूप कर्मयोगमें

आतिष्ठ = स्थित हो जा (और युद्धके लिये)

उत्तिष्ठ = खड़ा हो जा।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

ॐ श्रीपरमात्मने नमः

अथ पञ्चमोऽध्यायः

प्रधान-विषय—*१ से ६ तक सांख्ययोग और निष्काम कर्मयोगका निर्णय, (७—१२) सांख्ययोगी और निष्काम कर्मयोगीके लक्षण और उनकी महिमा, (१३—२६) ज्ञानयोगका विषय, (२७—२९) भक्तिसहित ध्यानयोगका वर्णन।*

[सांख्ययोग और कर्मयोगकी श्रेष्ठताके सम्बन्धमें अर्जुनका प्रश्न।]

अर्जुन उवाच

सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्॥ १॥

सन्न्यासम्, कर्मणाम्, कृष्ण, पुनः, योगम्, च, शंससि,
यत्, श्रेयः, एतयोः, एकम्, तत्, मे, ब्रूहि, सुनिश्चितम्॥ १॥

तत्पश्चात् अर्जुन बोले—

कृष्ण	= हे कृष्ण! (आप)	**यत्**	= जो
कर्मणाम्	= कर्मोंके	**एकम्**	= एक
सन्न्यासम्	= संन्यासकी	**मे**	= मेरे लिये
च	= और		
पुनः	= फिर	**सुनिश्चितम्**	= भलीभाँति निश्चित
योगम्	= कर्मयोगकी	**श्रेयः**	= कल्याणकारक साधन (हो),
शंससि	= प्रशंसा करते हैं। (इसलिये)	**तत्**	= उसको
एतयोः	= इन दोनोंमेंसे	**ब्रूहि**	= कहिये।

[कर्मसंन्यासकी अपेक्षा निष्काम-कर्मयोगकी श्रेष्ठताका कथन।]

श्रीभगवानुवाच

सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते॥ २॥

सन्न्यासः, कर्मयोगः, च, निःश्रेयसकरौ, उभौ,
तयोः, तु, कर्मसन्न्यासात्, कर्मयोगः, विशिष्यते॥ २॥

इस प्रकार अर्जुनके पूछनेपर श्रीभगवान् बोले, हे अर्जुन!—

सन्न्यासः	= कर्मसंन्यास[1]	**तु**	= परंतु
च	= और	**तयोः**	= उन दोनोंमें (भी)
कर्मयोगः	= कर्मयोग[2] (ये)	**कर्मसन्न्यासात्**	= कर्मसंन्याससे
उभौ	= दोनों (ही)	**कर्मयोगः**	= कर्मयोग (साधनमें सुगम होनेसे)
निःश्रेयसकरौ	= परम कल्याणके करनेवाले हैं,	**विशिष्यते**	= श्रेष्ठ है।

[कर्मयोगका महत्त्व।]

ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते॥ ३॥

ज्ञेयः, सः, नित्यसन्न्यासी, यः, न, द्वेष्टि, न, काङ्क्षति,
निर्द्वन्द्वः, हि, महाबाहो, सुखम्, बन्धात्, प्रमुच्यते॥ ३॥

इसलिये—

महाबाहो	= हे अर्जुन!	**द्वेष्टि**	= द्वेष करता है (और)
यः	= जो पुरुष	**न**	= न (किसीकी)
न	= न (किसीसे)		

१-अर्थात् मन, इन्द्रियों और शरीरद्वारा होनेवाले सम्पूर्ण कर्मोंमें कर्तापनका त्याग।

२-अर्थात् समत्वबुद्धिसे भगवदर्थ कर्मोंका करना।

काङ्क्षति	= आकांक्षा करता है,	**निर्द्वन्द्वः**	= राग-द्वेषादि द्वन्द्वोंसे रहित (पुरुष)
सः	= वह कर्मयोगी	**सुखम्**	= सुखपूर्वक
नित्यसन्न्यासी	= सदा संन्यासी (ही)	**बन्धात्**	= संसारबन्धनसे
ज्ञेयः	= समझनेयोग्य है;		
हि	= क्योंकि	**प्रमुच्यते**	= मुक्त हो जाता है।

[फलमें सांख्ययोग और निष्काम कर्मयोगकी एकता।]

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥ ४॥

साङ्ख्ययोगौ, पृथक्, बालाः, प्रवदन्ति, न, पण्डिताः,
एकम्, अपि, आस्थितः, सम्यक्, उभयोः, विन्दते, फलम्॥ ४॥

और हे अर्जुन! उपर्युक्त—

साङ्ख्ययोगौ	= संन्यास और कर्मयोगको	**एकम्**	= एकमें
बालाः	= मूर्खलोग	**अपि**	= भी
पृथक्	= पृथक्-पृथक् (फल देनेवाले)	**सम्यक् आस्थितः**	= सम्यक् प्रकारसे स्थित (पुरुष)
प्रवदन्ति	= कहते हैं	**उभयोः**	= दोनोंके
न	= न (कि)	**फलम्**	= फलरूप (परमात्माको)
पण्डिताः	= पण्डितजन		
(हि)	= क्योंकि (दोनोंमेंसे)	**विन्दते**	= प्राप्त होता है।

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति॥ ५॥

यत्, साङ्ख्यैः, प्राप्यते, स्थानम्, तत्, योगैः, अपि, गम्यते,
एकम्, साङ्ख्यम्, च, योगम्, च, यः, पश्यति, सः, पश्यति॥ ५॥

तथा—

साङ्ख्यैः = ज्ञानयोगियोंद्वारा
यत् = जो
स्थानम् = परमधाम
प्राप्यते = प्राप्त किया जाता है,
योगैः = कर्मयोगियोंद्वारा
अपि = भी
तत् = वही
गम्यते = प्राप्त किया जाता है। (इसलिये)

यः = जो पुरुष
साङ्ख्यम् = ज्ञानयोग
च = और
योगम् = कर्मयोगको (फलरूपमें)
एकम् = एक
पश्यति = देखता है;
सः, च = वही (यथार्थ)
पश्यति = देखता है।

[कर्मयोगके बिना सांख्ययोगके साधनमें कठिनताका कथन।]

सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥ ६॥

सन्न्यासः, तु, महाबाहो, दुःखम्, आप्तुम्, अयोगतः, योगयुक्तः, मुनिः, ब्रह्म, नचिरेण, अधिगच्छति॥ ६॥

तु = परंतु
महाबाहो = हे अर्जुन!
अयोगतः = कर्मयोगके बिना
सन्न्यासः = संन्यास अर्थात् मन, इन्द्रिय और शरीरद्वारा होनेवाले सम्पूर्ण कर्मोंमें कर्तापनका त्याग

आप्तुम् = प्राप्त होना
दुःखम् = कठिन है (और)
मुनिः = भगवत्स्वरूपको मनन करनेवाला
योगयुक्तः = कर्मयोगी
ब्रह्म = परब्रह्म परमात्माको
नचिरेण = शीघ्र ही
अधिगच्छति = प्राप्त हो जाता है।

[कर्मयोगीकी निर्लिप्तताका प्रतिपादन।]

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥ ७॥

योगयुक्तः, विशुद्धात्मा, विजितात्मा, जितेन्द्रियः, सर्वभूतात्मभूतात्मा, कुर्वन्, अपि, न, लिप्यते ॥ ७ ॥

तथा—

विजितात्मा = { जिसका मन अपने वशमें है,

जितेन्द्रियः = { जो जितेन्द्रिय (एवम्)

विशुद्धात्मा = { विशुद्ध अन्तः-करणवाला है (और)

सर्वभूतात्म-भूतात्मा = { सम्पूर्ण प्राणियोंका आत्मरूप परमात्मा ही जिसका आत्मा है (ऐसा)

योगयुक्तः = कर्मयोगी (कर्म)

कुर्वन् = करता हुआ

अपि = भी

न, लिप्यते = लिप्त नहीं होता।

[सांख्ययोगीके अकर्तापनका निर्देश।]

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन्॥ ८ ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ ९ ॥

न, एव, किञ्चित्, करोमि, इति, युक्तः, मन्येत, तत्त्ववित्, पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्, प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन्, अपि, इन्द्रियाणि, इन्द्रियार्थेषु, वर्तन्ते, इति, धारयन्॥ ८-९ ॥

और हे अर्जुन!—

तत्त्ववित् = { तत्त्वको जाननेवाला

युक्तः = सांख्ययोगी (तो)

पश्यन् = देखता हुआ,

शृण्वन् = सुनता हुआ,

स्पृशन् = स्पर्श करता हुआ,

जिघ्रन् = सूँघता हुआ,

अश्नन् = भोजन करता हुआ,

गच्छन्	= गमन करता हुआ,	**इन्द्रियाणि**	= सब इन्द्रियाँ
स्वपन्	= सोता हुआ,	**इन्द्रियार्थेषु**	= अपने-अपने अर्थोंमें
श्वसन्	= श्वास लेता हुआ,	**वर्तन्ते**	= बरत रही हैं—
प्रलपन्	= बोलता हुआ,	**इति**	= इस प्रकार
विसृजन्	= त्यागता हुआ,	**धारयन्**	= समझकर
गृह्णन्	= ग्रहण करता हुआ (तथा)	**एव**	= निःसन्देह
		इति	= ऐसा
उन्मिषन्	= आँखोंको खोलता (और)	**मन्येत**	= माने (कि मैं)
		किंचित्	= कुछ भी
निमिषन्	= मूँदता हुआ	**न**	= नहीं
अपि	= भी,	**करोमि**	= करता हूँ।

[भगवदर्पण बुद्धिसे कर्म करनेवालेकी और कर्मप्रधान कर्मयोगीकी प्रशंसा करके कर्मयोगियोंके कर्मोंको आत्मशुद्धिमें हेतु बतलाना।]

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

ब्रह्मणि, आधाय, कर्माणि, सङ्गम्, त्यक्त्वा, करोति, यः,
लिप्यते, न, सः, पापेन, पद्मपत्रम्, इव, अम्भसा ॥ १० ॥

परंतु हे अर्जुन! देहाभिमानियोंद्वारा यह साधन होना कठिन है और निष्काम कर्मयोग सुगम है; क्योंकि—

यः	= जो पुरुष	**करोति**	= करता है,
कर्माणि	= सब कर्मोंको	**सः**	= वह पुरुष
ब्रह्मणि	= परमात्मामें	**अम्भसा**	= जलसे
आधाय	= अर्पण करके (और)	**पद्मपत्रम्**	= कमलके पत्तेकी
		इव	= भाँति
सङ्गम्	= आसक्तिको	**पापेन**	= पापसे
त्यक्त्वा	= त्यागकर (कर्म)	**न, लिप्यते**	= लिप्त नहीं होता।

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥ ११॥

कायेन, मनसा, बुद्ध्या, केवलैः, इन्द्रियैः, अपि, योगिनः, कर्म, कुर्वन्ति, सङ्गम्, त्यक्त्वा, आत्मशुद्धये॥ ११॥

इसलिये—

योगिनः	= कर्मयोगी (ममत्वबुद्धिरहित)	**अपि**	= भी
केवलैः	= केवल	**सङ्गम्**	= आसक्तिको
इन्द्रियैः	= इन्द्रिय,	**त्यक्त्वा**	= त्यागकर
मनसा	= मन,	**आत्मशुद्धये**	= अन्तःकरणकी शुद्धिके लिये
बुद्ध्या	= बुद्धि (और)	**कर्म**	= कर्म
कायेन	= शरीरद्वारा	**कुर्वन्ति**	= करते हैं।

[कर्मफलके त्यागसे शान्ति और कामनासे बन्धन।]

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते॥ १२॥

युक्तः, कर्मफलम्, त्यक्त्वा, शान्तिम्, आप्नोति, नैष्ठिकीम्, अयुक्तः, कामकारेण, फले, सक्तः, निबध्यते॥ १२॥

इसीसे—

युक्तः	= कर्मयोगी	**अयुक्तः**	= सकामपुरुष
कर्मफलम्	= कर्मोंके फलका	**कामकारेण**	= कामनाकी प्रेरणासे
त्यक्त्वा	= त्याग करके		
नैष्ठिकीम्	= भगवत्प्राप्तिरूप		
शान्तिम्	= शान्तिको	**फले**	= फलमें
आप्नोति	= प्राप्त होता है (और)	**सक्तः**	= आसक्त होकर
		निबध्यते	= बँधता है।

[सांख्ययोगीकी स्थितिका कथन।]

सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥ १३॥

सर्वकर्माणि, मनसा, सन्न्यस्य, आस्ते, सुखम्, वशी,
नवद्वारे, पुरे, देही, न, एव, कुर्वन्, न, कारयन्॥ १३॥

और हे अर्जुन!—

वशी = अन्तःकरण जिसके वशमें है, ऐसा सांख्य-योगका आचरण करनेवाला
देही = पुरुष
न = न
कुर्वन् = करता हुआ (और)
न = न
कारयन् = करवाता हुआ
एव = ही
नवद्वारे = नवद्वारोंवाले शरीररूप
पुरे = घरमें
सर्वकर्माणि = सब कर्मोंको
मनसा = मनसे
सन्न्यस्य = त्यागकर
सुखम् = आनन्दपूर्वक (सच्चिदानन्दघन परमात्माके स्वरूपमें)
आस्ते = स्थित रहता है।

[परमात्मामें कर्तापनके अभावका कथन।]

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥ १४॥

न, कर्तृत्वम्, न, कर्माणि, लोकस्य, सृजति, प्रभुः,
न, कर्मफलसंयोगम्, स्वभावः, तु, प्रवर्तते॥ १४॥

और—

प्रभुः = परमेश्वर
लोकस्य = मनुष्योंके
न = न (तो)
कर्तृत्वम् = कर्तापनकी,

न	= न	**सृजति**	= रचना करते हैं,
कर्माणि	= कर्मोंकी (और)	**तु**	= किंतु
न	= न		
कर्मफलसंयोगम्	= कर्मफलके संयोगकी (ही)	**स्वभावः**	= स्वभाव (ही)
		प्रवर्तते	= बरत रहा है।

[परमात्मा किसीके पाप-पुण्यको ग्रहण नहीं करता, इस विषयमें कथन।]

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥ १५॥

न, आदत्ते, कस्यचित्, पापम्, न, च, एव, सुकृतम्, विभुः,
अज्ञानेन, आवृतम्, ज्ञानम्, तेन, मुह्यन्ति, जन्तवः॥ १५॥

और—

विभुः	= सर्वव्यापी परमेश्वर (भी)	**आदत्ते**	= ग्रहण करता है; (किंतु)
न	= न	**अज्ञानेन**	= अज्ञानके द्वारा
कस्यचित्	= किसीके	**ज्ञानम्**	= ज्ञान
पापम्	= पापकर्मको	**आवृतम्**	= ढका हुआ है,
च	= और	**तेन**	= उसीसे
न	= न (किसीके)	**जन्तवः**	= सब अज्ञानी मनुष्य
सुकृतम्	= शुभकर्मको		
एव	= ही	**मुह्यन्ति**	= मोहित हो रहे हैं।

[सूर्यके दृष्टान्तसे ज्ञानकी महिमा।]

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥ १६॥

ज्ञानेन, तु, तत्, अज्ञानम्, येषाम्, नाशितम्, आत्मनः,
तेषाम्, आदित्यवत्, ज्ञानम्, प्रकाशयति, तत्परम्॥ १६॥

तु	= परंतु	**तेषाम्**	= उनका (वह)
येषाम्	= जिनका	**ज्ञानम्**	= ज्ञान
तत्	= वह	**आदित्यवत्**	= सूर्यके सदृश
अज्ञानम्	= अज्ञान	**तत्परम्**	= उस सच्चिदानन्दघन परमात्माको
आत्मनः	= परमात्माके		
ज्ञानेन	= तत्त्वज्ञानद्वारा		
नाशितम्	= नष्ट कर दिया गया है,	**प्रकाशयति**	= प्रकाशित कर देता है*।

[ज्ञानयोगके एकान्त साधनका कथन।]

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

तद्बुद्धयः, तदात्मानः, तन्निष्ठाः, तत्परायणाः, गच्छन्ति, अपुनरावृत्तिम्, ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

और हे अर्जुन!—

तदात्मानः	= जिनका मन तद्रूप हो रहा है,	**तत्परायणाः**	= तत्परायण पुरुष
तद्बुद्धयः	= जिनकी बुद्धि तद्रूप हो रही है (और)	**ज्ञाननिर्धूत-कल्मषाः**	= ज्ञानके द्वारा पापरहित होकर
तन्निष्ठाः	= सच्चिदानन्दघन परमात्मामें ही जिनकी निरन्तर एकीभावसे स्थिति है, (ऐसे)	**अपुनरावृत्तिम्**	= अपुनरावृत्तिको अर्थात् परम गतिको
		गच्छन्ति	= प्राप्त होते हैं।

* अर्थात् परमात्माके स्वरूपको साक्षात् कराता है।

[ज्ञानी महापुरुषोंकी समदृष्टि और स्थितिका तथा उनको परमगति प्राप्त होनेका कथन।]

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥ १८॥

विद्याविनयसम्पन्ने, ब्राह्मणे, गवि, हस्तिनि, शुनि, च, एव, श्वपाके, च, पण्डिताः, समदर्शिनः॥ १८॥

ऐसे वे—

पण्डिताः	= ज्ञानीजन	**हस्तिनि**	= हाथी,
विद्याविनय-सम्पन्ने	= विद्या और विनययुक्त	**शुनि**	= कुत्ते
		च	= और
ब्राह्मणे	= ब्राह्मणमें	**श्वपाके**	= चाण्डालमें (भी)
च	= तथा	**समदर्शिनः**	= समदर्शी [१]
गवि	= गौ,	**एव**	= ही (होते हैं)।

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥ १९॥

इह, एव, तैः, जितः, सर्गः, येषाम्, साम्ये, स्थितम्, मनः, निर्दोषम्, हि, समम्, ब्रह्म, तस्मात्, ब्रह्मणि, ते, स्थिताः॥ १९॥

इसलिये—

येषाम्	= जिनका	**इह**	= इस जीवित अवस्थामें
मनः	= मन	**एव**	= ही
साम्ये	= समभावमें	**सर्गः**	= सम्पूर्ण संसार
स्थितम्	= स्थित है,	**जितः**	= जीत लिया गया है;[२]
तैः	= उनके द्वारा		

१-इसका विस्तार गीता ६। ३२ की टिप्पणीमें देखना चाहिये।

२-अर्थात् वे जीते हुए ही संसारसे मुक्त हैं।

हि	= क्योंकि	**तस्मात्**	= इससे
ब्रह्म	= सच्चिदानन्दघन परमात्मा	**ते**	= वे
निर्दोषम्	= निर्दोष (और)	**ब्रह्मणि**	= सच्चिदानन्दघन परमात्मामें (ही)
समम्	= सम है,	**स्थिताः**	= स्थित हैं।

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः॥ २०॥

न, प्रहृष्येत्, प्रियम्, प्राप्य, न, उद्विजेत्, प्राप्य, च, अप्रियम्, स्थिरबुद्धिः, असम्मूढः, ब्रह्मवित्, ब्रह्मणि, स्थितः॥ २०॥

और जो पुरुष—

प्रियम्	= प्रियको	**स्थिरबुद्धिः**	= स्थिरबुद्धि
प्राप्य	= प्राप्त होकर	**असम्मूढः**	= संशयरहित
न प्रहृष्येत्	= हर्षित नहीं हो	**ब्रह्मवित्**	= ब्रह्मवेत्ता पुरुष
च	= और	**ब्रह्मणि**	= सच्चिदानन्दघन परब्रह्म परमात्मामें (एकीभावसे नित्य)
अप्रियम्	= अप्रियको		
प्राप्य	= प्राप्त होकर		
न, उद्विजेत्	= उद्विग्न न हो, (वह)	**स्थितः**	= स्थित है।

[अक्षय आनन्दकी प्राप्तिका साधन और उसकी प्राप्ति।]

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥ २१॥

बाह्यस्पर्शेषु, असक्तात्मा, विन्दति, आत्मनि, यत्, सुखम्, सः, ब्रह्मयोगयुक्तात्मा, सुखम्, अक्षयम्, अश्नुते॥ २१॥

और—

बाह्यस्पर्शेषु	= बाहरके विषयोंमें		(साधक)
असक्तात्मा	= आसक्तिरहित अन्तःकरणवाला	**आत्मनि**	= आत्मामें (स्थित)

यत् = जो (ध्यानजनित सात्त्विक)
सुखम् = आनन्द है;
(तत्) = उसको
विन्दति = प्राप्त होता है; (तदनन्तर)
सः = वह
ब्रह्मयोगयुक्तात्मा = सच्चिदानन्दघन परब्रह्म परमात्माके ध्यानरूप योगमें अभिन्नभावसे स्थित पुरुष
अक्षयम् = अक्षय
सुखम् = आनन्दका
अश्नुते = अनुभव करता है।

[विषय-भोगोंकी निन्दा।]

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥ २२॥

ये, हि, संस्पर्शजाः, भोगाः, दुःखयोनयः, एव, ते, आद्यन्तवन्तः, कौन्तेय, न, तेषु, रमते, बुधः॥ २२॥

और—

ये = जो (ये) इन्द्रिय तथा
संस्पर्शजाः = विषयोंके संयोगसे उत्पन्न होनेवाले
भोगाः = सब भोग हैं,
ते = वे (यद्यपि विषयी पुरुषोंको सुखरूप भासते हैं तो भी)
हि = निःसन्देह
दुःखयोनयः, एव = दुःखके ही हेतु हैं (और)
आद्यन्तवन्तः = आदि-अन्तवाले अर्थात् अनित्य हैं। (इसलिये)
कौन्तेय = हे अर्जुन!
बुधः = बुद्धिमान् विवेकी पुरुष
तेषु = उनमें
न = नहीं
रमते = रमता।

[काम-क्रोधके वेगको सहन कर सकनेवाले पुरुषको योगी और सुखी बतलाना।]

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥ २३॥

शक्नोति, इह, एव, यः, सोढुम्, प्राक्, शरीरविमोक्षणात्, कामक्रोधोद्भवम्, वेगम्, सः, युक्तः, सः, सुखी, नरः॥ २३॥

यः = जो साधक
इह = इस मनुष्य-शरीरमें,
शरीरविमोक्षणात् = शरीरका नाश होनेसे
प्राक् = पहले-पहले
एव = ही
कामक्रोधोद्भवम् = काम-क्रोधसे उत्पन्न होनेवाले
वेगम् = वेगको
सोढुम् = सहन करनेमें
शक्नोति = समर्थ हो जाता है,
सः = वही
नरः = पुरुष
युक्तः = योगी है (और)
सः = वही
सुखी = सुखी है।

[सांख्ययोगीकी अन्तिम स्थिति और निर्वाणब्रह्मको प्राप्त ज्ञानी महापुरुषोंके लक्षण।]

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥ २४॥

यः, अन्तःसुखः, अन्तरारामः, तथा, अन्तर्ज्योतिः, एव, यः, सः, योगी, ब्रह्मनिर्वाणम्, ब्रह्मभूतः, अधिगच्छति॥ २४॥

यः = जो पुरुष
एव = निश्चय करके
अन्तःसुखः = अन्तरात्मामें ही सुखवाला है,
अन्तरारामः = आत्मामें ही रमण करनेवाला है
तथा = तथा
यः = जो
अन्तर्ज्योतिः = आत्मामें ही ज्ञानवाला है,
सः = वह

ब्रह्मभूतः = सच्चिदानन्दघन परब्रह्म परमात्माके साथ एकीभाव-को प्राप्त

योगी = सांख्ययोगी

ब्रह्मनिर्वाणम् = शान्त ब्रह्मको

अधिगच्छति = प्राप्त होता है।

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥ २५॥

लभन्ते, ब्रह्मनिर्वाणम्, ऋषयः, क्षीणकल्मषाः, छिन्नद्वैधाः, यतात्मानः, सर्वभूतहिते, रताः॥ २५॥

और—

क्षीणकल्मषाः = जिनके सब पाप नष्ट हो गये हैं,

छिन्नद्वैधाः = जिनके सब संशय ज्ञानके द्वारा निवृत्त हो गये हैं,

सर्वभूतहिते = जो सम्पूर्ण प्राणियोंके हितमें

रताः = रत हैं (और)

यतात्मानः = जिनका जीता हुआ मन निश्चलभावसे परमात्मामें स्थित है, (वे)

ऋषयः = ब्रह्मवेत्ता पुरुष

ब्रह्मनिर्वाणम् = शान्त ब्रह्मको

लभन्ते = प्राप्त होते हैं।

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्॥ २६॥

कामक्रोधवियुक्तानाम्, यतीनाम्, यतचेतसाम्, अभितः, ब्रह्मनिर्वाणम्, वर्तते, विदितात्मनाम्॥ २६॥

और—

कामक्रोध-वियुक्तानाम् = काम-क्रोधसे रहित,

यतचेतसाम् = जीते हुए चित्तवाले,

विदितात्मनाम् = परब्रह्म परमात्माका साक्षात्कार किये हुए
यतीनाम् = ज्ञानी पुरुषोंके लिये
अभितः = सब ओरसे
ब्रह्मनिर्वाणम् = शान्त परब्रह्म परमात्मा (ही)
वर्तते = परिपूर्ण हैं।

[फलसहित ध्यानयोगका संक्षिप्त वर्णन।]

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥

स्पर्शान्, कृत्वा, बहिः, बाह्यान्, चक्षुः, च, एव, अन्तरे, भ्रुवोः, प्राणापानौ, समौ, कृत्वा, नासाभ्यन्तरचारिणौ ॥ २७ ॥
यतेन्द्रियमनोबुद्धिः, मुनिः, मोक्षपरायणः, विगतेच्छाभयक्रोधः, यः, सदा, मुक्तः, एव, सः ॥ २८ ॥

और हे अर्जुन!—

बाह्यान् = बाहरके
स्पर्शान् = विषयभोगोंको (न चिन्तन करता हुआ)
बहिः = बाहर
एव = ही
कृत्वा = निकालकर
च = और
चक्षुः = नेत्रोंकी दृष्टिको
भ्रुवोः = भृकुटीके
अन्तरे = बीचमें (स्थित करके तथा)
नासाभ्यन्तरचारिणौ = नासिकामें विचरनेवाले
प्राणापानौ = प्राण और अपानवायुको
समौ = सम
कृत्वा = करके

यतेन्द्रिय-मनोबुद्धिः = जिसकी इन्द्रियाँ, मन और बुद्धि जीती हुई हैं, (ऐसा)
यः = जो
मोक्षपरायणः = मोक्षपरायण
मुनिः = मुनि*
विगतेच्छा-भयक्रोधः = इच्छा, भय और क्रोधसे रहित हो गया है,
सः = वह
सदा = सदा
मुक्तः = मुक्त
एव = ही है।

[प्रभावसहित परमेश्वरको जाननेसे शान्तिकी प्राप्ति।]

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ २९॥

भोक्तारम्, यज्ञतपसाम्, सर्वलोकमहेश्वरम्, सुहृदम्, सर्वभूतानाम्, ज्ञात्वा, माम्, शान्तिम्, ऋच्छति॥ २९॥

और हे अर्जुन! मेरा भक्त—

माम् = मुझको
यज्ञतपसाम् = सब यज्ञ और तपोंका
भोक्तारम् = भोगनेवाला,
सर्वलोकमहेश्वरम् = सम्पूर्ण लोकोंके ईश्वरोंका भी ईश्वर (तथा)
सर्वभूतानाम् = सम्पूर्ण भूतप्राणियोंका
सुहृदम् = सुहृद् अर्थात् स्वार्थरहित दयालु और प्रेमी, (ऐसा)
ज्ञात्वा = तत्त्वसे जानकर
शान्तिम् = शान्तिको
ऋच्छति = प्राप्त होता है।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः॥ ५॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

* परमेश्वरके स्वरूपका निरन्तर मनन करनेवाला।

ॐ श्रीपरमात्मने नमः

अथ षष्ठोऽध्यायः

प्रधान-विषय—१ से ४ तक निष्काम कर्मयोगका विषय और योगारूढ़ पुरुषके लक्षण, (५—१०) आत्मोद्धारके लिये प्रेरणा और भगवत्प्राप्तिवाले पुरुषके लक्षण, (११—३२) विस्तारसे ध्यानयोगका विषय, (३३—३६) मनके निग्रहका विषय, (३७—४७) योगभ्रष्ट पुरुषकी गतिका विषय और ध्यानयोगीकी महिमा।

[निष्काम कर्मयोगीकी प्रशंसा।]

श्रीभगवानुवाच

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥ १॥

अनाश्रितः, कर्मफलम्, कार्यम्, कर्म, करोति, यः, सः, सन्न्यासी, च, योगी, च, न, निरग्निः, न, च, अक्रियः॥ १॥

उसके पश्चात् श्रीभगवान् बोले, हे अर्जुन!—

यः	= जो पुरुष	**च**	= और (केवल)
कर्मफलम्	= कर्मफलका	**निरग्निः**	= अग्निका त्याग करनेवाला (संन्यासी)
अनाश्रितः	= आश्रय न लेकर		
कार्यम्	= करनेयोग्य	**न**	= नहीं है
कर्म	= कर्म	**च**	= तथा (केवल)
करोति	= करता है,	**अक्रियः**	= क्रियाओंका त्याग करनेवाला (योगी)
सः	= वह		
सन्न्यासी	= संन्यासी	**न**	= नहीं है।
च	= तथा		
योगी	= योगी है;		

[संन्यास और कर्मयोगकी एकताका प्रतिपादन।]

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन॥ २॥

यम्, सन्न्यासम्, इति, प्राहुः, योगम्, तम्, विद्धि,पाण्डव,
न, हि, असन्न्यस्तसंकल्पः, योगी, भवति, कश्चन॥ २॥

इसलिये—

पाण्डव	= हे अर्जुन!	**हि**	= क्योंकि
यम्	= जिसको	**असन्न्यस्त-सङ्कल्पः**	= संकल्पोंका त्याग न करनेवाला
सन्न्यासम्	= संन्यास[1]		
इति	= ऐसा		
प्राहुः	= कहते हैं,	**कश्चन**	= कोई भी पुरुष
तम्	= उसीको (तू)	**योगी**	= योगी
योगम्	= योग[2]	**न**	= नहीं
विद्धि	= जान।	**भवति**	= होता।

[कर्मयोगके साधनका वर्णन।]

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते॥ ३॥

आरुरुक्षोः, मुनेः, योगम्, कर्म, कारणम्, उच्यते,
योगारूढस्य, तस्य, एव, शमः, कारणम्, उच्यते॥ ३॥

और—

योगम्	= योगमें	**मुनेः**	= मननशील पुरुषके लिये (योगकी प्राप्तिमें)
आरुरुक्षोः	= आरूढ़ होनेकी इच्छावाले		

१-२-गीता अध्याय ३ श्लोक ३ की टिप्पणीमें इसका खुलासा अर्थ लिखा है।

कर्म	= निष्कामभावसे कर्म करना ही	**योगारूढस्य**	= योगारूढ़ पुरुषका
कारणम्	= हेतु	**शमः**	= जो सर्वसंकल्पों-का अभाव है,
उच्यते	= कहा जाता है (और योगारूढ़ हो जानेपर)	**(सः), एव**	= वही (कल्याणमें)
तस्य	= उस	**कारणम्**	= हेतु
		उच्यते	= कहा जाता है।

[योगारूढ़ पुरुषके लक्षण।]

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते॥ ४॥

यदा, हि, न, इन्द्रियार्थेषु, न, कर्मसु, अनुषज्जते, सर्वसङ्कल्पसन्न्यासी, योगारूढः, तदा, उच्यते॥ ४॥

यदा	= जिस कालमें	**अनुषज्जते**	= आसक्त होता है,
न	= न (तो)	**तदा**	= उस कालमें
इन्द्रियार्थेषु	= इन्द्रियोंके भोगोंमें (और)	**सर्वसङ्कल्प-सन्न्यासी**	= सर्वसंकल्पोंका त्यागी पुरुष
न	= न	**योगारूढः**	= योगारूढ़
कर्मसु	= कर्मोंमें	**उच्यते**	= कहा जाता है।
हि	= ही		

[मनुष्यको योगारूढ़ावस्था प्राप्त करनेके लिये उत्साहित करना और कर्तव्यनिरूपण।]

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥ ५॥

उद्धरेत्, आत्मना, आत्मानम्, न, आत्मानम्, अवसादयेत्, आत्मा, एव, हि, आत्मनः, बन्धुः, आत्मा, एव, रिपुः, आत्मनः॥ ५॥

और यह योगारूढ़ता कल्याणमें हेतु कही है, इसलिये मनुष्यको चाहिये कि—

आत्मना	= अपने द्वारा	**आत्मा**	= आप
आत्मानम्	= अपना (संसार-समुद्रसे)	**एव**	= ही तो
		आत्मनः	= अपना
उद्धरेत्	= उद्धार करे (और)		
आत्मानम्	= अपनेको (अधोगतिमें)	**बन्धुः**	= मित्र है (और)
		आत्मा	= आप
न	= न		
अवसादयेत्	= डाले;	**एव**	= ही
हि	= क्योंकि (यह मनुष्य)	**आत्मनः**	= अपना
		रिपुः	= शत्रु है।

[आप ही अपना मित्र है और आप ही अपना शत्रु है, इस पूर्वोक्त रहस्यका प्रतिपादन।]

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥ ६ ॥

बन्धुः, आत्मा, आत्मनः, तस्य, येन, आत्मा, एव, आत्मना, जितः, अनात्मनः, तु, शत्रुत्वे, वर्तेत, आत्मा, एव, शत्रुवत्॥ ६ ॥

येन	= जिस	**एव**	= ही
आत्मना	= जीवात्माद्वारा	**बन्धुः**	= मित्र है;
आत्मा	= मनऔर इन्द्रियों-सहित शरीर	**तु**	= और
		अनात्मनः	= जिसके द्वारा मन तथा इन्द्रियों-सहित शरीर नहीं जीता गया है, उसके लिये (वह)
जितः	= जीता हुआ है,		
तस्य	= उस		
आत्मनः	= जीवात्माका (तो वह)		
आत्मा	= आप	**आत्मा**	= आप

एव	= ही	**शत्रुत्वे**	= शत्रुतामें
शत्रुवत्	= शत्रुके सदृश	**वर्तेत**	= बरतता है।

[शरीर, मन, इन्द्रियादिको जीतनेका फल।]

जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥ ७॥

जितात्मनः, प्रशान्तस्य, परमात्मा, समाहितः,
शीतोष्णसुखदुःखेषु, तथा, मानापमानयोः॥ ७॥

और हे अर्जुन!—

शीतोष्ण-सुखदुःखेषु	= सरदी-गरमी और सुख-दुःखादिमें	**जितात्मनः**	= स्वाधीन आत्मावाले पुरुषके (ज्ञानमें)
तथा	= तथा	**परमात्मा**	= सच्चिदानन्दघन परमात्मा
मानापमानयोः	= मान और अपमानमें	**समाहितः**	= सम्यक् प्रकारसे स्थित हैं अर्थात् उसके ज्ञानमें परमात्माके सिवा अन्य कुछ है ही नहीं।
प्रशान्तस्य	= जिसके अन्तः-करणकी वृत्तियाँ भलीभाँति शान्त हैं, (ऐसे)		

[परमात्माको प्राप्त हुए पुरुषोंके लक्षण और महत्त्वका वर्णन।]

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥ ८॥

ज्ञानविज्ञानतृप्तात्मा, कूटस्थः, विजितेन्द्रियः,
युक्तः, इति, उच्यते, योगी, समलोष्टाश्मकाञ्चनः॥ ८॥

और—

ज्ञानविज्ञान-तृप्तात्मा = जिसका अन्तः-करण ज्ञान-विज्ञानसे तृप्त है,

कूटस्थः = जिसकी स्थिति विकाररहित है,

विजितेन्द्रियः = जिसकी इन्द्रियाँ भलीभाँति जीती हुई हैं (और)

समलोष्टाश्म-काञ्चनः = जिसके लिये मिट्टी, पत्थर और सुवर्ण समान हैं, (वह)

योगी = योगी

युक्तः = युक्त अर्थात् भगवत्प्राप्त है,

इति = ऐसे

उच्यते = कहा जाता है।

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु,
साधुषु, अपि, च, पापेषु, समबुद्धिः, विशिष्यते ॥ ९ ॥

सुहृन्मित्रार्युदासीन-मध्यस्थ-द्वेष्यबन्धुषु = सुहृद्[१] मित्र, वैरी, उदासीन[२], मध्यस्थ[३], द्वेष्य और बन्धुगणोंमें,

साधुषु = धर्मात्माओंमें

च = और

पापेषु = पापियोंमें

अपि = भी

समबुद्धिः = समान भाव रखनेवाला

विशिष्यते = अत्यन्त श्रेष्ठ है।

१–स्वार्थरहित सबका हित करनेवाला।

२–पक्षपातरहित।

३–दोनों ओरकी भलाई चाहनेवाला।

[ध्यानयोगका साधन करनेके लिये प्रेरणा।]

योगी युञ्जीत सततमात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥ १०॥

योगी, युञ्जीत, सततम्, आत्मानम्, रहसि, स्थितः,
एकाकी, यतचित्तात्मा, निराशीः, अपरिग्रहः॥ १०॥

इसलिये उचित है कि—

यतचित्तात्मा = मन और इन्द्रियोंसहित शरीरको वशमें रखनेवाला,
निराशीः = आशारहित (और)
अपरिग्रहः = संग्रहरहित
योगी = योगी
एकाकी = अकेला ही
रहसि = एकान्त स्थानमें
स्थितः = स्थित होकर
आत्मानम् = आत्माको
सततम् = निरन्तर (परमात्मामें)
युञ्जीत = लगावे।

[ध्यानयोगके लिये आसन-स्थापनकी विधि।]

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥ ११॥

शुचौ, देशे, प्रतिष्ठाप्य, स्थिरम्, आसनम्, आत्मनः,
न, अत्युच्छ्रितम्, न, अतिनीचम्, चैलाजिनकुशोत्तरम्॥ ११॥

कैसे कि—

शुचौ = शुद्ध
देशे = भूमिमें, (जिसके ऊपर क्रमशः)
चैलाजिन-कुशोत्तरम् = कुशा, मृगछाला और वस्त्र बिछे हैं, (जो)
न = न
अत्युच्छ्रितम् = बहुत ऊँचा है (और)
न = न
अतिनीचम् = बहुत नीचा, (ऐसे)

आत्मनः	= अपने	**स्थिरम्**	= स्थिर
आसनम्	= आसनको	**प्रतिष्ठाप्य**	= स्थापन करके—

[आसनपर बैठकर योगका साधन करनेके लिये कथन।]

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥ १२॥

तत्र, एकाग्रम्, मनः, कृत्वा, यतचित्तेन्द्रियक्रियः, उपविश्य, आसने, युञ्ज्यात्, योगम्, आत्मविशुद्धये॥ १२॥

और—

तत्र	= उस	**मनः**	= मनको
आसने	= आसनपर	**एकाग्रम्**	= एकाग्र
उपविश्य	= बैठकर	**कृत्वा**	= करके
यतचित्तेन्द्रियक्रियः	= चित्त और इन्द्रियोंकी क्रियाओंको वशमें रखते हुए	**आत्मविशुद्धये**	= अन्तःकरणकी शुद्धिके लिये
		योगम्	= योगका
		युञ्ज्यात्	= अभ्यास करे।

[ध्यानयोगकी विधि।]

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ १३॥

सममम्, कायशिरोग्रीवम्, धारयन्, अचलम्, स्थिरः, सम्प्रेक्ष्य, नासिकाग्रम्, स्वम्, दिशः, च, अनवलोकयन्॥ १३॥

उसकी विधि इस प्रकार है कि—

कायशिरोग्रीवम्	= काया, सिर और गलेको	**धारयन्**	= धारण करके
		च	= और
समम्	= समान (एवम्)	**स्थिरः**	= स्थिर होकर,
अचलम्	= अचल	**स्वम्**	= अपनी

नासिकाग्रम् = नासिकाके अग्रभागपर
सम्प्रेक्ष्य = दृष्टि जमाकर, (अन्य)
दिशः = दिशाओंको
अनवलोकयन् = न देखता हुआ—

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥ १४॥

प्रशान्तात्मा, विगतभीः, ब्रह्मचारिव्रते, स्थितः, मनः, संयम्य, मच्चित्तः, युक्तः, आसीत, मत्परः॥ १४॥

ब्रह्मचारिव्रते = ब्रह्मचारीके व्रतमें
स्थितः = स्थित
विगतभीः = भयरहित (तथा)
प्रशान्तात्मा = भलीभाँति शान्त अन्तःकरणवाला
युक्तः = सावधान योगी
मनः = मनको
संयम्य = रोककर
मच्चित्तः = मुझमें चित्तवाला (और)
मत्परः = मेरे परायण होकर
आसीत = स्थित होवे।

[ध्यानयोगका फल।]

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥ १५॥

युञ्जन्, एवम्, सदा, आत्मानम्, योगी, नियतमानसः, शान्तिम्, निर्वाणपरमाम्, मत्संस्थाम्, अधिगच्छति॥ १५॥

नियतमानसः = वशमें किये हुए मनवाला
योगी = योगी
एवम् = इस प्रकार
आत्मानम् = आत्माको
सदा = निरन्तर (मुझ परमेश्वरके स्वरूपमें)
युञ्जन् = लगाता हुआ
मत्संस्थाम् = मुझमें रहनेवाली

निर्वाणपरमाम्= {परमानन्दकी / पराकाष्ठारूप | **शान्तिम्** = शान्तिको | **अधिगच्छति** = प्राप्त होता है।

[ध्यानयोगके लिये उपयुक्त आहार-विहार तथा शयनादि नियम और उनके फलका प्रतिपादन।]

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन॥ १६॥

न, अति, अश्नतः, तु, योगः, अस्ति, न, च, एकान्तम्, अनश्नतः,
न, च, अति, स्वप्नशीलस्य, जाग्रतः, न, एव, च, अर्जुन॥ १६॥

परंतु—

अर्जुन = हे अर्जुन! (यह) | **च** = तथा
योगः = योग | **न** = न
न = न | **अति** = बहुत
तु = तो | **स्वप्नशीलस्य** = {शयन करनेके / स्वभाववालेका
अति = बहुत | **च** = और
अश्नतः = खानेवालेका | **न** = न (सदा)
च = और | **जाग्रतः** = जागनेवालेका
न = न | **एव** = ही
एकान्तम् = बिलकुल | **अस्ति** = सिद्ध होता है।
अनश्नतः = न खानेवालेका

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ १७॥

युक्ताहारविहारस्य, युक्तचेष्टस्य, कर्मसु,
युक्तस्वप्नावबोधस्य, योगः, भवति, दुःखहा॥ १७॥

यह—

दुःखहा = {दुःखोंका नाश करनेवाला | **योगः** = योग (तो)

युक्ताहार-विहारस्य	= यथायोग्य आहार-विहार करनेवालेका,		(और)
कर्मसु	= कर्मोंमें	**युक्तस्वप्नाव-बोधस्य**	= यथायोग्य सोने तथा जागने-वालेका (ही सिद्ध)
युक्तचेष्टस्य	= यथायोग्य चेष्टा करनेवालेका	**भवति**	= होता है।

[ध्यानयोगके अन्तिम स्थितिको प्राप्त हुए पुरुषोंके लक्षण।]

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥ १८॥

यदा, विनियतम्, चित्तम्, आत्मनि, एव, अवतिष्ठते,
निःस्पृहः, सर्वकामेभ्यः, युक्तः, इति, उच्यते, तदा॥ १८॥

इस प्रकार योगके अभ्याससे—

विनियतम्	= अत्यन्त वशमें किया हुआ	**तदा**	= उस कालमें
चित्तम्	= चित्त	**सर्वकामेभ्यः**	= सम्पूर्ण भोगोंसे
यदा	= जिस कालमें	**निःस्पृहः**	= स्पृहारहित पुरुष
आत्मनि	= परमात्मामें		
एव	= ही	**युक्तः**	= योगयुक्त है,
अवतिष्ठते	= भलीभाँति स्थित हो जाता है,	**इति**	= ऐसा
		उच्यते	= कहा जाता है।

[दीपके दृष्टान्तसे योगीके चित्तकी स्थितिका वर्णन।]

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥ १९॥

यथा, दीपः, निवातस्थः, न, इङ्गते, सा, उपमा, स्मृता,
योगिनः, यतचित्तस्य, युञ्जतः, योगम्, आत्मनः॥ १९॥

यथा	= जिस प्रकार	**उपमा**	= उपमा
निवातस्थः	= वायुरहित स्थानमें स्थित	**आत्मनः**	= परमात्माके
		योगम्	= ध्यानमें
दीपः	= दीपक	**युञ्जतः**	= लगे हुए
न, इङ्गते	= चलायमान नहीं होता,	**योगिनः**	= योगीके
		यतचित्तस्य	= जीते हुए चित्तकी
सा	= वैसी ही	**स्मृता**	= कही गयी है।

[ध्यानयोगके द्वारा परमात्माको प्राप्त हुए पुरुषके लक्षण।]

यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥ २०॥

यत्र, उपरमते, चित्तम्, निरुद्धम्, योगसेवया,
यत्र, च, एव, आत्मना, आत्मानम्, पश्यन्, आत्मनि, तुष्यति॥ २०॥

और हे अर्जुन!—

योगसेवया	= योगके अभ्याससे	**आत्मना**	= सूक्ष्म बुद्धिद्वारा
निरुद्धम्	= निरुद्ध	**आत्मानम्**	= परमात्माको
चित्तम्	= चित्त		
यत्र	= जिस अवस्थामें	**पश्यन्**	= साक्षात् करता हुआ
उपरमते	= उपराम हो जाता है		
च	= और	**आत्मनि**	= सच्चिदानन्दघन परमात्मामें
यत्र	= जिस अवस्थामें (परमात्माके ध्यानसे शुद्ध हुई)	**एव**	= ही
		तुष्यति	= संतुष्ट रहता है—

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥ २१॥

सुखम्, आत्यन्तिकम्, यत्, तत्, बुद्धिग्राह्यम्, अतीन्द्रियम्, वेत्ति, यत्र, न, च, एव, अयम्, स्थितः, चलति, तत्त्वतः ॥ २१ ॥

तथा—

अतीन्द्रियम् = इन्द्रियोंसे अतीत
बुद्धिग्राह्यम् = केवल शुद्ध हुई सूक्ष्म बुद्धिद्वारा ग्रहण करनेयोग्य
यत् = जो
आत्यन्तिकम् = अनन्त
सुखम् = आनन्द है;
तत् = उसको
यत्र = जिस अवस्थामें
वेत्ति = अनुभव करता है
च = और
(यत्र) = जिस अवस्थामें
स्थितः = स्थित
अयम् = यह (योगी)
तत्त्वतः = परमात्माके स्वरूपसे
एकया = एकके द्वारा (गया हुआ[1])
अनावृत्तिम् = जिससे वापस नहीं लौटना पड़ता, उस परमगतिको
याति = प्राप्त होता है (और)
अन्यया = दूसरेके द्वारा (गया हुआ[2])
पुनः = फिर
आवर्तते = वापस आता है अर्थात् जन्म-मृत्युको प्राप्त होता है।

१-अर्थात् इसी अध्यायके श्लोक २४ के अनुसार अर्चिमार्गसे गया हुआ योगी।
२-अर्थात् इसी अध्यायके श्लोक २५ के अनुसार धूममार्गसे गया हुआ सकाम कर्मी।

[दोनों गतियोंको जाननेवाले योगीकी प्रशंसा एवं अर्जुनको योगी बननेके लिये आज्ञा।]

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन॥ २७॥

न, एते, सृती, पार्थ, जानन्, योगी, मुह्यति, कश्चन, तस्मात्, सर्वेषु, कालेषु, योगयुक्तः, भव, अर्जुन॥ २७॥

और—

पार्थ = हे पार्थ! (इस प्रकार)
एते = इन दोनों
सृती = मार्गोंको
जानन् = तत्त्वसे जानकर
कश्चन = कोई भी
योगी = योगी
न, मुह्यति = मोहित नहीं होता*
तस्मात् = इस कारण
अर्जुन = हे अर्जुन! (तू)
सर्वेषु = सब
कालेषु = कालमें
योगयुक्तः = समबुद्धिरूप योगसे युक्त
भव = हो अर्थात् निरन्तर मेरी प्राप्तिके लिये साधन करनेवाला हो।

[अध्यायमें वर्णित तत्त्वको जाननेका फल।]

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम्॥ २८॥

वेदेषु, यज्ञेषु, तपःसु, च, एव, दानेषु, यत्, पुण्यफलम्, प्रदिष्टम्, अत्येति, तत्, सर्वम्, इदम्, विदित्वा, योगी, परम्, स्थानम्, उपैति, च, आद्यम्॥ २८॥

* अर्थात् फिर वह निष्कामभावसे ही साधन करता है, कामनाओंमें नहीं फँसता।

क्योंकि—

योगी	=	योगी पुरुष	**प्रदिष्टम्**	=	कहा है,
इदम्	=	इस रहस्यको	**तत्**	=	उस
विदित्वा	=	तत्त्वसे जानकर	**सर्वम्**	=	सबको
वेदेषु	=	वेदोंके पढ़नेंमें	**एव**	=	निःसन्देह
च	=	तथा	**अत्येति**	=	उल्लंघन कर जाता है
यज्ञेषु	=	यज्ञ,			
तपःसु	=	तप (और)	**च**	=	और
दानेषु	=	दानादिके करनेमें	**आद्यम्**	=	सनातन
यत्	=	जो	**परम्, स्थानम्**	=	परमपदको
पुण्यफलम्	=	पुण्यफल	**उपैति**	=	प्राप्त होता है।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः॥ ८॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

ॐ श्रीपरमात्मने नमः

अथ नवमोऽध्यायः

प्रधान-विषय—१ से ६ तक प्रभावसहित ज्ञानका विषय, (७—१०) जगत्‌की उत्पत्तिका विषय, (११—१५) भगवान्‌का तिरस्कार करनेवाले आसुरी प्रकृतिवालोंकी निन्दा और दैवी प्रकृतिवालोंके भगवद्भजनका प्रकार, (१६—१९) सर्वात्मरूपसे प्रभावसहित भगवान्‌के स्वरूपका वर्णन, (२०—२५) सकाम और निष्काम उपासनाका फल, (२६—३४) निष्काम भगवद्भक्तिकी महिमा।

[विज्ञानसहित ज्ञानके कथनकी प्रतिज्ञा।]

श्रीभगवानुवाच

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १॥

इदम्, तु, ते, गुह्यतमम्, प्रवक्ष्यामि, अनसूयवे,
ज्ञानम्, विज्ञानसहितम्, यत्, ज्ञात्वा, मोक्ष्यसे, अशुभात्॥ १॥

उसके पश्चात् श्रीकृष्णभगवान् बोले, हे अर्जुन!—

ते	= तुझ	**प्रवक्ष्यामि**	= भलीभाँति कहूँगा
अनसूयवे	= दोष-दृष्टिरहित भक्तके लिये	**तु**	= कि
इदम्	= इस	**यत्**	= जिसको
गुह्यतमम्	= परम गोपनीय	**ज्ञात्वा**	= जानकर (तू)
विज्ञानसहितम्	= विज्ञानसहित	**अशुभात्**	= दुःखरूप संसारसे
ज्ञानम्	= ज्ञानको (पुनः)	**मोक्ष्यसे**	= मुक्त हो जायगा।

[विज्ञानसहित ज्ञानकी महिमा।]

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥ २॥

राजविद्या, राजगुह्यम्, पवित्रम्, इदम्, उत्तमम्, प्रत्यक्षावगमम्, धर्म्यम्, सुसुखम्, कर्तुम्, अव्ययम्॥ २॥

इदम्	= यह विज्ञानसहित ज्ञान	**प्रत्यक्षावगमम्**	= प्रत्यक्ष फलवाला।
राजविद्या	= सब विद्याओंका राजा,	**धर्म्यम्**	= धर्मयुक्त
राजगुह्यम्	= सब गोपनीयोंका राजा,	**कर्तुम्**	= साधन करनेमें
पवित्रम्	= अति पवित्र,	**सुसुखम्**	= बड़ा सुगम (और)
उत्तमम्	= अति उत्तम,	**अव्ययम्**	= अविनाशी है।

[उस ज्ञानमें श्रद्धा न रखनेवालोंके लिये जन्म-मरणरूप संसार-चक्रकी प्राप्ति।]

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥ ३॥

अश्रद्दधानाः, पुरुषाः, धर्मस्य, अस्य, परन्तप, अप्राप्य, माम्, निवर्तन्ते, मृत्युसंसारवर्त्मनि॥ ३॥

और—

परन्तप	= हे परंतप!	**माम्**	= मुझको
अस्य	= इस (उपर्युक्त)	**अप्राप्य**	= न प्राप्त होकर
धर्मस्य	= धर्ममें	**मृत्युसंसार-वर्त्मनि**	= मृत्युरूप संसारचक्रमें
अश्रद्दधानाः	= श्रद्धारहित	**निवर्तन्ते**	= भ्रमण करते रहते हैं।
पुरुषाः	= पुरुष		

[प्रभावसहित भगवान्‌के सर्वव्यापी स्वरूपका कथन।]

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ ४॥

मया, ततम्, इदम्, सर्वम्, जगत्, अव्यक्तमूर्तिना, मत्स्थानि, सर्वभूतानि, न, च, अहम्, तेषु, अवस्थितः॥ ४॥

और हे अर्जुन!—

मया	= मुझ	**सर्वभूतानि**	= सब भूत
अव्यक्तमूर्तिना	= निराकार परमात्मासे	**मत्स्थानि**	= मेरे अन्तर्गत संकल्पके आधार स्थित हैं, (किन्तु वास्तवमें)
इदम्	= यह	**अहम्**	= मैं
सर्वम्	= सब	**तेषु**	= उनमें
जगत्	= जगत् (जलसे बर्फके सदृश)	**न,अवस्थितः**	= स्थित नहीं हूँ।
ततम्	= परिपूर्ण है		
च	= और		

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥ ५॥

न, च, मत्स्थानि, भूतानि, पश्य, मे, योगम्, ऐश्वरम्,
भूतभृत्, न, च, भूतस्थः, मम, आत्मा, भूतभावनः॥ ५॥

भूतानि	= वे सब भूत	**च**	= और
मत्स्थानि	= मुझमें स्थित	**भूतभावनः**	= भूतोंको उत्पन्न करनेवाला
न	= नहीं हैं; (किंतु)	**च**	= भी
मे	= मेरी	**मम**	= मेरा
ऐश्वरम्	= ईश्वरीय	**आत्मा**	= आत्मा (वास्तवमें)
योगम्	= योगशक्तिको	**भूतस्थः**	= भूतोंमें स्थित
पश्य	= देख (कि)	**न**	= नहीं है।
भूतभृत्	= भूतोंका धारण-पोषण करनेवाला		

[आकाशके दृष्टान्तसे भगवान्‌के सर्वव्यापी स्वरूपका कथन।]

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ६॥

यथा, आकाशस्थितः, नित्यम्, वायुः, सर्वत्रगः, महान्,
तथा, सर्वाणि, भूतानि, मत्स्थानि, इति, उपधारय॥ ६॥

क्योंकि—

यथा	= जैसे (आकाशसे उत्पन्न)	**तथा**	= वैसे ही (मेरे संकल्पद्वारा उत्पन्न होनेसे)
सर्वत्रगः	= सर्वत्र विचरनेवाला		
महान्	= महान्	**सर्वाणि**	= सम्पूर्ण
वायुः	= वायु	**भूतानि**	= भूत
नित्यम्	= सदा	**मत्स्थानि**	= मुझमें स्थित हैं,
आकाशस्थितः	= आकाशमें ही स्थित है,	**इति**	= ऐसा
		उपधारय	= जान।

[सर्वभूतोंकी उत्पत्ति और प्रलयका कथन।]

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥ ७॥

सर्वभूतानि, कौन्तेय, प्रकृतिम्, यान्ति, मामिकाम्, कल्पक्षये, पुनः, तानि, कल्पादौ, विसृजामि, अहम्॥ ७॥

और—

कौन्तेय	= हे अर्जुन!		होते हैं (और)
कल्पक्षये	= कल्पोंके अन्तमें	**कल्पादौ**	= कल्पोंके आदिमें
सर्वभूतानि	= सब भूत		
मामिकाम्	= मेरी	**तानि**	= उनको
प्रकृतिम्	= प्रकृतिको	**अहम्**	= मैं
यान्ति	= प्राप्त होते हैं अर्थात् प्रकृतिमें लीन	**पुनः**	= फिर
		विसृजामि	= रचता हूँ।

[सर्वभूतोंकी पुनः-पुनः उत्पत्तिका कथन।]

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥ ८॥

प्रकृतिम्, स्वाम्, अवष्टभ्य, विसृजामि, पुनः, पुनः, भूतग्रामम्, इमम्, कृत्स्नम्, अवशम्, प्रकृतेः, वशात्॥ ८॥

कैसे कि—

स्वाम्	= अपनी	इमम्	= इस
प्रकृतिम्	= प्रकृतिको	कृत्स्नम्	= सम्पूर्ण
अवष्टभ्य	= अंगीकार करके	भूतग्रामम्	= भूतसमुदायको
प्रकृतेः	= स्वभावके	पुनः, पुनः	= बार-बार (उनके कर्मोंके अनुसार)
वशात्	= बलसे		
अवशम्	= परतन्त्र हुए	विसृजामि	= रचता हूँ।

[भगवान्‌को कर्म नहीं बाँधते, इसके हेतुका कथन।]

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु॥ ९॥

न, च, माम्, तानि, कर्माणि, निबध्नन्ति, धनञ्जय, उदासीनवत्, आसीनम्, असक्तम्, तेषु, कर्मसु॥ ९॥

धनञ्जय	= हे अर्जुन!	आसीनम्	= स्थित
तेषु	= उन	माम्	= मुझ परमात्माको
कर्मसु	= कर्मोंमें	तानि	= वे
असक्तम्	= आसक्तिरहित	कर्माणि	= कर्म
च	= और	न	= नहीं
उदासीनवत्	= उदासीनके सदृश*	निबध्नन्ति	= बाँधते।

[भगवान्‌के सकाशसे प्रकृतिद्वारा चराचर जगत्‌की उत्पत्ति।]

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते॥ १०॥

मया, अध्यक्षेण, प्रकृतिः, सूयते, सचराचरम्, हेतुना, अनेन, कौन्तेय, जगत्, विपरिवर्तते॥ १०॥

और—

कौन्तेय	= हे अर्जुन!	मया	= मुझ

* जिसके सम्पूर्ण कार्य कर्तृत्वभावके बिना अपने-आप सत्तामात्रसे ही होते हैं, उसका नाम "उदासीनके सदृश" है।

अध्यक्षेण = अधिष्ठाताके सकाशसे
प्रकृतिः = प्रकृति
सचराचरम् = चराचरसहित सर्वजगत्को
सूयते = रचती है (और)
अनेन = इस
हेतुना = हेतुसे ही
जगत् = यह संसार-चक्र
विपरिवर्तते = घूम रहा है।

[भगवान्‌के प्रभावको न जाननेके कारण उनका तिरस्कार करनेवालोंकी निन्दा।]

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानन्तो मम भूतमहेश्वरम्॥ ११॥

अवजानन्ति, माम्, मूढाः, मानुषीम्, तनुम्, आश्रितम्, परम्, भावम्, अजानन्तः, मम, भूतमहेश्वरम्॥ ११॥

ऐसा होनेपर भी—

मम = मेरे
परम् = परम
भावम् = भावको *
अजानन्तः = न जाननेवाले
मूढाः = मूढ़लोग
मानुषीम् = मनुष्यका
तनुम् = शरीर
आश्रितम् = धारण करनेवाले
माम् = मुझ
भूतमहेश्वरम् = सम्पूर्ण भूतोंके महान् ईश्वरको
अवजानन्ति = तुच्छ समझते हैं अर्थात् अपने योगमायासे संसारके उद्धारके लिये मनुष्यरूपमें विचरते हुए मुझ परमेश्वरको साधारण मनुष्य मानते हैं।

[राक्षसी और आसुरी प्रकृतिवालोंके लक्षण।]

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥ १२॥

मोघाशाः, मोघकर्माणः, मोघज्ञानाः, विचेतसः, राक्षसीम्, आसुरीम्, च, एव, प्रकृतिम्, मोहिनीम्, श्रिताः॥ १२॥

* गीता अध्याय ७ श्लोक २४ में देखना चाहिये।

वे—

मोघाशाः	= व्यर्थ आशा,	**आसुरीम्**	= आसुरी
मोघकर्माणः	= व्यर्थ कर्म (और)	**च**	= और
मोघज्ञानाः	= व्यर्थ ज्ञानवाले	**मोहिनीम्**	= मोहिनी
विचेतसः	= विक्षिप्त चित्त अज्ञानीजन	**प्रकृतिम्**	= प्रकृतिको[1]
राक्षसीम्	= राक्षसी,	**एव**	= ही
		श्रिताः	= धारण किये रहते हैं।

[भगवान्‌के प्रभावको जाननेवाले अनन्य भक्तोंके भजनका प्रकार।]

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥ १३॥

महात्मानः, तु, माम्, पार्थ, दैवीम्, प्रकृतिम्, आश्रिताः,
भजन्ति, अनन्यमनसः, ज्ञात्वा, भूतादिम्, अव्ययम्॥ १३॥

तु	= परंतु	**भूतादिम्**	= सब भूतोंका सनातन कारण (और)
पार्थ	= हे कुन्तीपुत्र!	**अव्ययम्**	= नाशरहित अक्षरस्वरूप
दैवीम्	= दैवी	**ज्ञात्वा**	= जानकर
प्रकृतिम्	= प्रकृतिके[2]	**अनन्यमनसः**	= अनन्य मनसे युक्त (होकर)
आश्रिताः	= आश्रित	**भजन्ति**	= निरन्तर भजते हैं।
महात्मानः	= महात्माजन		
माम्	= मुझको		

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥ १४॥

सततम्, कीर्तयन्तः, माम्, यतन्तः, च, दृढव्रताः,
नमस्यन्तः, च, माम्, भक्त्या, नित्ययुक्ताः, उपासते॥ १४॥

१-जिसको आसुरी सम्पदाके नामसे विस्तारपूर्वक भगवान्‌ने गीता अध्याय १६ श्लोक ४ तथा श्लोक ७ से २१ तक कहा है।

२-इसका विस्तारपूर्वक वर्णन गीता अध्याय १६ श्लोक १—३ में देखना चाहिये।

और वे—

दृढव्रताः	= दृढ़ निश्चयवाले भक्तजन	**च**	= और
सततम्	= निरन्तर	**माम्**	= मुझको (बार-बार)
कीर्तयन्तः	= मेरे नाम और गुणोंका कीर्तन करते हुए	**नमस्यन्तः**	= प्रणाम करते हुए
च	= तथा (मेरी प्राप्तिके लिये)	**नित्ययुक्ताः**	= सदा मेरे ध्यानमें युक्त होकर
यतन्तः	= यत्न करते हुए	**भक्त्या**	= अनन्य प्रेमसे
		माम्	= मेरी
		उपासते	= उपासना करते हैं।

[एकत्वभावसे ज्ञानयज्ञके द्वारा ब्रह्मकी उपासना करनेवाले ज्ञानयोगियोंका और विश्वरूप परमेश्वरकी उपासना करनेवालोंका वर्णन।]

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥ १५॥

ज्ञानयज्ञेन, च, अपि, अन्ये, यजन्तः, माम्, उपासते, एकत्वेन, पृथक्त्वेन, बहुधा, विश्वतोमुखम्॥ १५॥

अन्ये	= दूसरे ज्ञानयोगी		करते हैं)
माम्	= मुझ (निर्गुण-निराकार ब्रह्मका)	**च**	= और (दूसरे मनुष्य)
ज्ञानयज्ञेन	= ज्ञानयज्ञके द्वारा	**बहुधा**	= बहुत प्रकारसे स्थित
एकत्वेन	= अभिन्न-भावसे	**विश्वतोमुखम्**	= मुझ विराट्स्वरूप परमेश्वरकी
यजन्तः	= पूजन करते हुए	**पृथक्त्वेन**	= पृथक्-भावसे
अपि	= भी (मेरी उपासना	**उपासते**	= उपासना करते हैं।

[भगवान्‌का अपने गुण, प्रभाव और विभूतिसहित स्वरूपका वर्णन करते हुए कारणरूप समस्त जगत्‌को भी अपना स्वरूप बतलाना।]

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम्।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम्॥ १६॥

अहम्, क्रतुः, अहम्, यज्ञः, स्वधा, अहम्, अहम्, औषधम्,
मन्त्रः, अहम्, अहम्, एव, आज्यम्, अहम्, अग्निः, अहम्, हुतम्॥ १६॥

क्योंकि—

क्रतुः	= क्रतु	**अहम्**	= मैं हूँ,
अहम्	= मैं हूँ,	**आज्यम्**	= घृत
यज्ञः	= यज्ञ	**अहम्**	= मैं हूँ,
अहम्	= मैं हूँ,	**अग्निः**	= अग्नि
स्वधा	= स्वधा	**अहम्**	= मैं हूँ (और)
अहम्	= मैं हूँ,	**हुतम्**	= हवनरूप क्रिया (भी)
औषधम्	= ओषधि	**अहम्**	= मैं
अहम्	= मैं हूँ,	**एव**	= ही हूँ।
मन्त्रः	= मन्त्र		

पिताहमस्य जगतो माता धाता पितामहः।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च॥ १७॥

पिता, अहम्, अस्य, जगतः, माता, धाता, पितामहः,
वेद्यम्, पवित्रम्, ओङ्कारः, ऋक्, साम, यजुः, एव, च॥ १७॥

और हे अर्जुन! मैं ही—

अस्य	= इस	**वेद्यम्**	= जाननेयोग्य*
जगतः	= सम्पूर्ण जगत्का	**पवित्रम्**	= पवित्र
धाता	= धाता अर्थात् धारण करनेवाला एवं कर्मोंके फलको देनेवाला	**ओङ्कारः**	= ॐकार (तथा)
		ऋक्	= ऋग्वेद
		साम	= सामवेद
		च	= और
पिता	= पिता,	**यजुः**	= यजुर्वेद (भी)
माता	= माता,	**अहम्**	= मैं
पितामहः	= पितामह,	**एव**	= ही हूँ।

* गीता अध्याय १३ श्लोक १२ से लेकर १७ तक देखना चाहिये।

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्॥ १८॥

गतिः, भर्ता, प्रभुः, साक्षी, निवासः, शरणम्, सुहृत्, प्रभवः, प्रलयः, स्थानम्, निधानम्, बीजम्, अव्ययम्॥ १८॥

और हे अर्जुन!—

गतिः = प्राप्त होनेयोग्य परमधाम,
भर्ता = भरण-पोषण करनेवाला,
प्रभुः = सबका स्वामी,
साक्षी = शुभाशुभका देखनेवाला,
निवासः = सबका वासस्थान,
शरणम् = शरण लेनेयोग्य,
सुहृत् = प्रत्युपकार न चाहकर हित करनेवाला
प्रभवः प्रलयः = सबकी उत्पत्ति-प्रलयका हेतु,
स्थानम् = स्थितिका आधार,
निधानम् = निधान* (और)
अव्ययम् = अविनाशी
बीजम् = कारण (भी)
(अहम्) = मैं
(एव) = ही हूँ।

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥ १९॥

तपामि, अहम्, अहम्, वर्षम्, निगृह्णामि, उत्सृजामि, च, अमृतम्, च, एव, मृत्युः, च, सत्, असत्, च, अहम्, अर्जुन॥ १९॥

और—

अहम् = मैं (ही)
तपामि = सूर्यरूपसे तपता हूँ,
वर्षम् = वर्षाका
निगृह्णामि = आकर्षण करता हूँ
च = और (उसे)
उत्सृजामि = बरसाता हूँ।
अर्जुन = हे अर्जुन!
अहम् = मैं
एव = ही
अमृतम् = अमृत

* प्रलयकालमें सम्पूर्ण भूत सूक्ष्मरूपसे जिसमें लय होते हैं उसका नाम "निधान" है।

च	= और	**सत्, असत्**	= सत्-असत्
मृत्युः	= मृत्यु (हूँ)	**च**	= भी
च	= और	**अहम्**	= मैं ही (हूँ)।

[स्वर्गभोग-हेतु यज्ञादि कर्म करनेवालोंके आवागमनका वर्णन।]

त्रैविद्या मां सोमपाः पूतपापा-
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान्॥ २०॥

त्रैविद्याः, माम्, सोमपाः, पूतपापाः, यज्ञैः, इष्ट्वा, स्वर्गतिम्, प्रार्थयन्ते, ते, पुण्यम्, आसाद्य, सुरेन्द्रलोकम्, अश्नन्ति, दिव्यान्, दिवि, देवभोगान्॥ २०॥

परंतु जो—

त्रैविद्याः	= तीनों वेदोंमें विधान किये हुए सकाम कर्मोंको करनेवाले,	**प्रार्थयन्ते**	= चाहते हैं;
		ते	= वे पुरुष
		पुण्यम्	= अपने पुण्योंके फलरूप
सोमपाः	= सोमरसको पीनेवाले,	**सुरेन्द्रलोकम्**	= स्वर्गलोकको
पूतपापाः	= पापरहित पुरुष*	**आसाद्य**	= प्राप्त होकर
माम्	= मुझको	**दिवि**	= स्वर्गमें
यज्ञैः	= यज्ञोंके द्वारा	**दिव्यान्**	= दिव्य
इष्ट्वा	= पूजकर	**देवभोगान्**	= देवताओंके भोगोंको
स्वर्गतिम्	= स्वर्गकी प्राप्ति	**अश्नन्ति**	= भोगते हैं।

ते तं भुक्त्वा स्वर्गलोकं विशालं-
क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना-
गतागतं कामकामा लभन्ते॥ २१॥

* यहाँ स्वर्गप्राप्तिके प्रतिबन्धक देव-ऋणरूप पापसे पवित्र होना समझना चाहिये।

ते, तम्, भुक्त्वा, स्वर्गलोकम्, विशालम्, क्षीणे, पुण्ये, मर्त्यलोकम्, विशन्ति, एवम्, त्रयीधर्मम्, अनुप्रपन्नाः, गतागतम्, कामकामाः, लभन्ते॥ २१॥

और—

ते = वे
तम् = उस
विशालम् = विशाल
स्वर्गलोकम् = स्वर्गलोकको
भुक्त्वा = भोगकर
पुण्ये = पुण्य
क्षीणे = क्षीण होनेपर
मर्त्यलोकम् = मृत्युलोकको
विशन्ति = प्राप्त होते हैं।
एवम् = इस प्रकार (स्वर्गके साधनरूप)
त्रयीधर्मम् = तीनों वेदोंमें कहे हुए सकाम कर्मका
अनुप्रपन्नाः = आश्रय लेनेवाले (और)
कामकामाः = भोगोंकी कामनावाले पुरुष
गतागतम् = बार-बार आवागमनको
लभन्ते = प्राप्त होते हैं अर्थात् पुण्यके प्रभावसे स्वर्गमें जाते हैं और पुण्य क्षीण होनेपर मृत्युलोकमें आते हैं।

[निष्कामभावसे नित्य-निरन्तर चिन्तन करनेवाले अपने भक्तोंका योगक्षेम स्वयं वहन करनेकी प्रतिज्ञा।]

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ २२॥

अनन्याः, चिन्तयन्तः, माम्, ये, जनाः, पर्युपासते, तेषाम्, नित्याभियुक्तानाम्, योगक्षेमम्, वहामि, अहम्॥ २२॥

और—

ये = जो
अनन्याः = अनन्य प्रेमी
जनाः = भक्तजन
माम् = मुझ परमेश्वरको
चिन्तयन्तः = निरन्तर चिन्तन करते हुए
पर्युपासते = निष्कामभावसे भजते हैं,
तेषाम् = उन
नित्याभियुक्तानाम् = नित्य-निरन्तर मेरा चिन्तन करनेवाले पुरुषोंका

योगक्षेमम्	= योगक्षेम*		
अहम्	= मैं स्वयं	**वहामि**	= प्राप्त कर देता हूँ।

[अन्य देवताओंकी उपासनाको भी प्रकारान्तरसे अविधिपूर्वक अपनी उपासना बतलाना।]

येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ २३॥

ये, अपि, अन्यदेवताः, भक्ताः, यजन्ते, श्रद्धया, अन्विताः,
ते, अपि, माम्, एव, कौन्तेय, यजन्ति, अविधिपूर्वकम्॥ २३॥

और—

कौन्तेय	= हे अर्जुन!	**अपि**	= भी
अपि	= यद्यपि	**माम्**	= मुझको
श्रद्धया	= श्रद्धासे	**एव**	= ही
अन्विताः	= युक्त		
ये	= जो सकाम	**यजन्ति**	= पूजते हैं, (किंतु उनका वह पूजन)
भक्ताः	= भक्त		
अन्यदेवताः	= दूसरे देवताओंको		
यजन्ते	= पूजते हैं,	**अविधिपूर्वकम्**	= अविधिपूर्वक अर्थात् अज्ञानपूर्वक है।
ते	= वे		

[भगवान्‌को तत्त्वसे न जाननेवालोंका पतन।]

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥ २४॥

अहम्, हि, सर्वयज्ञानाम्, भोक्ता, च, प्रभुः, एव, च,
न, तु, माम्, अभिजानन्ति, तत्त्वेन, अतः, च्यवन्ति, ते॥ २४॥

हि	= क्योंकि	**भोक्ता**	= भोक्ता
सर्वयज्ञानाम्	= सम्पूर्ण यज्ञोंका	**च**	= और

* भगवत्स्वरूपकी प्राप्तिका नाम 'योग' है और भगवत्प्राप्तिके निमित्त किये हुए साधनकी रक्षाका नाम 'क्षेम' है।

प्रभुः	= स्वामी	**तत्त्वेन**	= तत्त्वसे
च	= भी	**न**	= नहीं
अहम्	= मैं	**अभिजानन्ति**	= जानते,
एव	= ही हूँ;	**अतः**	= इसीसे
तु	= परंतु	**च्यवन्ति**	= गिरते हैं अर्थात् पुनर्जन्मको प्राप्त होते हैं।
ते	= वे		
माम्	= मुझ परमेश्वरको		

[उपासनाके अनुसार फलप्राप्तिका कथन।]

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्॥ २५॥

यान्ति, देवव्रताः, देवान्, पितॄन्, यान्ति, पितृव्रताः, भूतानि, यान्ति, भूतेज्याः, यान्ति, मद्याजिनः, अपि, माम्॥ २५॥

कारण यह नियम है कि—

देवव्रताः	= देवताओंको पूजनेवाले	**यान्ति**	= प्राप्त होते हैं (और)
देवान्	= देवताओंको	**मद्याजिनः**	= मेरा पूजन करनेवाले भक्त
यान्ति	= प्राप्त होते हैं,	**माम्**	= मुझको
पितृव्रताः	= पितरोंको पूजनेवाले	**अपि**	= ही
पितॄन्	= पितरोंको	**यान्ति**	= प्राप्त होते हैं। (इसीलिये मेरे भक्तोंका पुनर्जन्म नहीं होता।*)
यान्ति	= प्राप्त होते हैं,		
भूतेज्याः	= भूतोंको पूजनेवाले		
भूतानि	= भूतोंको		

[भक्तिपूर्वक अर्पण किये हुए पत्र-पुष्पादिको खानेके लिये भगवान्‌की प्रतिज्ञा।]

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ २६॥

* गीता अध्याय ८ श्लोक १६ में देखना चाहिये।

पत्रम्, पुष्पम्, फलम्, तोयम्, यः, मे, भक्त्या, प्रयच्छति,
तत्, अहम्, भक्त्युपहृतम्, अश्नामि, प्रयतात्मनः ॥ २६ ॥

तथा हे अर्जुन! मेरे पूजनमें सुगमता भी है कि—

यः	=	जो (कोई भक्त)	**भक्त्युपहृतम्**	=	निष्काम प्रेमी भक्तका प्रेमपूर्वक अर्पण किया हुआ
मे	=	मेरे लिये			
भक्त्या	=	प्रेमसे			
पत्रम्	=	पत्र,	**तत्**	=	वह (पत्र-पुष्पादि)
पुष्पम्,	=	पुष्प,	**अहम्**	=	मैं (सगुणरूपसे प्रकट होकर प्रीतिसहित)
फलम्	=	फल,			
तोयम्	=	जल आदि	**अश्नामि**	=	खाता हूँ।
प्रयच्छति	=	अर्पण करता है,			
प्रयतात्मनः	=	(उस) शुद्ध बुद्धि			

[सर्वकर्म भगवदर्पण करनेकी आज्ञा एवं उसका फल अपनी प्राप्ति बतलाना।]

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ २७॥

यत्, करोषि, यत्, अश्नासि, यत्, जुहोषि, ददासि, यत्,
यत्, तपस्यसि, कौन्तेय, तत्, कुरुष्व, मदर्पणम् ॥ २७ ॥

इसलिये—

कौन्तेय	=	हे अर्जुन! (तू)	**यत्**	=	जो
यत्	=	जो (कर्म)	**ददासि**	=	दान देता है, (और)
करोषि	=	करता है,	**यत्**	=	जो
यत्	=	जो	**तपस्यसि**	=	तप करता है,
अश्नासि	=	खाता है,	**तत्**	=	वह सब
यत्	=	जो	**मदर्पणम्**	=	मेरे अर्पण
जुहोषि	=	हवन करता है,	**कुरुष्व**	=	कर।

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥ २८॥

शुभाशुभफलैः, एवम्, मोक्ष्यसे, कर्मबन्धनैः, सन्न्यासयोगयुक्तात्मा, विमुक्तः, माम्, उपैष्यसि॥ २८॥

एवम् = इस प्रकार

सन्न्यासयोग-युक्तात्मा = जिसमें समस्त कर्म मुझ भगवान्‌के अर्पण होते हैं ऐसे संन्यासयोगसे युक्त चित्तवाला (तू)

शुभाशुभफलैः = शुभाशुभ फलरूप

कर्मबन्धनैः = कर्मबन्धनसे

मोक्ष्यसे = मुक्त हो जायगा (और उनसे)

विमुक्तः = मुक्त होकर

माम् = मुझको ही

उपैष्यसि = प्राप्त होगा।

[अपने समत्वभावका वर्णन एवं भजनेवालोंकी महिमा।]

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥ २९॥

समः, अहम्, सर्वभूतेषु, न, मे, द्वेष्यः, अस्ति, न, प्रियः, ये, भजन्ति, तु, माम्, भक्त्या, मयि, ते, तेषु, च, अपि, अहम्॥ २९॥

यद्यपि—

अहम् = मैं

सर्वभूतेषु = सब भूतोंमें

समः = समभावसे व्यापक हूँ,

न = न (कोई)

मे = मेरा

द्वेष्यः = अप्रिय है (और)

न = न

प्रियः = प्रिय

अस्ति = है;

तु = परंतु

ये = जो भक्त

माम् = मुझको

भक्त्या = प्रेमसे

भजन्ति = भजते हैं,

ते = वे

मयि = मुझमें हैं

च = और

अहम्	= मैं	**तेषु**	= उनमें
अपि	= भी		(प्रत्यक्ष प्रकट हूँ।) *

[दुराचारी होनेपर भी दृढ़निश्चय एवं अनन्यभावयुक्त भगवद्भजनका महत्त्व।]

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥ ३०॥

अपि, चेत्, सुदुराचारः, भजते, माम्, अनन्यभाक्,
साधुः, एव, सः, मन्तव्यः, सम्यक्, व्यवसितः, हि, सः॥ ३०॥

तथा और भी मेरी भक्तिका प्रभाव सुन—

चेत्	= यदि (कोई)	**हि**	= क्योंकि
सुदुराचारः	= अतिशय दुराचारी	**सः**	= वह
अपि	= भी	**सम्यक्**	= यथार्थ
अनन्यभाक्	= अनन्यभावसे मेरा भक्त होकर	**व्यवसितः**	= निश्चयवाला है अर्थात् उसने भलीभाँति निश्चय कर लिया है कि परमेश्वरके भजनके समान अन्य कुछ भी नहीं है।
माम्	= मुझको		
भजते	= भजता है (तो)		
सः	= वह		
साधुः	= साधु		
एव	= ही		
मन्तव्यः	= माननेयोग्य है;		

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रति जानीहि न मे भक्तः प्रणश्यति॥ ३१॥

क्षिप्रम्, भवति, धर्मात्मा, शश्वत्, शान्तिम्, निगच्छति,
कौन्तेय, प्रति, जानीहि, न, मे, भक्तः, प्रणश्यति॥ ३१॥

---

* जैसे सूक्ष्मरूपसे सब जगह व्यापक हुआ भी अग्नि साधनोंद्वारा प्रकट करनेसे ही प्रत्यक्ष होता है, वैसे ही सब जगह स्थित हुआ भी परमेश्वर भक्तिसे भजनेवालोंके ही अन्तःकरणमें प्रत्यक्षरूपसे प्रकट होता है।

इसलिये वह—

क्षिप्रम्	= शीघ्र ही	**कौन्तेय**	= हे अर्जुन! (तू)
धर्मात्मा	= धर्मात्मा	**प्रति**	= निश्चयपूर्वक सत्य
भवति	= हो जाता है (और)	**जानीहि**	= जान (कि)
शश्वत्	= सदा रहनेवाली	**मे**	= मेरा
शान्तिम्	= परमशान्तिको	**भक्तः**	= भक्त
निगच्छति	= प्राप्त होता है।	**न, प्रणश्यति**	= नष्ट नहीं होता।

[अपनी शरणागतिसे स्त्री, वैश्य, शूद्र और चाण्डालादिको भी परमगतिरूप फलकी प्राप्ति।]

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥ ३२॥

माम्, हि, पार्थ, व्यपाश्रित्य, ये, अपि, स्युः, पापयोनयः, स्त्रियः, वैश्याः, तथा, शूद्राः, ते, अपि, यान्ति, पराम्, गतिम्॥ ३२॥

हि	= क्योंकि	**अपि**	= भी
पार्थ	= हे अर्जुन!	**स्युः**	= हों,
स्त्रियः	= स्त्री,	**ते**	= वे
वैश्याः	= वैश्य,	**अपि**	= भी
शूद्राः	= शूद्र	**माम्**	= मेरी
तथा	= तथा	**व्यपाश्रित्य**	= शरण होकर
पापयोनयः	= पापयोनि—चाण्डालादि	**पराम्**	= परम
		गतिम्	= गतिको (ही)
ये	= जो (कोई)	**यान्ति**	= प्राप्त होते हैं।

[पुण्यशील ब्राह्मण और राजर्षि भक्तजनोंकी प्रशंसा एवं भगवद्भजनके लिये आज्ञा।]

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्॥ ३३॥

किम्, पुनः, ब्राह्मणाः, पुण्याः, भक्ताः, राजर्षयः, तथा, अनित्यम्, असुखम्, लोकम्, इमम्, प्राप्य, भजस्व, माम्॥ ३३॥

पुनः = फिर (इसमें तो कहना ही)
किम् = क्या है, (जो)
पुण्याः = पुण्यशील
ब्राह्मणाः = ब्राह्मण
तथा = तथा
राजर्षयः = राजर्षि
भक्ताः = भक्तजन (मेरी शरण होकर परमगतिको प्राप्त होते हैं। इसलिये तू)
असुखम् = सुखरहित (और)
अनित्यम् = क्षणभंगुर
इमम् = इस
लोकम् = मनुष्य-शरीरको
प्राप्य = प्राप्त होकर (निरन्तर)
माम् = मेरा (ही)
भजस्व = भजन कर।

[अर्जुनको अपनी शरण होनेके लिये कहकर अंगसहित शरणागतिके स्वरूपका निरूपण।]

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥ ३४॥

मन्मनाः, भव, मद्भक्तः, मद्याजी, माम्, नमस्कुरु, माम्, एव, एष्यसि, युक्त्वा, एवम्, आत्मानम्, मत्परायणः॥ ३४॥

मन्मनाः = मुझमें मनवाला
भव = हो,
मद्भक्तः = मेरा भक्त
(भव) = बन,
मद्याजी = मेरा पूजन करनेवाला
(भव) = हो,
माम् = मुझको
नमस्कुरु = प्रणाम कर।
एवम् = इस प्रकार
आत्मानम् = आत्माको (मुझमें)
युक्त्वा = नियुक्त करके
मत्परायणः = मेरे परायण होकर (तू)
माम् = मुझको
एव = ही
एष्यसि = प्राप्त होगा।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः॥ ९॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

ॐ श्रीपरमात्मने नमः

अथ दशमोऽध्यायः

प्रधान-विषय—*१ से ७ तक भगवान्‌की विभूति और योगशक्तिका कथन तथा उनके जाननेका फल, (८—११) फल और प्रभावसहित भक्तियोगका कथन, (१२—१८) अर्जुनद्वारा भगवान्‌की स्तुति एवं विभूति और योगशक्तिको कहनेके लिये प्रार्थना, (१९—४२) भगवान्‌द्वारा अपनी विभूतियोंका और योगशक्तिका कथन।*

[भगवान्‌की पुनः श्रेष्ठ उपदेश प्रदान करनेकी प्रतिज्ञा एवं उसे सुननेके लिये अर्जुनसे अनुरोध।]

श्रीभगवानुवाच

भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १॥

भूयः, एव, महाबाहो, शृणु, मे, परमम्, वचः,
यत्, ते, अहम्, प्रीयमाणाय, वक्ष्यामि, हितकाम्यया॥ १॥

श्रीभगवान् बोले—

महाबाहो = हे महाबाहो!
भूयः = फिर
एव = भी
मे = मेरे
परमम् = परम (रहस्य और प्रभाववयुक्त)
वचः = वचनको
शृणु = सुन,
यत् = जिसे
अहम् = मैं
ते = तुझ
प्रीयमाणाय = अतिशय प्रेम रखनेवालेके लिये
हितकाम्यया = हितकी इच्छासे
वक्ष्यामि = कहूँगा।

['योग' शब्दवाच्य अपने प्रभावका वर्णन करके उसके जाननेका फल बतलाना।]

न मे विदुः सुरगणाः प्रभवं न महर्षयः।
अहमादिर्हि देवानां महर्षीणां च सर्वशः॥ २॥

न, मे, विदुः, सुरगणाः, प्रभवम्, न, महर्षयः,
अहम्, आदिः, हि, देवानाम्, महर्षीणाम्, च, सर्वशः ॥ २ ॥

हे अर्जुन!—

मे = मेरी
प्रभवम् = उत्पत्तिको अर्थात् लीलासे प्रकट होनेको
न = न
सुरगणाः = देवतालोग (जानते हैं और)
न = न
महर्षयः = महर्षिजन (ही)
विदुः = जानते हैं;
हि = क्योंकि
अहम् = मैं
सर्वशः = सब प्रकारसे
देवानाम् = देवताओंका
च = और
महर्षीणाम् = महर्षियोंका (भी)
आदिः = आदि कारण हूँ।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥

यः, माम्, अजम्, अनादिम्, च, वेत्ति, लोकमहेश्वरम्,
असम्मूढः, सः, मर्त्येषु, सर्वपापैः, प्रमुच्यते ॥ ३ ॥

और—

यः = जो
माम् = मुझको
अजम् = अजन्मा अर्थात् वास्तवमें जन्मरहित
अनादिम् = अनादि*
च = और
लोकमहेश्वरम् = लोकोंका महान् ईश्वर
वेत्ति = तत्त्वसे जानता है,
सः = वह
मर्त्येषु = मनुष्योंमें
असम्मूढः = ज्ञानवान् पुरुष
सर्वपापैः = सम्पूर्ण पापोंसे
प्रमुच्यते = मुक्त हो जाता है।

[भगवान्‌से बुद्धि आदि भावोंकी उत्पत्तिका कथन।]

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४ ॥

* अनादि उसको कहते हैं कि जो आदिरहित होवे और सबका कारण होवे।

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥ ५॥

बुद्धिः, ज्ञानम्, असम्मोहः, क्षमा, सत्यम्, दमः, शमः,
सुखम्, दुःखम्, भवः, अभावः, भयम्, च, अभयम्, एव, च॥ ४॥
अहिंसा, समता, तुष्टिः, तपः, दानम्, यशः, अयशः,
भवन्ति, भावाः, भूतानाम्, मत्तः, एव, पृथग्विधाः॥ ५॥

और हे अर्जुन!—

बुद्धिः	= निश्चय करनेकी शक्ति,	**च**	= तथा
ज्ञानम्	= यथार्थ ज्ञान,	**अहिंसा**	= अहिंसा,
असम्मोहः	= असंमूढता,	**समता**	= समता,
क्षमा	= क्षमा,	**तुष्टिः**	= संतोष,
सत्यम्	= सत्य,	**तपः**	= तप,*
दमः	= इन्द्रियोंका वशमें करना,	**दानम्**	= दान,
शमः	= मनका निग्रह	**यशः**	= कीर्ति (और)
एव	= तथा	**अयशः**	= अपकीर्ति—
सुखम्, दुःखम्	= सुख-दुःख,	**(एवम्)**	= ऐसे ये
भवः, अभावः	= उत्पत्ति-प्रलय	**भूतानाम्**	= प्राणियोंके
च	= और	**पृथग्विधाः**	= नाना प्रकारके
भयम्, अभयम्	= भय-अभय	**भावाः**	= भाव
		मत्तः	= मुझसे
		एव	= ही
		भवन्ति	= होते हैं।

[भगवान्‌के संकल्पसे सप्तर्षि और सनकादिकोंकी उत्पत्तिका कथन।]

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः॥ ६॥

महर्षयः, सप्त, पूर्वे, चत्वारः, मनवः, तथा,
मद्भावाः, मानसाः, जाताः, येषाम्, लोके, इमाः, प्रजाः॥ ६॥

* स्वधर्मके आचरणसे इन्द्रियादिको तपाकर शुद्ध करनेका नाम "तप" है।

और हे अर्जुन!—

सप्त	= सात	**मद्भावाः**	= मुझमें भाववाले (सब-के-सब)
महर्षयः	= महर्षिजन,	**मानसाः**	= मेरे संकल्पसे
चत्वारः	= चार (उनसे भी)	**जाताः**	= उत्पन्न हुए हैं,
पूर्वे	= पूर्व होनेवाले (सनकादि)	**येषाम्**	= जिनकी
तथा	= तथा	**लोके**	= संसारमें
मनवः	= स्वायम्भुव आदि चौदह मनु—ये	**इमाः**	= यह
		प्रजाः	= सम्पूर्ण प्रजा है।

[भगवान्‌की विभूति और योगको तत्त्वसे जाननेका फल।]

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः॥ ७॥

एताम्, विभूतिम्, योगम्, च, मम, यः, वेत्ति, तत्त्वतः, सः, अविकम्पेन, योगेन, युज्यते, न, अत्र, संशयः॥ ७॥

और—

यः	= जो पुरुष	**वेत्ति**	= जानता है, *
मम	= मेरी	**सः**	= वह
एताम्	= इस	**अविकम्पेन**	= निश्चल
विभूतिम्	= परमैश्वर्यरूप विभूतिको	**योगेन**	= भक्तियोगसे
च	= और	**युज्यते**	= युक्त हो जाता है—
योगम्	= योगशक्तिको	**अत्र**	= इसमें (कुछ भी)
तत्त्वतः	= तत्त्वसे	**संशयः**	= संशय
		न	= नहीं है।

[अपने बुद्धिमान् अनन्य प्रेमी भक्तोंके भजनका प्रकार।]

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥ ८॥

* जो कुछ दृश्यमात्र संसार है वह सब भगवान्‌की माया है और एक वासुदेव भगवान् ही सर्वत्र परिपूर्ण है, यह जानना ही "तत्त्वसे जानना है"।

अहम्, सर्वस्य, प्रभवः, मत्तः, सर्वम्, प्रवर्तते,
इति, मत्वा, भजन्ते, माम्, बुधाः, भावसमन्विताः ॥ ८ ॥

अहम् = मैं वासुदेव ही
सर्वस्य = सम्पूर्ण जगत्की
प्रभवः = उत्पत्तिका कारण हूँ (और)
मत्तः = मुझसे ही
सर्वम् = सब जगत्
प्रवर्तते = चेष्टा करता है,
इति = इस प्रकार
मत्वा = समझकर
भावसमन्विताः = श्रद्धा और भक्तिसे युक्त
बुधाः = बुद्धिमान् भक्तजन
माम् = मुझ परमेश्वरको (ही)
भजन्ते = निरन्तर भजते हैं।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ ९ ॥

मच्चित्ताः, मद्गतप्राणाः, बोधयन्तः, परस्परम्,
कथयन्तः, च, माम्, नित्यम्, तुष्यन्ति, च, रमन्ति, च॥ ९ ॥

और वे—

मच्चित्ताः = निरन्तर मुझमें मन लगानेवाले (और)
मद्गतप्राणाः = मुझमें ही प्राणोंको अर्पण करनेवाले भक्तजन* (मेरी भक्तिकी चर्चाके द्वारा)
परस्परम् = आपसमें (मेरे प्रभावको)
बोधयन्तः = जनाते हुए
च = तथा (गुण और प्रभावसहित मेरा)
कथयन्तः = कथन करते हुए
च = ही
नित्यम् = निरन्तर
तुष्यन्ति = संतुष्ट होते हैं
च = और
माम् = मुझ वासुदेवमें (ही निरन्तर)
रमन्ति = रमण करते हैं।

* मुझ वासुदेवके लिये ही जिन्होंने अपना जीवन अर्पण कर दिया है, उनका नाम है "मद्गतप्राणाः"।

[प्रीतिपूर्वक निरन्तर भजनेका फल।]

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ १०॥

तेषाम्, सततयुक्तानाम्, भजताम्, प्रीतिपूर्वकम्, ददामि, बुद्धियोगम्, तम्, येन, माम्, उपयान्ति, ते॥ १०॥

तेषाम् = उन
सततयुक्तानाम् = निरन्तर मेरे ध्यान आदिमें लगे हुए (और)
प्रीतिपूर्वकम् = प्रेमपूर्वक
भजताम् = भजनेवाले भक्तोंको (मैं)
तम् = वह
बुद्धियोगम् = तत्त्वज्ञानरूप योग
ददामि = देता हूँ,
येन = जिससे
ते = वे
माम् = मुझको (ही)
उपयान्ति = प्राप्त होते हैं।

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥ ११॥

तेषाम्, एव, अनुकम्पार्थम्, अहम्, अज्ञानजम्, तमः, नाशयामि, आत्मभावस्थः, ज्ञानदीपेन, भास्वता॥ ११॥

और हे अर्जुन!—

तेषाम् = उनके (ऊपर)
अनुकम्पार्थम् = अनुग्रह करनेके लिये
आत्मभावस्थः = उनके अन्तः- करणमें स्थित हुआ
अहम् = मैं स्वयं
एव = ही (उनके)
अज्ञानजम् = अज्ञानजनित
तमः = अन्धकारको
भास्वता = प्रकाशमय
ज्ञानदीपेन = तत्त्वज्ञानरूप दीपकके द्वारा
नाशयामि = नष्ट कर देता हूँ।

[अर्जुनद्वारा भगवान्‌की स्तुति।]

अर्जुन उवाच

परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥ १२॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे॥ १३॥

परम्, ब्रह्म, परम्, धाम, पवित्रम्, परमम्, भवान्,
पुरुषम्, शाश्वतम्, दिव्यम्, आदिदेवम्, अजम्, विभुम्,
आहुः, त्वाम्, ऋषयः, सर्वे, देवर्षिः, नारदः, तथा,
असितः, देवलः, व्यासः, स्वयम्, च, एव, ब्रवीषि, मे॥ १२-१३॥

इस प्रकार भगवान्‌के वचनोंको सुनकर अर्जुन बोले, हे भगवन्!—

भवान् = आप
परम् = परम
ब्रह्म = ब्रह्म,
परम् = परम
धाम = धाम (और)
परमम् = परम
पवित्रम् = पवित्र हैं; (क्योंकि)
त्वाम् = आपको
सर्वे = सब
ऋषयः = ऋषिगण
शाश्वतम् = सनातन
दिव्यम् = दिव्य
पुरुषम् = पुरुष (एवं)
आदिदेवम् = देवोंका भी आदिदेव,
अजम् = अजन्मा (और)
विभुम् = सर्वव्यापी
आहुः = कहते हैं,
तथा = वैसे ही
देवर्षिः = देवर्षि
नारदः = नारद (तथा)
असितः = असित (और)
देवलः = देवल ऋषि (तथा)
व्यासः = महर्षि व्यास (भी कहते हैं)
च = और
स्वयम् = स्वयं आप
एव = भी
मे = मेरे प्रति
ब्रवीषि = कहते हैं।

[अर्जुनद्वारा भगवान्‌के प्रभावका वर्णन।]

सर्वमेतदृतं मन्ये यन्मां वदसि केशव।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः॥ १४॥

सर्वम्, एतत्, ऋतम्, मन्ये, यत्, माम्, वदसि, केशव,
न, हि, ते, भगवन्, व्यक्तिम्, विदुः, देवाः, न, दानवाः॥ १४॥

और—

केशव	= हे केशव!	**ते**	= आपके
यत्	= जो (कुछ भी)	**व्यक्तिम्**	= लीलामय* स्वरूपको
माम्	= मेरे प्रति		
वदसि	= आप कहते हैं,	**न**	= न (तो)
एतत्	= इस	**दानवाः**	= दानव
सर्वम्	= सबको (मैं)	**विदुः**	= जानते हैं (और)
ऋतम्	= सत्य	**न**	= न
मन्ये	= मानता हूँ।	**देवाः**	= देवता
भगवन्	= हे भगवन्!	**हि**	= ही।

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम।
भूतभावन भूतेश देवदेव जगत्पते॥ १५॥

स्वयम्, एव, आत्मना, आत्मानम्, वेत्थ, त्वम्, पुरुषोत्तम,
भूतभावन, भूतेश, देवदेव, जगत्पते॥ १५॥

भूतभावन	= हे भूतोंको उत्पन्न करनेवाले!	**त्वम्**	= आप
		स्वयम्	= स्वयं
भूतेश	= हे भूतोंके ईश्वर!	**एव**	= ही
देवदेव	= हे देवोंके देव!	**आत्मना**	= अपनेसे
जगत्पते	= हे जगत्‌के स्वामी!	**आत्मानम्**	= अपनेको
पुरुषोत्तम	= हे पुरुषोत्तम!	**वेत्थ**	= जानते हैं।

* गीता अ० ४ श्लोक ६ में इसका विस्तार देखना चाहिये।

[भगवान्‌की विभूतियोंको जाननेके लिये अर्जुनकी इच्छा।]

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥ १६॥

वक्तुम्, अर्हसि, अशेषेण, दिव्याः, हि, आत्मविभूतयः, याभिः, विभूतिभिः, लोकान्, इमान्, त्वम्, व्याप्य, तिष्ठसि॥ १६॥

इसलिये हे भगवन्!—

त्वम्	= आप	**याभिः**	= जिन
हि	= ही (उन)	**विभूतिभिः**	= विभूतियोंके द्वारा (आप)
दिव्याः, आत्मविभूतयः	= अपनी दिव्य विभूतियोंको	**इमान्**	= इन सब
अशेषेण	= सम्पूर्णतासे	**लोकान्**	= लोकोंको
वक्तुम्	= कहनेमें	**व्याप्य**	= व्याप्त करके
अर्हसि	= समर्थ हैं,	**तिष्ठसि**	= स्थित हैं।

[भगवच्चिन्तनके विषयमें अर्जुनका प्रश्न।]

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया॥ १७॥

कथम्, विद्याम्, अहम्, योगिन्, त्वाम्, सदा, परिचिन्तयन्, केषु, केषु, च, भावेषु, चिन्त्यः, असि, भगवन्, मया॥ १७॥

योगिन्	= हे योगेश्वर!	**च**	= और
अहम्	= मैं	**भगवन्**	= हे भगवन्! (आप)
कथम्	= किस प्रकार	**केषु, केषु**	= किन-किन
सदा	= निरन्तर	**भावेषु**	= भावोंमें
परिचिन्तयन्	= चिन्तन करता हुआ	**मया**	= मेरे द्वारा
त्वाम्	= आपको	**चिन्त्यः**	= चिन्तन करनेयोग्य
विद्याम्	= जानूँ	**असि**	= हैं?

[योगशक्ति और विभूतियोंको विस्तारसे कहनेके लिये अर्जुनकी प्रार्थना।]

विस्तरेणात्मनो योगं विभूतिं च जनार्दन।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्॥ १८॥

विस्तरेण, आत्मनः, योगम्, विभूतिम्, च, जनार्दन,
भूयः, कथय, तृप्तिः, हि, शृण्वतः, न, अस्ति, मे, अमृतम्॥ १८॥

और—

जनार्दन = हे जनार्दन!
आत्मनः = अपनी
योगम् = योगशक्तिको
च = और
विभूतिम् = विभूतिको
भूयः = फिर (भी)
विस्तरेण = विस्तारपूर्वक
कथय = कहिये;
हि = क्योंकि (आपके)
अमृतम् = अमृतमय वचनोंको
शृण्वतः = सुनते हुए
मे = मेरी
तृप्तिः = तृप्ति
न = नहीं होती अर्थात्
अस्ति = सुननेकी उत्कण्ठा बनी ही रहती है।

[अपनी विभूतियोंको अनन्त बतलाकर प्रधान-प्रधान विभूतियोंको कहनेके लिये भगवान्‌की प्रतिज्ञा।]

श्रीभगवानुवाच

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥ १९॥

हन्त, ते, कथयिष्यामि, दिव्याः, हि, आत्मविभूतयः,
प्राधान्यतः, कुरुश्रेष्ठ, न, अस्ति, अन्तः, विस्तरस्य, मे॥ १९॥

इस प्रकार अर्जुनके पूछनेपर श्रीभगवान् बोले—

कुरुश्रेष्ठ = हे कुरुश्रेष्ठ!
हन्त = अब (मैं जो)
दिव्याः आत्मविभूतयः = मेरी दिव्य विभूतियाँ हैं, (उनको)
ते = तेरे लिये
प्राधान्यतः = प्रधानतासे
कथयिष्यामि = कहूँगा;
हि = क्योंकि
मे = मेरे
विस्तरस्य = विस्तारका

अन्तः	= अन्त		
न	= नहीं	**अस्ति**	= है।

[सर्वात्मरूपसे भगवान्‌के स्वरूपका कथन।]

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च॥ २०॥

अहम्, आत्मा, गुडाकेश, सर्वभूताशयस्थितः,
अहम्, आदिः, च, मध्यम्, च, भूतानाम्, अन्तः, एव, च॥ २०॥

गुडाकेश	= हे अर्जुन!	**मध्यम्**	= मध्य
अहम्	= मैं	**च**	= और
सर्वभूताशयस्थितः	= सब भूतोंके हृदयमें स्थित	**अन्तः**	= अन्त
		च	= भी
आत्मा	= सबका आत्मा हूँ।	**अहम्**	= मैं
च	= तथा	**एव**	= ही
भूतानाम्	= सम्पूर्ण भूतोंका		
आदिः	= आदि,	**(अस्मि)**	= हूँ।

[विष्णु आदि विभूतियोंका कथन।]

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥ २१॥

आदित्यानाम्, अहम्, विष्णुः, ज्योतिषाम्, रविः, अंशुमान्,
मरीचिः, मरुताम्, अस्मि, नक्षत्राणाम्, अहम्, शशी॥ २१॥

और हे अर्जुन!—

अहम्	= मैं	**रविः**	= सूर्य
आदित्यानाम्	= अदितिके बारह पुत्रोंमें	**अस्मि**	= हूँ (तथा)
		अहम्	= मैं
विष्णुः	= विष्णु (और)		
ज्योतिषाम्	= ज्योतियोंमें	**मरुताम्**	= उनचास वायु-देवताओंका
अंशुमान्	= किरणोंवाला		

मरीचिः	= तेज* (और)	**शशी**	= अधिपति चन्द्रमा
नक्षत्राणाम्	= नक्षत्रोंका	**(अस्मि)**	= हूँ।

[सामवेदादि विभूतियोंका कथन।]

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥ २२॥

वेदानाम्, सामवेदः, अस्मि, देवानाम्, अस्मि, वासवः, इन्द्रियाणाम्, मनः, च, अस्मि, भूतानाम्, अस्मि, चेतना॥ २२॥

और मैं—

वेदानाम्	= वेदोंमें	**मनः**	= मन
सामवेदः	= सामवेद	**अस्मि**	= हूँ
अस्मि	= हूँ,	**च**	= और
देवानाम्	= देवोंमें	**भूतानाम्**	= भूतप्राणियोंकी
वासवः	= इन्द्र	**चेतना**	= चेतना अर्थात् जीवनीशक्ति
अस्मि	= हूँ,		
इन्द्रियाणाम्	= इन्द्रियोंमें	**अस्मि**	= हूँ।

[शंकरादि विभूतियोंका कथन।]

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥ २३॥

रुद्राणाम्, शङ्करः, च, अस्मि, वित्तेशः, यक्षरक्षसाम्, वसूनाम्, पावकः, च, अस्मि, मेरुः, शिखरिणाम्, अहम्॥ २३॥

और मैं—

रुद्राणाम्	= एकादश रुद्रोंमें	**यक्षरक्षसाम्**	= यक्ष तथा राक्षसोंमें
शङ्करः	= शंकर	**वित्तेशः**	= धनका स्वामी कुबेर हूँ।
अस्मि	= हूँ		
च	= और	**अहम्**	= मैं

* उनचास मरुतोंके नाममें "मरीचि" नाम कहीं भी नहीं मिला है। अतः मरीचिको मरुत् न मानकर समस्त मरुद्गणोंका तेज या किरणें माना गया है।

वसूनाम्	= आठ वसुओंमें	**शिखरिणाम्**	= शिखरवाले पर्वतोंमें
पावकः	= अग्नि	**मेरुः**	= सुमेरु पर्वत
अस्मि	= हूँ	**(अस्मि)**	= हूँ।
च	= और		

[बृहस्पति आदि विभूतियोंका कथन।]

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः॥ २४॥

पुरोधसाम्, च, मुख्यम्, माम्, विद्धि, पार्थ, बृहस्पतिम्, सेनानीनाम्, अहम्, स्कन्दः, सरसाम्, अस्मि, सागरः॥ २४॥

और—

पुरोधसाम्	= पुरोहितोंमें	**सेनानीनाम्**	= सेनापतियोंमें
मुख्यम्	= मुखिया	**स्कन्दः**	= स्कन्द
बृहस्पतिम्	= बृहस्पति	**च**	= और
माम्	= मुझको		
विद्धि	= जान।	**सरसाम्**	= जलाशयोंमें
पार्थ	= हे पार्थ!	**सागरः**	= समुद्र
अहम्	= मैं	**अस्मि**	= हूँ।

[भृगु आदि विभूतियोंका कथन।]

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥ २५॥

महर्षीणाम्, भृगुः, अहम्, गिराम्, अस्मि, एकम्, अक्षरम्, यज्ञानाम्, जपयज्ञः, अस्मि, स्थावराणाम्, हिमालयः॥ २५॥

और हे अर्जुन!—

अहम्	= मैं	**एकम्**	= एक
महर्षीणाम्	= महर्षियोंमें	**अक्षरम्**	= अक्षर अर्थात् ओंकार
भृगुः	= भृगु (और)	**अस्मि**	= हूँ।
गिराम्	= शब्दोंमें	**यज्ञानाम्**	= सब प्रकारके यज्ञोंमें

जपयज्ञः	= जपयज्ञ (और)	**हिमालयः**	= हिमालय पहाड़
स्थावराणाम्	= स्थिर रहनेवालोंमें	**अस्मि**	= हूँ।

[अश्वत्थ आदि विभूतियोंका कथन।]

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥ २६॥

अश्वत्थः, सर्ववृक्षाणाम्, देवर्षीणाम्, च, नारदः, गन्धर्वाणाम्, चित्ररथः, सिद्धानाम्, कपिलः, मुनिः॥ २६॥

और मैं—

सर्ववृक्षाणाम्	= सब वृक्षोंमें	**च**	= और
अश्वत्थः	= पीपलका वृक्ष,	**सिद्धानाम्**	= सिद्धोंमें
देवर्षीणाम्	= देवर्षियोंमें	**कपिलः**	= कपिल
नारदः	= नारद मुनि,	**मुनिः**	= मुनि
गन्धर्वाणाम्	= गन्धर्वोंमें		
चित्ररथः	= चित्ररथ	**(अस्मि)**	= हूँ।

[उच्चैःश्रवा आदि विभूतियोंका कथन।]

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम्॥ २७॥

उच्चैःश्रवसम्, अश्वानाम्, विद्धि, माम्, अमृतोद्भवम्, ऐरावतम्, गजेन्द्राणाम्, नराणाम्, च, नराधिपम्॥ २७॥

और हे अर्जुन! तू—

अश्वानाम्	= घोड़ोंमें	**ऐरावतम्**	= ऐरावत नामक हाथी
अमृतोद्भवम्	= अमृतके साथ उत्पन्न होनेवाला	**च**	= और
		नराणाम्	= मनुष्योंमें
उच्चैःश्रवसम्	= उच्चैःश्रवा नामक घोड़ा,	**नराधिपम्**	= राजा
		माम्	= मुझको
गजेन्द्राणाम्	= श्रेष्ठ हाथियोंमें	**विद्धि**	= जान।

[वज्रादि विभूतियोंका कथन।]

आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥ २८॥

आयुधानाम्, अहम्, वज्रम्, धेनूनाम्, अस्मि, कामधुक्, प्रजनः, च, अस्मि, कन्दर्पः, सर्पाणाम्, अस्मि, वासुकिः॥ २८॥

और हे अर्जुन!—

अहम् = मैं
आयुधानाम् = शस्त्रोंमें
वज्रम् = वज्र (और)
धेनूनाम् = गौओंमें
कामधुक् = कामधेनु
अस्मि = हूँ।
प्रजनः = शास्त्रोक्त रीतिसे सन्तानकी उत्पत्तिका हेतु
कन्दर्पः = कामदेव
अस्मि = हूँ
च = और
सर्पाणाम् = सर्पोंमें
वासुकिः = सर्पराज वासुकि
अस्मि = हूँ।

[अनन्त आदि विभूतियोंका कथन।]

अनन्तश्चास्मि नागानां वरुणो यादसामहम्।
पितॄणामर्यमा चास्मि यमः संयमतामहम्॥ २९॥

अनन्तः, च, अस्मि, नागानाम्, वरुणः, यादसाम्, अहम्, पितॄणाम्, अर्यमा, च, अस्मि, यमः, संयमताम्, अहम्॥ २९॥

तथा—

अहम् = मैं
नागानाम् = नागोंमें*
अनन्तः = शेषनाग
च = और
यादसाम् = जलचरोंका अधिपति
वरुणः = वरुण देवता
अस्मि = हूँ
च = और
पितॄणाम् = पितरोंमें
अर्यमा = अर्यमा नामक पितर (तथा)

* नाग और सर्प यह दो प्रकारकी सर्पोंकी ही जाति हैं।

संयमताम्	=	शासन करनेवालोंमें	**अहम्**	=	**मैं**
यमः	=	यमराज	**अस्मि**	=	**हूँ।**

[प्रह्लादादि विभूतियोंका कथन।]

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥ ३०॥

प्रह्लादः, च, अस्मि, दैत्यानाम्, कालः, कलयताम्, अहम्, मृगाणाम्, च, मृगेन्द्रः, अहम्, वैनतेयः, च, पक्षिणाम्॥ ३०॥

और हे अर्जुन!—

अहम्	=	**मैं**	**च**	=	**तथा**
दैत्यानाम्	=	**दैत्योंमें**	**मृगाणाम्**	=	**पशुओंमें**
प्रह्लादः	=	**प्रह्लाद**	**मृगेन्द्रः**	=	**मृगराज सिंह**
च	=	**और**	**च**	=	**और**
कलयताम्	=	**गणना करनेवालोंका**	**पक्षिणाम्**	=	**पक्षियोंमें**
			अहम्	=	**मैं**
कालः	=	**समय***	**वैनतेयः**	=	**गरुड़**
अस्मि	=	**हूँ**	**(अस्मि)**	=	**हूँ।**

[पवन आदि विभूतियोंका कथन।]

पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥ ३१॥

पवनः, पवताम्, अस्मि, रामः, शस्त्रभृताम्, अहम्, झषाणाम्, मकरः, च, अस्मि, स्रोतसाम्, अस्मि, जाह्नवी॥ ३१॥

और—

अहम्	=	**मैं**	**शस्त्रभृताम्**	=	**शस्त्रधारियोंमें**
पवताम्	=	**पवित्र करनेवालोंमें**	**रामः**	=	**श्रीराम**
पवनः	=	**वायु (और)**	**अस्मि**	=	**हूँ (तथा)**

* क्षण-घड़ी-दिन-पक्ष-मास आदिमें जो समय है, सो मैं हूँ।

झषाणाम्	= मछलियोंमें	**च**	= और
		स्रोतसाम्	= नदियोंमें
मकरः	= मगर	**जाह्नवी**	= श्रीभागीरथी गंगाजी
अस्मि	= हूँ	**अस्मि**	= हूँ।

[भगवान्‌की योगशक्तिका और अध्यात्मविद्या आदि विभूतियोंका कथन।]

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥ ३२॥

सर्गाणाम्, आदिः, अन्तः, च, मध्यम्, च, एव, अहम्, अर्जुन, अध्यात्मविद्या, विद्यानाम्, वादः, प्रवदताम्, अहम्॥ ३२॥

और—

अर्जुन	= हे अर्जुन!	**विद्यानाम्**	= विद्याओंमें
सर्गाणाम्	= सृष्टियोंका	**अध्यात्मविद्या**	= अध्यात्मविद्या अर्थात् ब्रह्मविद्या (और)
आदिः	= आदि		
च	= और		
अन्तः	= अन्त	**प्रवदताम्**	= परस्पर विवाद करनेवालोंका
च	= तथा		
मध्यम्	= मध्य (भी)	**वादः**	= तत्त्व-निर्णयके लिये किया जानेवाला वाद
अहम्	= मैं		
एव	= ही (हूँ)।		
अहम्	= मैं	**(अस्मि)**	= हूँ।

[अकारादि विभूतियोंका कथन।]

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥ ३३॥

अक्षराणाम्, अकारः, अस्मि, द्वन्द्वः, सामासिकस्य, च, अहम्, एव, अक्षयः, कालः, धाता, अहम्, विश्वतोमुखः॥ ३३॥

तथा—

अहम्	= मैं	**अकारः**	= अकार हूँ
अक्षराणाम्	= अक्षरोंमें	**च**	= और

सामासिकस्य = समासोंमें
द्वन्द्वः = द्वन्द्व नामक समास
अस्मि = हूँ,
अक्षयः = अक्षय
कालः = काल अर्थात् कालका भी महाकाल (तथा)
विश्वतोमुखः = सब ओर मुखवाला विराट्स्वरूप (सबका)
धाता = धारण-पोषण करनेवाला (भी)
अहम् = मैं
एव = ही
(अस्मि) = हूँ।

[मृत्यु आदि विभूतियोंका कथन।]

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥ ३४॥

मृत्युः, सर्वहरः, च, अहम्, उद्भवः, च, भविष्यताम्,
कीर्तिः, श्रीः, वाक्, च, नारीणाम्, स्मृतिः, मेधा, धृतिः, क्षमा॥ ३४॥

हे अर्जुन!—

अहम् = मैं
सर्वहरः = सबका नाश करनेवाला
मृत्युः = मृत्यु
च = और
भविष्यताम् = उत्पन्न होनेवालोंका
उद्भवः = उत्पत्ति-हेतु हूँ
च = तथा
नारीणाम् = स्त्रियोंमें
कीर्तिः = कीर्ति,*
श्रीः = श्री,
वाक् = वाक्,
स्मृतिः = स्मृति,
मेधा = मेधा,
धृतिः = धृति
च = और
क्षमा = क्षमा
(अस्मि) = हूँ।

[बृहत्साम आदि विभूतियोंका कथन।]

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः॥ ३५॥

---

* कीर्ति आदि ये सात देवताओंकी स्त्रियाँ और स्त्रीवाचक नामवाले गुण भी प्रसिद्ध हैं, इसलिये दोनों प्रकारसे ही भगवान्‌की विभूतियाँ हैं।

बृहत्साम, तथा, साम्नाम्, गायत्री, छन्दसाम्, अहम्, मासानाम्, मार्गशीर्षः, अहम्, ऋतूनाम्, कुसुमाकरः॥ ३५॥

तथा = तथा
साम्नाम् = गायन करनेयोग्य श्रुतियोंमें
अहम् = मैं
बृहत्साम = बृहत्साम (और)
छन्दसाम् = छन्दोंमें
गायत्री = गायत्री छन्द हूँ (तथा)
मासानाम् = महीनोंमें
मार्गशीर्षः = मार्गशीर्ष (और)
ऋतूनाम् = ऋतुओंमें
कुसुमाकरः = वसन्त
अहम् = मैं
(अस्मि) = हूँ।

[द्यूत आदि विभूतियोंका कथन।]

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्॥ ३६॥

द्यूतम्, छलयताम्, अस्मि, तेजः, तेजस्विनाम्, अहम्, जयः, अस्मि, व्यवसायः, अस्मि, सत्त्वम्, सत्त्ववताम्, अहम्॥ ३६॥

हे अर्जुन!

अहम् = मैं
छलयताम् = छल करनेवालोंमें
द्यूतम् = जूआ (और)
तेजस्विनाम् = प्रभावशाली पुरुषोंका
तेजः = प्रभाव
अस्मि = हूँ।
अहम् = मैं
(जेतृणाम्) = जीतनेवालोंका
जयः = विजय
अस्मि = हूँ।
(व्यवसायिनाम्) = निश्चय करनेवालोंका
व्यवसायः = निश्चय, और
सत्त्ववताम् = सात्त्विक पुरुषोंका
सत्त्वम् = सात्त्विक भाव
अस्मि = हूँ।

[वासुदेव आदि विभूतियोंका कथन।]

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः॥ ३७॥

वृष्णीनाम्, वासुदेवः, अस्मि, पाण्डवानाम्, धनञ्जयः, मुनीनाम्, अपि, अहम्, व्यासः, कवीनाम्, उशना, कविः ॥ ३७ ॥

और—

वृष्णीनाम्	= वृष्णिवंशियोंमें*	**कवीनाम्**	= कवियोंमें
वासुदेवः	= वासुदेव अर्थात् मैं स्वयं तेरा सखा	**उशना**	= शुक्राचार्य
		कविः	= कवि
पाण्डवानाम्	= पाण्डवोंमें	**अपि**	= भी
धनञ्जयः	= धनंजय अर्थात् तू,		
मुनीनाम्	= मुनियोंमें	**अहम्**	= मैं (ही)
व्यासः	= वेदव्यास (और)	**अस्मि**	= हूँ।

[दण्ड आदि विभूतियोंका कथन।]

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्॥ ३८ ॥

दण्डः, दमयताम्, अस्मि, नीतिः, अस्मि, जिगीषताम्, मौनम्, च, एव, अस्मि, गुह्यानाम्, ज्ञानम्, ज्ञानवताम्, अहम्॥ ३८ ॥

मैं—

दमयताम्	= दमन करनेवालोंका	**गुह्यानाम्**	= गुप्त रखनेयोग्य भावोंका (रक्षक)
दण्डः	= दण्ड अर्थात् दमन करनेकी शक्ति	**मौनम्**	= मौन
		अस्मि	= हूँ
		च	= और
अस्मि	= हूँ,	**ज्ञानवताम्**	= ज्ञानवानोंका
जिगीषताम्	= जीतनेकी इच्छावालोंकी	**ज्ञानम्**	= तत्त्वज्ञान
		अहम्	= मैं
नीतिः	= नीति	**एव**	= ही
अस्मि	= हूँ,	**(अस्मि)**	= हूँ।

* यादवोंके ही अन्तर्गत एक वृष्णिवंश भी था।

[सर्वरूपसे प्रभावसहित भगवान्‌के स्वरूपका कथन।]

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥ ३९॥

यत्, च, अपि, सर्वभूतानाम्, बीजम्, तत्, अहम्, अर्जुन, न, तत्, अस्ति, विना, यत्, स्यात्, मया, भूतम्, चराचरम्॥ ३९॥

च = और
अर्जुन = हे अर्जुन!
यत् = जो
सर्वभूतानाम् = सब भूतोंकी
बीजम् = उत्पत्तिका कारण है,
तत् = वह
अपि = भी
अहम् = मैं (ही हूँ; क्योंकि ऐसा)
तत् = वह
चराचरम् = चर और अचर (कोई भी)
भूतम् = भूत
न = नहीं
अस्ति = है,
यत् = जो
मया = मुझसे
विना = रहित
स्यात् = हो।

[भगवद्विभूतियोंकी अनन्तताका कथन।]

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥ ४०॥

न, अन्तः, अस्ति, मम, दिव्यानाम्, विभूतीनाम्, परन्तप, एषः, तु, उद्देशतः, प्रोक्तः, विभूतेः, विस्तरः, मया॥ ४०॥

परन्तप = हे परंतप!
मम = मेरी
दिव्यानाम् = दिव्य
विभूतीनाम् = विभूतियोंका
अन्तः = अन्त
न = नहीं
अस्ति = है,
मया = मैंने (अपनी)
विभूतेः = विभूतियोंका
एषः = यह
विस्तरः = विस्तार
तु = तो (तेरे लिये)
उद्देशतः = एकदेशसे अर्थात् संक्षेपसे
प्रोक्तः = कहा है।

[भगवान्‌के तेजके अंशसे सम्पूर्ण वस्तुओंकी उत्पत्तिका कथन।]

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥ ४१॥

यत्, यत्, विभूतिमत्, सत्त्वम्, श्रीमत्, ऊर्जितम्, एव, वा,
तत्, तत्, एव, अवगच्छ, त्वम्, मम्, तेजोंऽशसम्भवम्॥ ४१॥

इसलिये हे अर्जुन!—

यत् = जो
यत् = जो
एव = भी
विभूतिमत् = विभूतियुक्त अर्थात् ऐश्वर्ययुक्त,
श्रीमत् = कान्तियुक्त
वा = और
ऊर्जितम् = शक्तियुक्त
सत्त्वम् = वस्तु है,
तत् = उस-
तत् = उसको
त्वम् = तू
मम = मेरे
तेजोंऽश-सम्भवम्, एव = तेजके अंशकी ही अभिव्यक्ति
अवगच्छ = जान।

[भगवान्‌की योगशक्तिके एक अंशसे सम्पूर्ण जगत्‌की स्थितिका कथन।]

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥ ४२॥

अथवा, बहुना, एतेन, किम्, ज्ञातेन्, तव, अर्जुन,
विष्टभ्य, अहम्, इदम्, कृत्स्नम्, एकांशेन, स्थितः, जगत्॥ ४२॥

अथवा = अथवा
अर्जुन = हे अर्जुन!
एतेन = इस
बहुना = बहुत
ज्ञातेन = जाननेसे
तव = तेरा
किम् = क्या (प्रयोजन है)।
अहम् = मैं
इदम् = इस
कृत्स्नम् = सम्पूर्ण
जगत् = जगत्‌को (अपनी योगशक्तिके)
एकांशेन = एक अंशमात्रसे
विष्टभ्य = धारण करके
स्थितः = स्थित हूँ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः॥ १०॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

ॐ श्रीपरमात्मने नमः

अथैकादशोऽध्यायः

प्रधान-विषय—*१ से ४ तक विश्वरूपका दर्शन करानेके लिये अर्जुनकी प्रार्थना, (५—८) भगवान्‌द्वारा अपने विश्वरूपका वर्णन, (९—१४) धृतराष्ट्रके प्रति संजयद्वारा विश्वरूपका वर्णन, (१५—३१) अर्जुनद्वारा भगवान्‌के विश्वरूपका देखा जाना और उनकी स्तुति करना, (३२—३४) भगवान्‌द्वारा अपने प्रभावका वर्णन और युद्धके लिये अर्जुनको उत्साहित करना, (३५—४६) भयभीत हुए अर्जुनद्वारा भगवान्‌की स्तुति और चतुर्भुजरूपका दर्शन करानेके लिये प्रार्थना, (४७—५०) भगवान्‌द्वारा अपने विश्वरूपके दर्शनकी महिमाका कथन तथा चतुर्भुज और सौम्यरूपका दिखाया जाना, (५१—५५) बिना अनन्यभक्तिके चतुर्भुजरूपके दर्शनकी दुर्लभताका और फलसहित अनन्यभक्तिका कथन।*

[भगवान् और उनके उपदेशकी प्रशंसा कर विश्वरूपके दर्शन करानेके लिये अर्जुनकी प्रार्थना।]

अर्जुन उवाच

मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥ १॥

मदनुग्रहाय, परमम्, गुह्यम्, अध्यात्मसञ्ज्ञितम्, यत्, त्वया, उक्तम्, वचः, तेन, मोहः, अयम्, विगतः, मम॥ १॥

इस प्रकार भगवान्‌के वचन सुनकर अर्जुन बोले, हे भगवन्!—

मदनुग्रहाय = { मुझपर अनुग्रह करनेके लिये
त्वया = आपने
यत् = जो
परमम् = परम
गुह्यम् = गोपनीय
अध्यात्मसञ्ज्ञितम् = अध्यात्मविषयक
वचः = वचन अर्थात् उपदेश

उक्तम्	=	कहा,	**अयम्**	=	यह
तेन	=	उससे	**मोहः**	=	अज्ञान
मम	=	मेरा	**विगतः**	=	नष्ट हो गया है।

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्॥ २॥

भवाप्ययौ, हि, भूतानाम्, श्रुतौ, विस्तरशः, मया, त्वत्तः, कमलपत्राक्ष, माहात्म्यम्, अपि, च, अव्ययम्॥ २॥

हि	=	क्योंकि	**विस्तरशः**	=	विस्तारपूर्वक
कमलपत्राक्ष	=	हे कमलनेत्र!	**श्रुतौ**	=	सुने हैं
मया	=	मैंने	**च**	=	तथा (आपकी)
त्वत्तः	=	आपसे	**अव्ययम्**	=	अविनाशी
भूतानाम्	=	भूतोंकी	**माहात्म्यम्**	=	महिमा
भवाप्ययौ	=	उत्पत्ति और प्रलय	**अपि**	=	भी (सुनी है)।

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम॥ ३॥

एवम्, एतत्, यथा, आत्थ, त्वम्, आत्मानम्, परमेश्वर, द्रष्टुम्, इच्छामि, ते, रूपम्, ऐश्वरम्, पुरुषोत्तम॥ ३॥

परमेश्वर	=	हे परमेश्वर!	**ते**	=	आपके
त्वम्	=	आप	**ऐश्वरम्, रूपम्**	=	ज्ञान, ऐश्वर्य, शक्ति, बल, वीर्य और तेजसे युक्त ऐश्वर-रूपको (मैं प्रत्यक्ष)
आत्मानम्	=	अपनेको			
यथा	=	जैसा			
आत्थ	=	कहते हैं,			
एतत्	=	यह (ठीक)			
एवम् (एव)	=	ऐसा ही है, (परंतु)	**द्रष्टुम्**	=	देखना
पुरुषोत्तम	=	हे पुरुषोत्तम!	**इच्छामि**	=	चाहता हूँ।

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्॥ ४॥

मन्यसे, यदि, तत्, शक्यम्, मया, द्रष्टुम्, इति, प्रभो, योगेश्वर, ततः, मे, त्वम्, दर्शय, आत्मानम्, अव्ययम्॥ ४॥

इसलिये—

प्रभो = हे प्रभो!*
यदि = यदि
मया = मेरे द्वारा
तत् = आपका वह रूप
द्रष्टुम् = देखा जाना
शक्यम् = शक्य है—
इति = ऐसा
मन्यसे = आप मानते हैं,
ततः = तो
योगेश्वर = हे योगेश्वर!
त्वम् = आप
आत्मानम्, अव्ययम् = अपने उस अविनाशी स्वरूपका
मे = मुझे
दर्शय = दर्शन कराइये।

[भगवान्‌का अपने अंदर देवता, मनुष्य, पशु, पक्षी आदि समस्त चराचर प्राणियों तथा अनेक आश्चर्यप्रद दृश्योंसहित सम्पूर्ण जगत् देखनेकी आज्ञा देना तथा दिव्यदृष्टि प्रदान करनेका वचन देना।]

श्रीभगवानुवाच

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥ ५॥

पश्य, मे, पार्थ, रूपाणि, शतशः, अथ, सहस्रशः, नानाविधानि, दिव्यानि, नानावर्णाकृतीनि, च॥ ५॥

इस प्रकार अर्जुनके प्रार्थना करनेपर श्रीभगवान् बोले—

पार्थ = हे पार्थ!
अथ = अब (तू)
मे = मेरे
शतशः, सहस्रशः = सैकड़ों, हजारों
नानाविधानि = नाना प्रकारके
च = और
नानावर्णाकृतीनि = नाना वर्ण तथा नाना आकृतिवाले

* उत्पत्ति स्थिति और प्रलय तथा अन्तर्यामीरूपसे शासन करनेवाला होनेसे भगवान्‌का नाम "प्रभु" है।

दिव्यानि = अलौकिक
रूपाणि = रूपोंको
पश्य = देख

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत॥ ६॥

पश्य, आदित्यान्, वसून्, रुद्रान्, अश्विनौ, मरुतः, तथा, बहूनि, अदृष्टपूर्वाणि, पश्य, आश्चर्याणि, भारत॥ ६॥

और—

भारत = हे भरतवंशी अर्जुन! (मुझमें)
आदित्यान् = आदित्योंको अर्थात् अदितिके द्वादश पुत्रोंको,
वसून् = आठ वसुओंको,
रुद्रान् = एकादश रुद्रोंको,
अश्विनौ = दोनों अश्विनीकुमारोंको
(और)
मरुतः = उनचास मरुद्गणोंको
पश्य = देख
तथा = तथा (और भी)
बहूनि = बहुत-से
अदृष्टपूर्वाणि = पहले न देखे हुए
आश्चर्याणि = आश्चर्यमय रूपोंको
पश्य = देख।

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि॥ ७॥

इह, एकस्थम्, जगत्, कृत्स्नम्, पश्य, अद्य, सचराचरम्, मम, देहे, गुडाकेश, यत्, च, अन्यत्, द्रष्टुम्, इच्छसि॥ ७॥

और—

गुडाकेश* = हे अर्जुन!
अद्य = अब
इह = इस
मम = मेरे
देहे = शरीरमें
एकस्थम् = एक जगह स्थित
सचराचरम् = चराचरसहित
कृत्स्नम् = सम्पूर्ण
जगत् = जगत्को
पश्य = देख (तथा)
अन्यत् = और
च = भी

* निद्राको जीतनेवाला होनेसे अर्जुनका नाम "गुडाकेश" हुआ था।

यत् = जो (कुछ)
द्रष्टुम् = देखना
इच्छसि = चाहता हो, (सो देख)।

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥ ८॥

न, तु, माम्, शक्यसे, द्रष्टुम्, अनेन, एव, स्वचक्षुषा, दिव्यम्, ददामि, ते, चक्षुः, पश्य, मे, योगम्, ऐश्वरम्॥ ८॥

तु = परंतु
माम् = मुझको (तू)
अनेन = इन
स्वचक्षुषा = अपने प्राकृत नेत्रोंद्वारा
द्रष्टुम् = देखनेमें
एव = निःसंदेह
न, शक्यसे = समर्थ नहीं है;
(अतः) = इसीसे (मैं)
ते = तुझे
दिव्यम् = दिव्य अर्थात् अलौकिक
चक्षुः = चक्षु
ददामि = देता हूँ; (उससे तू)
मे = मेरी
ऐश्वरम् = ईश्वरीय
योगम् = योगशक्तिको
पश्य = देख।

[अर्जुनके प्रति भगवान्द्वारा अपने विश्वरूपका दिखाया जाना।]

सञ्जय उवाच

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्॥ ९॥

एवम्, उक्त्वा, ततः, राजन्, महायोगेश्वरः, हरिः, दर्शयामास, पार्थाय, परमम्, रूपम्, ऐश्वरम्॥ ९॥

संजय बोले—

राजन् = हे राजन्!
महायोगेश्वरः = महायोगेश्वर और
हरिः = सब पापोंके नाश करनेवाले भगवान्ने
एवम् = इस प्रकार
उक्त्वा = कहकर
ततः = उसके पश्चात्
पार्थाय = अर्जुनको

परमम्	= परम	**रूपम्**	= दिव्यस्वरूप
ऐश्वरम्	= ऐश्वर्ययुक्त	**दर्शयामास**	= दिखलाया।

[संजयद्वारा विश्वरूपका वर्णन।]

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११ ॥

अनेकवक्त्रनयनम्, अनेकाद्भुतदर्शनम्,
अनेकदिव्याभरणम्, दिव्यानेकोद्यतायुधम् ॥ १० ॥
दिव्यमाल्याम्बरधरम्, दिव्यगन्धानुलेपनम्,
सर्वाश्चर्यमयम्, देवम्, अनन्तम्, विश्वतोमुखम् ॥ ११ ॥

और उस—

अनेकवक्त्रनयनम्	= अनेक मुख और नेत्रोंसे युक्त	**दिव्यगन्धानुलेपनम्**	= दिव्य गन्धका सारे शरीरमें लेप किये हुए,
अनेकाद्भुतदर्शनम्	= अनेक अद्भुत दर्शनोंवाले	**सर्वाश्चर्यमयम्**	= सब प्रकारके आश्चर्योंसे युक्त
अनेकदिव्याभरणम्	= बहुत-से दिव्य भूषणोंसे युक्त (और)	**अनन्तम्**	= सीमारहित (और)
दिव्यानेकोद्यतायुधम्	= बहुत-से दिव्य शस्त्रोंको हाथोंमें उठाये हुए,	**विश्वतोमुखम्**	= सब ओर मुख किये हुए विराट्स्वरूप
दिव्यमाल्याम्बरधरम्	= दिव्य माला और वस्त्रोंको धारण किये हुए (और)	**देवम्**	= परमदेव परमेश्वरको (अर्जुनने देखा)

[विश्वरूपके प्रकाशकी महिमा।]

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः॥ १२॥

दिवि, सूर्यसहस्रस्य, भवेत्, युगपत्, उत्थिता, यदि, भाः, सदृशी, सा, स्यात्, भासः, तस्य, महात्मनः॥ १२॥

और हे राजन्!—

दिवि = आकाशमें
सूर्यसहस्रस्य = हजार सूर्योंके
युगपत् = एक साथ
उत्थिता = उदय होनेसे उत्पन्न (जो)
भाः = प्रकाश
भवेत् = हो,
सा = वह (भी)
तस्य = उस
महात्मनः = विश्वरूप परमात्माके
भासः = प्रकाशके
सदृशी = सदृश
यदि = कदाचित् (ही)
स्यात् = हो।

[अर्जुनका विश्वरूपमें सम्पूर्ण जगत्को एक जगह स्थित देखना।]

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥ १३॥

तत्र, एकस्थम्, जगत्, कृत्स्नम्, प्रविभक्तम्, अनेकधा, अपश्यत्, देवदेवस्य, शरीरे, पाण्डवः, तदा॥ १३॥

और—ऐसे आश्चर्यमय रूपको देखते हुए—

पाण्डवः = पाण्डुपुत्र अर्जुनने
तदा = उस समय
अनेकधा = अनेक प्रकारसे
प्रविभक्तम् = विभक्त अर्थात् पृथक्-पृथक्
कृत्स्नम् = सम्पूर्ण
जगत् = जगत्को
देवदेवस्य = देवोंके देव श्रीकृष्णभगवान्के
तत्र = उस
शरीरे = शरीरमें
एकस्थम् = एक जगह स्थित
अपश्यत् = देखा।

[उस रूपको देखकर अर्जुनका विस्मित और हर्षित होकर श्रद्धाके साथ भगवान्‌को प्रणाम करनेका कथन।]

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत॥ १४॥

ततः, सः, विस्मयाविष्टः, हृष्टरोमा, धनञ्जयः, प्रणम्य, शिरसा, देवम्, कृताञ्जलिः, अभाषत॥ १४॥

और—

ततः = उसके अनन्तर
सः = वह
विस्मयाविष्टः = आश्चर्यसे चकित (और)
हृष्टरोमा = पुलकित-शरीर
धनञ्जयः = अर्जुन
देवम् = प्रकाशमय विश्वरूप परमात्माको (श्रद्धा-भक्तिसहित)
शिरसा = सिरसे
प्रणम्य = प्रणाम करके
कृताञ्जलिः = हाथ जोड़कर
अभाषत = बोला।

[विश्वरूपमें देवता, ऋषि आदिको देखना।]

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान्।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान्॥ १५॥

पश्यामि, देवान्, तव, देव, देहे, सर्वान्, तथा, भूतविशेषसङ्घान्, ब्रह्माणम्, ईशम्, कमलासनस्थम्, ऋषीन्, च, सर्वान्, उरगान्, च, दिव्यान्॥ १५॥

अर्जुन बोले—

देव = हे देव! (मैं)
तव = आपके
देहे = शरीरमें
सर्वान् = सम्पूर्ण
देवान् = देवोंको
तथा = तथा

भूतविशेषसङ्घान्= अनेक भूतोंके समुदायोंको,
कमलासनस्थम्= कमलके आसनपर विराजित
ब्रह्माणम् = ब्रह्माको,
ईशम् = महादेवको
च = और
सर्वान् = सम्पूर्ण
ऋषीन् = ऋषियोंको
च = तथा
दिव्यान् = दिव्य
उरगान् = सर्पोंको
पश्यामि = देखता हूँ।

[विश्वरूपको अनेक बाहु और उदर आदिसे युक्त देखना।]

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनन्तरूपम्।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप॥ १६ ॥

अनेकबाहूदरवक्त्रनेत्रम्, पश्यामि, त्वाम्, सर्वतः, अनन्तरूपम्, न, अन्तम्, न, मध्यम्, न, पुनः, तव, आदिम्, पश्यामि, विश्वेश्वर, विश्वरूप॥ १६ ॥

और—

विश्वेश्वर = हे सम्पूर्ण विश्वके स्वामिन्!
त्वाम् = आपको
अनेकबाहूदर-वक्त्रनेत्रम् = अनेक भुजा, पेट, मुख और नेत्रोंसे युक्त (तथा)
सर्वतः = सब ओरसे
अनन्तरूपम् = अनन्त रूपोंवाला
पश्यामि = देखता हूँ।
विश्वरूप = हे विश्वरूप! (मैं)
तव = आपके
न = न
अन्तम् = अन्तको
पश्यामि = देखता हूँ,
न = न
मध्यम् = मध्यको
पुनः = और
न = न
आदिम् = आदिको (ही)।

[विश्वरूपको किरीट, गदा और चक्र आदिसे युक्त देखना।]

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम्।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ता-
द्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

किरीटिनम्, गदिनम्, चक्रिणम्, च, तेजोराशिम्, सर्वतः, दीप्तिमन्तम्, पश्यामि, त्वाम्, दुर्निरीक्ष्यम्, समन्तात्, दीप्तानलार्कद्युतिम्, अप्रमेयम् ॥ १७ ॥

और हे विष्णो!—

त्वाम् = आपको (मैं)
किरीटिनम् = मुकुटयुक्त,
गदिनम् = गदायुक्त
च = और
चक्रिणम् = चक्रयुक्त (तथा)
सर्वतः = सब ओरसे
दीप्तिमन्तम् = प्रकाशमान
तेजोराशिम् = तेजके पुंज,
दीप्तानलार्कद्युतिम् = प्रज्वलित अग्नि और सूर्यके सदृश ज्योतियुक्त,
दुर्निरीक्ष्यम् = कठिनतासे देखे जानेयोग्य (और)
समन्तात् = सब ओरसे
अप्रमेयम् = अप्रमेयस्वरूप
पश्यामि = देखता हूँ।

[विश्वरूपकी स्तुति]

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

त्वम्, अक्षरम्, परमम्, वेदितव्यम्, त्वम्, अस्य, विश्वस्य, परम्, निधानम्, त्वम्, अव्ययः, शाश्वतधर्मगोप्ता, सनातनः, त्वम्, पुरुषः, मतः, मे ॥ १८ ॥

इसलिये हे भगवन्!—

त्वम् = आप (ही)
वेदितव्यम् = जाननेयोग्य

परमम्	=	परम	**शाश्वतधर्मगोप्ता**	=	अनादि धर्मके रक्षक हैं (और)
अक्षरम्	=	अक्षर अर्थात् परब्रह्म परमात्मा हैं,			
त्वम्	=	आप (ही)	**त्वम्**	=	आप (ही)
अस्य	=	इस	**अव्ययः**	=	अविनाशी
विश्वस्य	=	जगत्के	**सनातनः**	=	सनातन
परम्	=	परम	**पुरुषः**	=	पुरुष हैं (ऐसा)
निधानम्	=	आश्रय हैं,	**मे**	=	मेरा
त्वम्	=	आप (ही)	**मतः**	=	मत है।

[अनन्त सामर्थ्य और प्रभावयुक्त विश्वरूपका दर्शन।]

अनादिमध्यान्तमनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम्।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम्॥ १९॥

अनादिमध्यान्तम्, अनन्तवीर्यम्, अनन्तबाहुम्, शशिसूर्यनेत्रम्, पश्यामि, त्वाम्, दीप्तहुताशवक्त्रम्, स्वतेजसा, विश्वम्, इदम्, तपन्तम्॥ १९॥

हे परमेश्वर! मैं—

त्वाम्	=	आपको	**दीप्तहुताशवक्त्रम्**	=	प्रज्वलित अग्निरूप मुखवाले (और)
अनादिमध्यान्तम्	=	आदि, अन्त और मध्यसे रहित,			
अनन्तवीर्यम्	=	अनन्त सामर्थ्यसे युक्त,	**स्वतेजसा**	=	अपने तेजसे
अनन्तबाहुम्	=	अनन्त भुजावाले	**इदम्**	=	इस
शशिसूर्यनेत्रम्	=	चन्द्र, सूर्यरूप नेत्रोंवाले,	**विश्वम्**	=	जगत्को
			तपन्तम्	=	संतप्त करते हुए
			पश्यामि	=	देखता हूँ।

[अद्भुत विराट्रूपसे सम्पूर्ण जगत्को व्याप्त देखना।]

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महात्मन्॥ २०॥

द्यावापृथिव्योः, इदम्, अन्तरम्, हि, व्याप्तम्, त्वया, एकेन, दिशः, च, सर्वाः, दृष्ट्वा, अद्भुतम्, रूपम्, उग्रम्, तव, इदम्, लोकत्रयम्, प्रव्यथितम्, महात्मन्॥ २०॥

और—

महात्मन्	= हे महात्मन्!	**व्याप्तम्**	= परिपूर्ण हैं; (तथा)
इदम्	= यह	**तव**	= आपके
द्यावापृथिव्योः, अन्तरम्	= स्वर्ग और पृथ्वीके बीचका सम्पूर्ण आकाश	**इदम्**	= इस
		अद्भुतम्	= अलौकिक और
च	= तथा	**उग्रम्**	= भयंकर
सर्वाः	= सब	**रूपम्**	= रूपको
दिशः	= दिशाएँ	**दृष्ट्वा**	= देखकर
एकेन	= एक	**लोकत्रयम्**	= तीनों लोक
त्वया	= आपसे	**प्रव्यथितम्**	= अति व्यथाको प्राप्त हो रहे हैं।
हि	= ही		

[विश्वरूपमें प्रवेश करते हुए देवादिकोंका और स्तुति करते हुए महर्षि आदिकोंका दर्शन।]

अमी हि त्वां सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥ २१॥

अमी, हि, त्वाम्, सुरसङ्घाः, विशन्ति, केचित्, भीताः, प्राञ्जलयः, गृणन्ति, स्वस्ति, इति, उक्त्वा, महर्षिसिद्धसङ्घाः, स्तुवन्ति, त्वाम्, स्तुतिभिः, पुष्कलाभिः ॥ २१ ॥

और हे गोविन्द!—

अमी = वे ही
सुरसङ्घाः, हि = देवताओंके समूह
त्वाम् = आपमें
विशन्ति = प्रवेश करते हैं (और)
केचित् = कुछ
भीताः = भयभीत होकर
प्राञ्जलयः = हाथ जोड़े (आपके नाम और गुणोंका)
गृणन्ति = उच्चारण करते हैं (तथा)
महर्षिसिद्धसङ्घाः = महर्षि और सिद्धोंके समुदाय
स्वस्ति = 'कल्याण हो'
इति = ऐसा
उक्त्वा = कहकर
पुष्कलाभिः = उत्तम-उत्तम
स्तुतिभिः = स्तोत्रोंद्वारा
त्वाम् = आपकी
स्तुवन्ति = स्तुति करते हैं।

[विश्वरूपको देखते हुए विस्मययुक्त रुद्रादिकोंका दर्शन।]

रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसङ्घा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

रुद्रादित्याः, वसवः, ये, च, साध्याः, विश्वे, अश्विनौ, मरुतः, च, ऊष्मपाः, च, गन्धर्वयक्षासुरसिद्धसङ्घाः, वीक्षन्ते, त्वाम्, विस्मिताः, च, एव, सर्वे ॥ २२ ॥

और हे परमेश्वर!—

ये = जो
रुद्रादित्याः = ग्यारह रुद्र और बारह आदित्य
च = तथा
वसवः = आठ वसु,
साध्याः = साध्यगण,
विश्वे = विश्वेदेव,
अश्विनौ = अश्विनीकुमार

च = तथा
मरुतः = मरुद्गण
च = और
ऊष्मपाः = पितरोंका समुदाय
च = तथा
गन्धर्वयक्षासुर-सिद्धसङ्घाः = गन्धर्व, यक्ष, राक्षस और सिद्धोंके समुदाय हैं—
(ते) = वे
सर्वे = सब
एव = ही
विस्मिताः = विस्मित होकर
त्वाम् = आपको
वीक्षन्ते = देखते हैं।

[भगवान्‌के भयंकर रूपको देखकर अर्जुनका भयभीत होना।]

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम्।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्॥ २३॥

रूपम्, महत्, ते, बहुवक्त्रनेत्रम्, महाबाहो, बहुबाहूरुपादम्, बहूदरम्, बहुदंष्ट्राकरालम्, दृष्ट्वा, लोकाः, प्रव्यथिताः, तथा, अहम्॥ २३॥

और—

महाबाहो = हे महाबाहो
ते = आपके
बहुवक्त्रनेत्रम् = बहुत मुख और नेत्रोंवाले
बहुबाहूरुपादम् = बहुत हाथ, जंघा और पैरोंवाले
बहूदरम् = बहुत उदरोंवाले (और)
बहुदंष्ट्राकरालम् = बहुत-सी दाढ़ोंके कारण अत्यन्त विकराल
महत् = महान्
रूपम् = रूपको
दृष्ट्वा = देखकर
लोकाः = सब लोग
प्रव्यथिताः = व्याकुल हो रहे हैं
तथा = तथा
अहम् = मैं
(अपि) = भी (व्याकुल हो रहा हूँ)।

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो॥ २४॥

नभःस्पृशम्, दीप्तम्, अनेकवर्णम्, व्यात्ताननम्, दीप्तविशालनेत्रम्, दृष्ट्वा, हि, त्वाम्, प्रव्यथितान्तरात्मा, धृतिम्, न, विन्दामि, शमम्, च, विष्णो॥ २४॥

हि = क्योंकि
विष्णो = हे विष्णो!
नभःस्पृशम् = आकाशको स्पर्श करनेवाले,
दीप्तम् = देदीप्यमान,
अनेकवर्णम् = अनेक वर्णोंसे युक्त (तथा)
व्यात्ताननम् = फैलाये हुए मुख (और)
दीप्तविशालनेत्रम् = प्रकाशमान विशाल नेत्रोंसे युक्त
त्वाम् = आपको
दृष्ट्वा = देखकर
प्रव्यथितान्तरात्मा = भयभीत अन्तः-करणवाला (मैं)
धृतिम् = धीरज
च = और
शमम् = शान्ति
न = नहीं
विन्दामि = पाता हूँ।

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास॥ २५॥

दंष्ट्राकरालानि, च, ते, मुखानि, दृष्ट्वा, एव, कालानलसन्निभानि, दिशः, न, जाने, न, लभे, च, शर्म, प्रसीद, देवेश, जगन्निवास॥ २५॥

और हे भगवन्!—

दंष्ट्राकरालानि = दाढ़ोंके कारण विकराल
च = और

कालानल-सन्निभानि	= प्रलयकालकी अग्निके समान प्रज्वलित	**च**	= और
		शर्म	= सुख
		एव	= भी
ते	= आपके	**न**	= नहीं
मुखानि	= मुखोंको	**लभे**	= पाता हूँ। (इसलिये)
दृष्ट्वा	= देखकर (मैं)	**देवेश**	= हे देवेश!
दिशः	= दिशाओंको	**जगन्निवास**	= हे जगन्निवास! (आप)
न	= नहीं		
जाने	= जानता हूँ	**प्रसीद**	= प्रसन्न हों।

[दोनों सेनाओंके योद्धाओंको विराट्-स्वरूपके मुखमें प्रवेश होकर नष्ट होते हुए देखना।]

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसङ्घैः।
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः॥ २६॥
वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि।
केचिद्विलग्ना दशनान्तरेषु
सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः॥ २७॥

अमी, च, त्वाम्, धृतराष्ट्रस्य, पुत्राः, सर्वे, सह, एव, अवनिपालसङ्घैः, भीष्मः, द्रोणः, सूतपुत्रः, तथा, असौ, सह, अस्मदीयैः, अपि, योधमुख्यैः॥ २६॥
वक्त्राणि, ते, त्वरमाणाः, विशन्ति, दंष्ट्राकरालानि, भयानकानि, केचित्, विलग्नाः, दशनान्तरेषु, संदृश्यन्ते, चूर्णितैः, उत्तमाङ्गैः॥ २७॥

और मैं देखता हूँ कि—

अमी	= वे	सह	= सहित (सब-के-सब)
सर्वे, एव	= सभी	ते	= आपके
धृतराष्ट्रस्य	= धृतराष्ट्रके	दंष्ट्राकरालानि	= दाढ़ोंके कारण विकराल
पुत्राः	= पुत्र	भयानकानि	= भयानक
अवनिपालसङ्घैः, सह	= राजाओंके समुदायसहित	वक्त्राणि	= मुखोंमें
त्वाम्	= आपमें	त्वरमाणाः	= बड़े वेगसे दौड़ते हुए
(प्रविशन्ति)	= प्रवेश कर रहे हैं	विशन्ति	= प्रवेश कर रहे हैं (और)
च	= और	केचित्	= कई एक
भीष्मः	= भीष्मपितामह,	चूर्णितैः	= चूर्ण हुए
द्रोणः	= द्रोणाचार्य	उत्तमाङ्गैः	= सिरोंसहित (आपके)
तथा	= तथा	दशनान्तरेषु	= दाँतोंके बीचमें
असौ	= वह	विलग्नाः	= लगे हुए
सूतपुत्रः	= कर्ण (और)	सन्दृश्यन्ते	= दीख रहे हैं।
अस्मदीयैः	= हमारे पक्षके		
अपि	= भी		
योधमुख्यैः	= प्रधान योद्धाओंके		

[नदी और समुद्रके दृष्टान्तसे प्रवेशके दृश्यका कथन।]

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति॥ २८॥

यथा, नदीनाम्, बहवः, अम्बुवेगाः, समुद्रम्, एव, अभिमुखाः, द्रवन्ति, तथा, तव, अमी, नरलोकवीराः, विशन्ति, वक्त्राणि, अभिविज्वलन्ति॥ २८॥

और हे विश्वमूर्ते!—

यथा	= जैसे	नदीनाम्	= नदियोंके

बहवः = बहुत-से
अम्बुवेगाः = जलके प्रवाह (स्वाभाविक ही)
समुद्रम् = समुद्रके
एव = ही
अभिमुखाः = सम्मुख
द्रवन्ति = दौड़ते हैं अर्थात् समुद्रमें प्रवेश करते हैं,
तथा = वैसे ही
अमी = वे
नरलोकवीराः = नरलोकके वीर (भी)
तव = आपके
अभिविज्वलन्ति = प्रज्वलित
वक्त्राणि = मुखोंमें
विशन्ति = प्रवेश कर रहे हैं।

[दीपक और पतंगके दृष्टान्तसे नाशके दृश्यका कथन।]

यथा प्रदीप्तं ज्वलनं पतङ्गा
विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः॥ २९॥

यथा, प्रदीप्तम्, ज्वलनम्, पतङ्गाः, विशन्ति, नाशाय, समृद्धवेगाः, तथा, एव, नाशाय, विशन्ति, लोकाः, तव, अपि, वक्त्राणि, समृद्धवेगाः॥ २९॥

अथवा—

यथा = जैसे
पतङ्गाः = पतंग (मोहवश)
नाशाय = नष्ट होनेके लिये
प्रदीप्तम् = प्रज्वलित
ज्वलनम् = अग्निमें
समृद्धवेगाः = अति वेगसे दौड़ते हुए
विशन्ति = प्रवेश करते हैं,
तथा = वैसे
एव = ही (ये)
लोकाः = सब लोग
अपि = भी
नाशाय = अपने नाशके लिये
तव = आपके
वक्त्राणि = मुखोंमें
समृद्धवेगाः = अति वेगसे दौड़ते हुए
विशन्ति = प्रवेश कर रहे हैं।

[सब लोकोंको ग्रसन करते हुए तेजोमय भयानक विश्वरूपका वर्णन।]

लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो॥ ३० ॥

लेलिह्यसे, ग्रसमानः, समन्तात्, लोकान्, समग्रान्, वदनैः, ज्वलद्भिः, तेजोभिः, आपूर्य, जगत्, समग्रम्, भासः, तव, उग्राः, प्रतपन्ति, विष्णो॥ ३० ॥

और आप उन—

समग्रान्	=	सम्पूर्ण	**तव**	=	आपका
लोकान्	=	लोकोंको	**उग्राः**	=	उग्र
ज्वलद्भिः	=	प्रज्वलित	**भासः**	=	प्रकाश
वदनैः	=	मुखोंद्वारा	**समग्रम्**	=	सम्पूर्ण
ग्रसमानः	=	ग्रास करते हुए	**जगत्**	=	जगत्को
समन्तात्	=	सब ओरसे	**तेजोभिः**	=	तेजके द्वारा
लेलिह्यसे	=	बार-बार चाट रहे हैं,	**आपूर्य**	=	परिपूर्ण करके
विष्णो	=	हे विष्णो !	**प्रतपन्ति**	=	तपा रहा है।

[उग्ररूपधारी भगवान्को तत्त्वसे जाननेके लिये अर्जुनका प्रश्न।]

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम्॥ ३१ ॥

आख्याहि, मे, कः, भवान्, उग्ररूपः, नमः, अस्तु, ते, देववर,प्रसीद, विज्ञातुम्, इच्छामि, भवन्तम्, आद्यम्, न, हि, प्रजानामि, तव, प्रवृत्तिम्॥ ३१ ॥

हे भगवन्! कृपा करके—

मे	=	मुझे	**आद्यम्**	=	आदिपुरुष
आख्याहि	=	बतलाइये (कि)	**भवन्तम्**	=	आपको (मैं)
भवान्	=	आप			
उग्ररूपः	=	उग्ररूपवाले	**विज्ञातुम्**	=	विशेषरूपसे जानना
कः	=	कौन हैं?	**इच्छामि**	=	चाहता हूँ;
देववर	=	हे देवोंमें श्रेष्ठ!	**हि**	=	क्योंकि (मैं)
ते	=	आपको	**तव**	=	आपकी
नमः	=	नमस्कार	**प्रवृत्तिम्**	=	प्रवृत्तिको
अस्तु	=	हो। (आप)	**न**	=	नहीं
प्रसीद	=	प्रसन्न होइये।	**प्रजानामि**	=	जानता।

['लोकोंको नष्ट करनेके लिये प्रवृत्त हुआ मैं महाकाल हूँ' इत्यादि वचनोंद्वारा भगवान्‌का उत्तर।]

श्रीभगवानुवाच

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः॥ ३२॥

कालः, अस्मि, लोकक्षयकृत्, प्रवृद्धः, लोकान्, समाहर्तुम्, इह, प्रवृत्तः, ऋते, अपि, त्वाम्, न, भविष्यन्ति, सर्वे, ये, अवस्थिताः, प्रत्यनीकेषु, योधाः॥ ३२॥

इस प्रकार अर्जुनके पूछनेपर श्रीभगवान् बोले, हे अर्जुन! मैं—

लोकक्षयकृत्	=	लोकोंका नाश करनेवाला	**लोकान्**	=	इन लोकोंको
			समाहर्तुम्	=	नष्ट करनेके लिये
प्रवृद्धः	=	बढ़ा हुआ	**प्रवृत्तः**	=	प्रवृत्त हुआ हूँ। (इसलिये)
कालः	=	महाकाल			
अस्मि	=	हूँ।	**ये**	=	जो
इह	=	इस समय	**प्रत्यनीकेषु**	=	प्रतिपक्षियोंकी सेनामें

अवस्थिताः = स्थित
योधाः = योद्धा लोग हैं,
(ते) = वे
सर्वे = सब
त्वाम् = तेरे
ऋते = बिना
अपि = भी
न = नहीं
भविष्यन्ति = रहेंगे अर्थात् तेरे युद्ध न करनेसे भी इन सबका नाश हो जायगा।

[निमित्तमात्र होकर युद्ध करनेके लिये अर्जुनके प्रति भगवान्‌की आज्ञा।]

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम्।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन्॥ ३३॥

तस्मात्, त्वम्, उत्तिष्ठ, यशः, लभस्व, जित्वा, शत्रून्, भुङ्क्ष्व, राज्यम्, समृद्धम्, मया, एव, एते, निहताः, पूर्वम्, एव, निमित्तमात्रम्, भव, सव्यसाचिन्॥ ३३॥

तस्मात् = अतएव
त्वम् = तू
उत्तिष्ठ = उठ!
यशः = यश
लभस्व = प्राप्त कर (और)
शत्रून् = शत्रुओंको
जित्वा = जीतकर
समृद्धम् = धन-धान्यसे सम्पन्न
राज्यम् = राज्यको
भुङ्क्ष्व = भोग।
एते = ये सब (शूरवीर)
पूर्वम्, एव = पहलेहीसे
मया = मेरे ही द्वारा
निहताः = मारे हुए हैं।
सव्यसाचिन् = हे सव्यसाचिन्!*
निमित्तमात्रम्, एव = तू तो केवल निमित्तमात्र
भव = बन जा।

* बायें हाथसे भी बाण चलानेका अभ्यास होनेसे अर्जुनका नाम "सव्यसाची" हुआ था।

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान्॥ ३४॥

द्रोणम्, च, भीष्मम्, च, जयद्रथम्, च, कर्णम्, तथा, अन्यान्, अपि, योधवीरान्, मया, हतान्, त्वम्, जहि, मा, व्यथिष्ठाः, युध्यस्व, जेतासि, रणे, सपत्नान्॥ ३४॥

तथा इन—

द्रोणम्	= द्रोणाचार्य	**हतान्**	= मारे हुए
च	= और	**योधवीरान्**	= शूरवीर योद्धाओंको
भीष्मम्	= भीष्मपितामह	**त्वम्**	= तू
च	= तथा	**जहि**	= मार।
जयद्रथम्	= जयद्रथ	**मा, व्यथिष्ठाः**	= भय मत कर। (निःसंदेह तू)
च	= और		
कर्णम्	= कर्ण	**रणे**	= युद्धमें
तथा	= तथा	**सपत्नान्**	= वैरियोंको
अन्यान्, अपि	= और भी बहुत-से	**जेतासि**	= जीतेगा। (इसलिये)
मया	= मेरे द्वारा	**युध्यस्व**	= युद्ध कर।

[भगवान्‌के वचनोंको सुनकर अर्जुनका भयभीत और गद्‌गद होना।]

सञ्जय उवाच

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्‌गदं भीतभीतः प्रणम्य॥ ३५॥

एतत्, श्रुत्वा, वचनम्, केशवस्य, कृताञ्जलिः, वेपमानः, किरीटी, नमस्कृत्वा, भूयः, एव, आह, कृष्णम्, सगद्‌गदम्, भीतभीतः, प्रणम्य॥ ३५॥

इसके पश्चात् संजय बोले, हे राजन्!—

केशवस्य = केशवभगवान्के
एतत् = इस
वचनम् = वचनको
श्रुत्वा = सुनकर
किरीटी = मुकुटधारी अर्जुन
कृताञ्जलिः = हाथ जोड़कर
वेपमानः = काँपता हुआ
नमस्कृत्वा = नमस्कार करके,
भूयः = फिर
एव = भी
भीतभीतः = अत्यन्त भयभीत होकर
प्रणम्य = प्रणाम करके
कृष्णम् = भगवान् श्रीकृष्णके प्रति
सगद्गदम् = गद्गद वाणीसे
आह = बोला—

[भगवान्के महत्त्वका वर्णन।]

अर्जुन उवाच

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥ ३६ ॥

स्थाने, हृषीकेश, तव, प्रकीर्त्या, जगत्, प्रहृष्यति, अनुरज्यते, च, रक्षांसि, भीतानि, दिशः, द्रवन्ति, सर्वे, नमस्यन्ति, च, सिद्धसङ्घाः ॥ ३६ ॥

अर्जुन बोले—

हृषीकेश = हे अन्तर्यामिन्!
स्थाने = यह योग्य ही है (कि)
तव = आपके
प्रकीर्त्या = नाम-गुण और प्रभावके कीर्तनसे
जगत् = जगत्
प्रहृष्यति = अति हर्षित हो रहा है
च = और
अनुरज्यते = अनुरागको भी प्राप्त हो रहा है (तथा)
भीतानि = भयभीत
रक्षांसि = राक्षसलोग

दिशः	= दिशाओंमें	**सर्वे**	= सब
द्रवन्ति	= भाग रहे हैं	**सिद्धसङ्घाः**	= सिद्धगणोंके समुदाय
च	= और	**नमस्यन्ति**	= नमस्कार कर रहे हैं।

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत्॥ ३७॥

कस्मात्, च, ते, न, नमेरन्, महात्मन्, गरीयसे, ब्रह्मणः, अपि, आदिकर्त्रे, अनन्त, देवेश, जगन्निवास, त्वम्, अक्षरम्, सत्, असत्, तत्परम्, यत्॥ ३७॥

महात्मन्	= हे महात्मन्!	**देवेश**	= हे देवेश!
ब्रह्मणः	= ब्रह्माके	**जगन्निवास**	= हे जगन्निवास!
अपि	= भी	**यत्**	= जो
आदिकर्त्रे	= आदिकर्ता	**सत्**	= सत्,
च	= और	**असत्**	= असत् (और)
गरीयसे	= सबसे बड़े	**तत्परम्**	= उनसे परे
ते	= आपके लिये (ये)	**अक्षरम्**	= अक्षर अर्थात् सच्चिदानन्दघन ब्रह्म हैं,
कस्मात्	= कैसे	**(तत्)**	= वह
न, नमेरन्	= नमस्कार न करें (क्योंकि)	**त्वम्**	= आप (ही हैं)।
अनन्त	= हे अनन्त!		

[अनन्तरूप परमेश्वरकी स्तुति और बारम्बार नमस्कार।]

त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम्।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप॥ ३८॥

त्वम्, आदिदेवः, पुरुषः, पुराणः, त्वम्, अस्य, विश्वस्य, परम्, निधानम्, वेत्ता, असि, वेद्यम्, च, परम्, च, धाम, त्वया, ततम्, विश्वम्, अनन्तरूप॥ ३८॥

हे प्रभो!—

त्वम्	= आप	**च**	= तथा
आदिदेवः	= आदिदेव (और)	**वेद्यम्**	= जाननेयोग्य (और)
पुराणः	= सनातन	**परम्**	= परम
पुरुषः	= पुरुष हैं,	**धाम**	= धाम
त्वम्	= आप	**असि**	= हैं।
अस्य	= इस	**अनन्तरूप**	= हे अनन्तरूप!
विश्वस्य	= जगत्के	**त्वया**	= आपसे (यह सब)
परम्	= परम	**विश्वम्**	= जगत्
निधानम्	= आश्रय		
च	= और	**ततम्**	= व्याप्त अर्थात् परिपूर्ण है।
वेत्ता	= जाननेवाले		

वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते॥ ३९॥

वायुः, यमः, अग्निः, वरुणः, शशाङ्कः, प्रजापतिः, त्वम्, प्रपितामहः, च, नमः, नमः, ते, अस्तु, सहस्रकृत्वः, पुनः, च, भूयः, अपि, नमः, नमः, ते॥ ३९॥

और हे हरे!—

त्वम्	= आप	**वरुणः**	= वरुण,
वायुः	= वायु,	**शशाङ्कः**	= चन्द्रमा,
यमः	= यमराज,	**प्रजापतिः**	= प्रजाके स्वामी ब्रह्मा
अग्निः	= अग्नि,	**च**	= और

प्रपितामहः	= ब्रह्माके भी पिता हैं।	**ते**	= आपके लिये
ते	= आपके लिये	**भूयः**	= फिर
सहस्रकृत्वः	= हजारों बार	**अपि**	= भी
नमः	= नमस्कार!	**पुनः, च**	= बार-बार
नमः	= नमस्कार	**नमः**	= नमस्कार!
अस्तु	= हो!!	**नमः**	= नमस्कार!!

[सब ओरसे भगवान्‌को नमस्कार।]

नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४० ॥

नमः, पुरस्तात्, अथ, पृष्ठतः, ते, नमः, अस्तु, ते, सर्वतः, एव, सर्व, अनन्तवीर्य, अमितविक्रमः, त्वम्, सर्वम्, समाप्नोषि, ततः, असि, सर्वः ॥ ४० ॥

और—

अनन्तवीर्य	= हे अनन्त सामर्थ्यवाले!	**नमः**	= नमस्कार
ते	= आपके लिये	**अस्तु**	= हो। (क्योंकि)
पुरस्तात्	= आगेसे	**अमितविक्रमः**	= अनन्त पराक्रमशाली
अथ	= और		
पृष्ठतः	= पीछेसे भी	**त्वम्**	= आप
नमः	= नमस्कार।	**सर्वम्**	= सब संसारको
सर्व	= हे सर्वात्मन्!	**समाप्नोषि**	= व्याप्त किये हुए हैं,
ते	= आपके लिये	**ततः**	= इससे (आप ही)
सर्वतः	= सब ओरसे	**सर्वः**	= सर्वरूप
एव	= ही	**असि**	= हैं।

[अपराधके लिये अर्जुनकी क्षमा-प्रार्थना।]

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि॥ ४१॥
यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम्॥ ४२॥

सखा, इति, मत्वा, प्रसभम्, यत्, उक्तम्, हे कृष्ण, हे यादव, हे सखे, इति, अजानता, महिमानम्, तव, इदम्, मया, प्रमादात्, प्रणयेन, वा, अपि॥ ४१॥

यत्, च, अवहासार्थम्, असत्कृतः, असि, विहारशय्यासनभोजनेषु, एकः, अथवा, अपि, अच्युत, तत्समक्षम्, तत्, क्षामये, त्वाम्, अहम्, अप्रमेयम्॥ ४२॥

हे परमेश्वर!—

तव	= आपके	**मया**	= मैंने
इदम्	= इस	**हे कृष्ण**	= 'हे कृष्ण!',
महिमानम्	= प्रभावको	**हे यादव**	= 'हे यादव!',
अजानता	= न जानते हुए (आप मेरे)	**हे सखे**	= 'हे सखे!'
सखा	= सखा हैं,	**इति**	= इस प्रकार
इति	= ऐसा	**यत्**	= जो (कुछ बिना सोचे-समझे)
मत्वा	= मानकर	**प्रसभम्**	= हठात्
प्रणयेन	= प्रेमसे	**उक्तम्**	= कहा है
वा	= अथवा	**च**	= और
प्रमादात्	= प्रमादसे	**अच्युत**	= हे अच्युत! (आप)
अपि	= भी	**यत्**	= जो (मेरे द्वारा)

अवहासार्थम् = विनोदके लिये
विहार-शय्यासन-भोजनेषु = विहार, शय्या, आसन और भोजनादिमें
एकः = अकेले
अथवा = अथवा
तत्समक्षम् = उन सखाओंके सामने
अपि = भी
असत्कृतः = अपमानित किये गये
असि = हैं—
तत् = वह (सब अपराध)
अप्रमेयम् = अप्रमेयस्वरूप अर्थात् अचिन्त्य प्रभाववाले
त्वाम् = आपसे
अहम् = मैं
क्षामये = क्षमा करवाता हूँ।

[भगवान्‌के अतिशय प्रभावका कथन।]

पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥

पिता, असि, लोकस्य, चराचरस्य, त्वम्, अस्य, पूज्यः, च, गुरुः, गरीयान्, न, त्वत्समः, अस्ति, अभ्यधिकः, कुतः, अन्यः, लोकत्रये, अपि, अप्रतिमप्रभाव ॥ ४३ ॥

हे विश्वेश्वर!—

त्वम् = आप
अस्य = इस
चराचरस्य = चराचर
लोकस्य = जगत्‌के
पिता = पिता
च = और
गरीयान् = सबसे बड़े
गुरुः = गुरु (एवं)
पूज्यः = अति पूजनीय
असि = हैं,
अप्रतिमप्रभाव = हे अनुपम प्रभाववाले!
लोकत्रये = तीनों लोकोंमें
त्वत्समः = आपके समान
अपि = भी
अन्यः = दूसरा कोई
न = नहीं
अस्ति = है, (फिर)
अभ्यधिकः = अधिक (तो)
कुतः = कैसे हो सकता है?

[प्रसन्न होने एवं अपराध सहनेके लिये अर्जुनकी प्रार्थना।]

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम्॥ ४४॥

तस्मात्, प्रणम्य, प्रणिधाय, कायम्, प्रसादये, त्वाम्, अहम्, ईशम्, ईड्यम्, पिता, इव, पुत्रस्य, सखा, इव, सख्युः, प्रियः, प्रियायाः, अर्हसि, देव, सोढुम्॥ ४४॥

तस्मात् = अतएव (प्रभो!)
अहम् = मैं
कायम् = शरीरको
प्रणिधाय = भलीभाँति चरणोंमें निवेदित कर,
प्रणम्य = प्रणाम करके,
ईड्यम् = स्तुति करनेयोग्य
त्वाम् = आप
ईशम् = ईश्वरको
प्रसादये = प्रसन्न होनेके लिये प्रार्थना करता हूँ।
देव = हे देव!
पिता = पिता
इव = जैसे
पुत्रस्य = पुत्रके,
सखा = सखा
इव = जैसे
सख्युः = सखाके (और)
प्रियः = पति
(इव) = जैसे
प्रियायाः = प्रियतमा पत्नीके (अपराध सहन करते हैं, वैसे ही आप भी मेरे अपराधको)
सोढुम् = सहन करने
अर्हसि = योग्य हैं।

[चतुर्भुजरूप दिखलाने-हेतु अर्जुनकी प्रार्थना।]

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे।
तदेव मे दर्शय देवरूपं
प्रसीद देवेश जगन्निवास॥ ४५॥

अदृष्टपूर्वम्, हृषितः, अस्मि, दृष्ट्वा, भयेन, च, प्रव्यथितम्, मनः, मे, तत्, एव, मे, दर्शय, देवरूपम्, प्रसीद, देवेश, जगन्निवास ॥ ४५ ॥

हे विश्वमूर्ते! मैं—

अदृष्टपूर्वम् = पहले न देखे हुए आपके इस आश्चर्यमय रूपको

दृष्ट्वा = देखकर
हृषितः = हर्षित
अस्मि = हो रहा हूँ
च = और
मे = मेरा
मनः = मन
भयेन = भयसे

प्रव्यथितम् = अति व्याकुल भी हो रहा है; (इसलिये आप)

तत् = उस (अपने)
देवरूपम् = चतुर्भुज विष्णुरूपको
एव = ही
मे = मुझे
दर्शय = दिखलाइये।
देवेश = हे देवेश!
जगन्निवास = हे जगन्निवास!
प्रसीद = प्रसन्न होइये।

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

किरीटिनम्, गदिनम्, चक्रहस्तम्, इच्छामि, त्वाम्, द्रष्टुम्, अहम्, तथा, एव, तेन, एव, रूपेण, चतुर्भुजेन, सहस्रबाहो, भव, विश्वमूर्ते ॥ ४६ ॥

और हे विष्णो!—

अहम् = मैं
तथा = वैसे
एव = ही
त्वाम् = आपको

किरीटिनम् = मुकुट धारण किये हुए (तथा)

गदिनम्, चक्रहस्तम् = गदा और चक्र हाथमें लिये हुए

द्रष्टुम् = देखना
इच्छामि = चाहता हूँ,
(अतः) = इसलिये
विश्वमूर्ते = हे विश्वस्वरूप!
सहस्रबाहो = हे सहस्रबाहो! (आप)
तेन एव = उसी
चतुर्भुजेन रूपेण = चतुर्भुजरूपसे (प्रकट)
भव = होइये।

[भगवान्द्वारा अपने विश्वरूपकी प्रशंसा।]

श्रीभगवानुवाच

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात्।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम्॥ ४७॥

मया, प्रसन्नेन, तव, अर्जुन, इदम्, रूपम्, परम्, दर्शितम्, आत्मयोगात्, तेजोमयम्, विश्वम्, अनन्तम्, आद्यम्, यत्, मे, त्वदन्येन, न, दृष्टपूर्वम्॥ ४७॥

इस प्रकार अर्जुनकी प्रार्थनाको सुनकर श्रीभगवान् बोले—

अर्जुन = हे अर्जुन!
प्रसन्नेन = अनुग्रहपूर्वक
मया = मैंने
आत्मयोगात् = अपनी योग-शक्तिके प्रभावसे
इदम् = यह
मे = मेरा
परम् = परम
तेजोमयम् = तेजोमय
आद्यम् = सबका आदि (और)
अनन्तम् = सीमारहित
विश्वम् = विराट्
रूपम् = रूप
तव = तुझको
दर्शितम् = दिखलाया है,
यत् = जिसे
त्वदन्येन = तेरे अतिरिक्त दूसरे किसीने
न दृष्टपूर्वम् = पहले नहीं देखा था।

न वेदयज्ञाध्ययनैर्न दानै-
र्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

न, वेदयज्ञाध्ययनैः, न, दानैः, न, च, क्रियाभिः, न, तपोभिः, उग्रैः, एवंरूपः, शक्यः, अहम्, नृलोके, द्रष्टुम्, त्वदन्येन, कुरुप्रवीर ॥ ४८ ॥

कुरुप्रवीर	= हे अर्जुन!	**न**	= न
नृलोके	= मनुष्यलोकमें	**क्रियाभिः**	= क्रियाओंसे
एवंरूपः	= इस प्रकार विश्वरूपवाला	**च**	= और
		न	= न
अहम्	= मैं	**उग्रैः**	= उग्र
न	= न	**तपोभिः**	= तपोंसे (ही)
वेदयज्ञाध्ययनैः	= वेद और यज्ञोंके अध्ययनसे,	**त्वदन्येन**	= तेरे अतिरिक्त दूसरेके द्वारा
न	= न	**द्रष्टुम्**	= देखा जा
दानैः	= दानसे,	**शक्यः**	= सकता हूँ।

[अर्जुनको धीरज देकर अपना चतुर्भुजरूप दिखाना ।]

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

मा, ते, व्यथा, मा, च, विमूढभावः, दृष्ट्वा, रूपम्, घोरम्, ईदृक्, मम, इदम्, व्यपेतभीः, प्रीतमनाः, पुनः, त्वम्, तत्, एव, मे, रूपम्, इदम्, प्रपश्य ॥ ४९ ॥

मम	=	मेरे	**त्वम्**	=	तू
ईदृक्	=	इस प्रकारके	**व्यपेतभीः**	=	भयरहित (और)
इदम्	=	इस	**प्रीतमनाः**	=	प्रीतियुक्त मनवाला होकर
घोरम्	=	विकराल			
रूपम्	=	रूपको	**तत्, एव**	=	उसी
दृष्ट्वा	=	देखकर	**मे**	=	मेरे
ते	=	तुझको	**इदम्**	=	इस (शंख, चक्र, गदा-पद्मयुक्त चतुर्भुज)
व्यथा	=	व्याकुलता			
मा	=	नहीं होनी चाहिये			
च	=	और	**रूपम्**	=	रूपको
विमूढभावः	=	मूढ़भाव (भी)	**पुनः**	=	फिर
मा	=	नहीं होना चाहिये।	**प्रपश्य**	=	देख।

[चतुर्भुजरूपका दर्शन कराकर फिर मनुष्यरूप होनेका संजयद्वारा वर्णन।]

सञ्जय उवाच

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा॥ ५०॥

इति, अर्जुनम्, वासुदेवः, तथा, उक्त्वा, स्वकम्, रूपम्, दर्शयामास, भूयः, आश्वासयामास, च, भीतम्, एनम्, भूत्वा, पुनः, सौम्यवपुः, महात्मा॥ ५०॥

उसके पश्चात् संजय बोले, हे राजन्!—

वासुदेवः	=	वासुदेव भगवान्ने	**रूपम्**	=	चतुर्भुजरूपको
अर्जुनम्	=	अर्जुनके प्रति	**दर्शयामास**	=	दिखलाया
इति	=	इस प्रकार	**च**	=	और
उक्त्वा	=	कहकर	**पुनः**	=	फिर
भूयः	=	फिर			
तथा	=	वैसे ही	**महात्मा**	=	महात्मा श्रीकृष्णने
स्वकम्	=	अपने	**सौम्यवपुः**	=	सौम्यमूर्ति

भूत्वा	= होकर	**भीतम्**	= भयभीत अर्जुनको
एनम्	= इस	**आश्वासयामास**	= धीरज दिया।

[भगवान्‌का सौम्य मानवरूप देखकर अर्जुनका सचेत और प्रकृतिगत होनेका कथन।]

अर्जुन उवाच

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥

दृष्ट्वा, इदम्, मानुषम्, रूपम्, तव, सौम्यम्, जनार्दन,
इदानीम्, अस्मि, संवृत्तः, सचेताः, प्रकृतिम्, गतः ॥ ५१ ॥

उसके पश्चात् अर्जुन बोले—

जनार्दन	= हे जनार्दन!	**सचेताः**	= स्थिर-चित्त
तव	= आपके	**संवृत्तः**	= हो गया
इदम्	= इस	**अस्मि**	= हूँ (और)
सौम्यम्	= अतिशान्त		
मानुषम्, रूपम्	= मनुष्य रूपको	**प्रकृतिम्**	= अपनी स्वाभाविक स्थितिको
दृष्ट्वा	= देखकर		
इदानीम्	= अब (मैं)	**गतः**	= प्राप्त हो गया हूँ।

[चतुर्भुजरूपके दर्शनकी दुर्लभता और प्रभावका कथन।]

श्रीभगवानुवाच

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ५२ ॥

सुदुर्दर्शम्, इदम्, रूपम्, दृष्टवान्, असि, यत्, मम,
देवाः, अपि, अस्य, रूपस्य, नित्यम्, दर्शनकाङ्क्षिणः ॥ ५२ ॥

इस प्रकार अर्जुनके वचनको सुनकर श्रीभगवान् बोले, हे अर्जुन !—

मम	= मेरा	**असि**	= है,
यत्	= जो	**इदम्**	= यह
रूपम्	= चतुर्भुजरूप (तुमने)	**सुदुर्दर्शम्**	= सुदुर्दर्श है अर्थात् इसके दर्शन बड़े
दृष्टवान्	= देखा		

ही दुर्लभ हैं।

देवाः = देवता
अपि = भी
नित्यम् = सदा
अस्य = इस
रूपस्य = रूपके
दर्शन-काङ्क्षिणः = दर्शनकी आकांक्षा करते रहते हैं।

नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥ ५३॥

न, अहम्, वेदैः, न, तपसा, न, दानेन, न, च, इज्यया, शक्यः, एवंविधः, द्रष्टुम्, दृष्टवान्, असि, माम्, यथा॥ ५३॥

और हे अर्जुन!—

यथा = जिस प्रकार (तुमने)
माम् = मुझको
दृष्टवान् = देखा
असि = है
एवंविधः = इस प्रकार चतुर्भुजरूपवाला
अहम् = मैं
न = न
वेदैः = वेदोंसे,
न = न
तपसा = तपसे,
न = न
दानेन = दानसे
च = और
न = न
इज्यया = यज्ञसे (ही)
द्रष्टुम् = देखा
शक्यः = जा सकता हूँ।

[अनन्य-भक्तिसे उस रूपके दर्शन, ज्ञान और प्राप्त होनेका कथन।]

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप॥ ५४॥

भक्त्या, तु, अनन्यया, शक्यः, अहम्, एवंविधः, अर्जुन, ज्ञातुम्, द्रष्टुम्, च, तत्त्वेन्, प्रवेष्टुम्, च, परन्तप॥ ५४॥

तु = परंतु
परन्तप = हे परन्तप
अर्जुन = अर्जुन!
अनन्यया, भक्त्या = अनन्यभक्ति*के द्वारा

* अनन्यभक्तिका भाव अगले श्लोकमें विस्तारपूर्वक कहा है।

एवंविधः	= इस प्रकार चतुर्भुजरूपवाला	**च**	= तथा
अहम्	= मैं	**प्रवेष्टुम्**	= प्रवेश करनेके लिये अर्थात् एकीभावसे प्राप्त होनेके लिये
द्रष्टुम्	= प्रत्यक्ष देखनेके लिये,	**च**	= भी
तत्त्वेन	= तत्त्वसे	**शक्यः**	= शक्य हूँ।
ज्ञातुम्	= जाननेके लिये		

[अनन्य भक्तिका स्वरूप और उसके फलका कथन।]

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥ ५५॥

मत्कर्मकृत्, मत्परमः, मद्भक्तः, सङ्गवर्जितः, निर्वैरः, सर्वभूतेषु, यः, सः, माम्, एति, पाण्डव॥ ५५॥

पाण्डव	= हे अर्जुन!		(और)
यः	= जो पुरुष केवल	**सर्वभूतेषु**	= सम्पूर्ण भूतप्राणियोंमें
मत्कर्मकृत्	= मेरे ही लिये सम्पूर्ण कर्तव्य-कर्मोंको करनेवाला है,	**निर्वैरः**	= वैरभावसे रहित है*,
मत्परमः	= मेरे परायण है,	**सः**	= वह (अनन्यभक्तियुक्त पुरुष)
मद्भक्तः	= मेरा भक्त है,	**माम्**	= मुझको (ही)
सङ्गवर्जितः	= आसक्तिरहित है	**एति**	= प्राप्त होता है।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः॥ ११॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

* सर्वत्र भगवद्बुद्धि हो जानेसे उस पुरुषका अति अपराध करनेवालेमें भी वैरभाव नहीं होता है, फिर औरोंमें तो कहना ही क्या है।

ॐ श्रीपरमात्मने नमः

अथ द्वादशोऽध्यायः

प्रधान-विषय—*१ से १२ तक साकार और निराकारके उपासकोंकी उत्तमताका निर्णय और भगवत्-प्राप्तिके उपायका विषय, (१३—२०) भगवत्-प्राप्तिवाले पुरुषोंके लक्षण।*

[साकार और निराकार उपासकोंमें कौन श्रेष्ठ है, यह जाननेके लिये अर्जुनका प्रश्न।]

अर्जुन उवाच

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥ १॥

एवम्, सततयुक्ताः, ये, भक्ताः, त्वाम्, पर्युपासते,
ये, च, अपि, अक्षरम्, अव्यक्तम्, तेषाम्, के, योगवित्तमाः॥ १॥

इस प्रकार भगवान्‌के वचनोंको सुनकर अर्जुन बोले, हे मनमोहन!—

ये = जो
भक्ताः = अनन्य प्रेमी भक्तजन
एवम् = पूर्वोक्त प्रकारसे
सततयुक्ताः = निरन्तर आपके भजन-ध्यानमें लगे रहकर
त्वाम् = आप सगुणरूप परमेश्वरको
च = और
ये = दूसरे जो (केवल)
अक्षरम् = अविनाशी सच्चिदानन्दघन
अव्यक्तम् = निराकार ब्रह्मको
अपि = ही
पर्युपासते = अतिश्रेष्ठ भावसे भजते हैं—
तेषाम् = उन दोनों प्रकारके उपासकोंमें
योगवित्तमाः = अति उत्तम योगवेत्ता
के = कौन
(सन्ति) = हैं?

[भगवान्‌के सगुणरूपकी उपासना करनेवालोंकी श्रेष्ठताका कथन।]

श्रीभगवानुवाच

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥ २॥

मयि, आवेश्य, मनः, ये, माम्, नित्ययुक्ताः, उपासते,
श्रद्धया, परया, उपेताः, ते, मे, युक्ततमाः, मताः॥ २॥

इस प्रकार अर्जुनके पूछनेपर श्रीभगवान् बोले, हे अर्जुन!—

मयि = मुझमें
मनः = मनको
आवेश्य = एकाग्र करके
नित्ययुक्ताः = निरन्तर मेरे भजन-ध्यानमें लगे हुए*
ये = जो भक्तजन
परया = अतिशय श्रेष्ठ
श्रद्धया = श्रद्धासे
उपेताः = युक्त होकर
माम् = मुझ सगुणरूप परमेश्वरको
उपासते = भजते हैं,
ते = वे
मे = मुझको
युक्ततमाः = योगियोंमें अति उत्तम योगी
मताः = मान्य हैं।

[निराकार ब्रह्मके स्वरूपका कथन और उसकी उपासनासे भगवत्प्राप्ति।]

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥ ३॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ ४॥

ये, तु, अक्षरम्, अनिर्देश्यम्, अव्यक्तम्, पर्युपासते,
सर्वत्रगम्, अचिन्त्यम्, च, कूटस्थम्, अचलम्, ध्रुवम्॥ ३॥
सन्नियम्य, इन्द्रियग्रामम्, सर्वत्र, समबुद्धयः,
ते, प्राप्नुवन्ति, माम्, एव, सर्वभूतहिते, रताः॥ ४॥

* अर्थात् गीता अध्याय ११ श्लोक ५५ में कहे हुए प्रकारसे निरन्तर मेरेमें लगे हुए।

तु = परंतु
ये = जो पुरुष
इन्द्रियग्रामम् = इन्द्रियोंके समुदायको
सन्नियम्य = भली प्रकारसे वशमें करके
अचिन्त्यम् = मन-बुद्धिसे परे,
सर्वत्रगम् = सर्वव्यापी,
अनिर्देश्यम् = अकथनीय स्वरूप
च = और
कूटस्थम् = सदा एकरस रहनेवाले,
ध्रुवम् = नित्य,
अचलम् = अचल,
अव्यक्तम् = निराकार,
अक्षरम् = अविनाशी सच्चिदानन्दघन ब्रह्मको
पर्युपासते = निरन्तर एकीभावसे ध्यान करते हुए भजते हैं,
ते = वे
सर्वभूतहिते = सम्पूर्ण भूतोंके हितमें
रताः = रत (और)
सर्वत्र = सबमें
समबुद्धयः = समानभाववाले योगी
माम् = मुझको
एव = ही
प्राप्नुवन्ति = प्राप्त होते हैं।

[निराकारकी उपासनामें कठिनताका कथन।]

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

क्लेशः, अधिकतरः, तेषाम्, अव्यक्तासक्तचेतसाम्, अव्यक्ता, हि, गतिः, दुःखम्, देहवद्भिः, अवाप्यते ॥ ५ ॥

किंतु—

तेषाम् = उन
अव्यक्तासक्त-चेतसाम् = सच्चिदानन्दघन निराकारब्रह्ममें आसक्तचित्तवाले पुरुषोंके (साधनमें)
क्लेशः = परिश्रम
अधिकतरः = विशेष है;
हि = क्योंकि
देहवद्भिः = देहाभिमानियोंके द्वारा
अव्यक्ता = अव्यक्तविषयक
गतिः = गति
दुःखम् = दुःखपूर्वक
अवाप्यते = प्राप्त की जाती है।

[भगवान्‌के सगुणरूपकी उपासनाका कथन।]

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते॥ ६॥

ये, तु, सर्वाणि, कर्माणि, मयि, सन्न्यस्य, मत्पराः,
अनन्येन, एव, योगेन, माम्, ध्यायन्तः, उपासते॥ ६॥

तु = परंतु
ये = जो
मत्पराः = मेरे परायण रहनेवाले भक्तजन
सर्वाणि = सम्पूर्ण
कर्माणि = कर्मोंको
मयि = मुझमें
सन्न्यस्य = अर्पण करके
माम् = मुझ सगुणरूप परमेश्वरको
एव = ही
अनन्येन = अनन्य
योगेन = भक्तियोगसे
ध्यायन्तः = निरन्तर चिन्तन करते हुए
उपासते = भजते हैं*—

[अपने भक्तोंका शीघ्र उद्धार करनेके लिये भगवान्‌की प्रतिज्ञा।]

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम्॥ ७॥

तेषाम्, अहम्, समुद्धर्ता, मृत्युसंसारसागरात्,
भवामि, नचिरात्, पार्थ, मयि, आवेशितचेतसाम्॥ ७॥

पार्थ = हे अर्जुन!
तेषाम् = उन
मयि = मुझमें
आवेशितचेतसाम् = चित्त लगानेवाले प्रेमी भक्तोंका
अहम् = मैं
नचिरात् = शीघ्र ही
मृत्युसंसार-सागरात् = मृत्युरूप संसारसमुद्रसे
समुद्धर्ता = उद्धार करनेवाला
भवामि = होता हूँ।

* इस श्लोकका विशेष भाव जाननेके लिये गीता अध्याय ११ श्लोक ५५ देखना चाहिये।

[ध्यानसे भगवत्प्राप्ति।]

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥ ८॥

मयि, एव, मनः, आधत्स्व, मयि, बुद्धिम्, निवेशय, निवसिष्यसि, मयि, एव, अतः, ऊर्ध्वम्, न, संशयः॥ ८॥

इसलिये हे अर्जुन ! तू—

मयि	=	मुझमें	**ऊर्ध्वम्**	=	उपरान्त (तू)
मनः	=	मनको	**मयि**	=	मुझमें
आधत्स्व	=	लगा (और)	**एव**	=	ही
मयि	=	मुझमें	**निवसिष्यसि**	=	निवास करेगा, (इसमें कुछ भी)
एव	=	ही	**संशयः**	=	संशय
बुद्धिम्	=	बुद्धिको	**न**	=	नहीं है।
निवेशय	=	लगा;			
अतः	=	इसके			

[अभ्याससे भगवत्प्राप्ति।]

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥ ९॥

अथ, चित्तम्, समाधातुम्, न, शक्नोषि, मयि, स्थिरम्, अभ्यासयोगेन, ततः, माम्, इच्छ, आप्तुम्, धनञ्जय॥ ९॥

और—

अथ	=	यदि (तू)	**न, शक्नोषि**	=	समर्थ नहीं है,
चित्तम्	=	मनको	**ततः**	=	तो
मयि	=	मुझमें	**धनञ्जय**	=	हे अर्जुन!
स्थिरम्	=	अचल	**अभ्यासयोगेन**	=	अभ्यासरूप* योगके द्वारा
समाधातुम्	=	स्थापन करनेके लिये			

* भगवान्‌के नाम और गुणोंका श्रवण, कीर्तन, मनन तथा श्वासके द्वारा जप और भगवत्प्राप्तिविषयक शास्त्रोंका पठन-पाठन इत्यादिक चेष्टाएँ भगवत्प्राप्तिके लिये बारम्बार करनेका नाम "अभ्यास" है।

माम्	= मुझको		
आप्तुम्	= प्राप्त होनेके लिये	**इच्छ**	= इच्छा कर।

[भगवदर्थ कर्म करनेसे भगवत्प्राप्ति।]

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥ १०॥

अभ्यासे, अपि, असमर्थः, असि, मत्कर्मपरमः, भव, मदर्थम्, अपि, कर्माणि, कुर्वन्, सिद्धिम्, अवाप्स्यसि॥ १०॥

और यदि तू उपर्युक्त—

अभ्यासे	= अभ्यासमें	**मदर्थम्**	= मेरे निमित्त
अपि	= भी	**कर्माणि**	= कर्मोंको
असमर्थः	= असमर्थ	**कुर्वन्**	= करता हुआ
असि	= है (तो केवल)	**अपि**	= भी
मत्कर्मपरमः	= मेरे लिये कर्म करनेके ही परायण*	**सिद्धिम्**	= मेरी प्राप्तिरूप सिद्धिको (ही)
भव	= हो जा। (इस प्रकार)	**अवाप्स्यसि**	= प्राप्त होगा।

[सर्वकर्मोंके फल-त्यागसे भगवत्प्राप्ति।]

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥ ११॥

अथ, एतत्, अपि, अशक्तः, असि, कर्तुम्, मद्योगम्, आश्रितः, सर्वकर्मफलत्यागम्, ततः, कुरु, यतात्मवान्॥ ११॥

---

* स्वार्थको त्यागकर तथा परमेश्वरको ही परम आश्रय और परम गति समझकर निष्काम प्रेमभावसे सती-शिरोमणि पतिव्रता स्त्रीकी भाँति मन, वाणी और शरीरद्वारा परमेश्वरके लिये ही यज्ञ, दान और तपादि सम्पूर्ण कर्तव्यकर्मोंके करनेका नाम "भगवदर्थ कर्म करनेके परायण होना" है।

और—

अथ	= यदि	**असि**	= है
मद्योगम्	= मेरी प्राप्तिरूप योगके	**ततः**	= तो
आश्रितः	= आश्रित होकर	**यतात्मवान्**	= मन-बुद्धि आदिपर विजय प्राप्त करनेवाला होकर
एतत्	= उपर्युक्त साधनको	**सर्वकर्मफलत्यागम्**	= सब कर्मोंके फलका त्याग[1]
कर्तुम्	= करनेमें		
अपि	= भी (तू)		
अशक्तः	= असमर्थ	**कुरु**	= कर

[सर्वकर्मफलत्यागकी प्रशंसा।]

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥ १२॥

श्रेयः, हि, ज्ञानम्, अभ्यासात्, ज्ञानात्, ध्यानम्, विशिष्यते, ध्यानात्, कर्मफलत्यागः, त्यागात्, शान्तिः, अनन्तरम्॥ १२॥

अभ्यासात्	= मर्मको न जानकर किये हुए अभ्याससे	**ध्यानात्**	= ध्यानसे (भी)
ज्ञानम्	= ज्ञान[2]	**कर्मफलत्यागः**	= सब कर्मोंके फलका त्याग[3] (श्रेष्ठ है);
श्रेयः	= श्रेष्ठ है,	**हि**	= क्योंकि
ज्ञानात्	= ज्ञानसे	**त्यागात्**	= त्यागसे
ध्यानम्	= मुझ परमेश्वरके स्वरूपका ध्यान	**अनन्तरम्**	= तत्काल ही
विशिष्यते	= श्रेष्ठ है (और)	**शान्तिः**	= परम शान्ति होती है।

१–गीता अध्याय ९ श्लोक २७ में इसका विस्तार देखना चाहिये।

२–सुननेसे और शास्त्र-पठनसे परमेश्वरके स्वरूपका जो अनुमान होता है, उसीको यहाँ ज्ञानके नामसे जानना चाहिये।

३–केवल भगवदर्थ कर्म करनेवाले पुरुषका भगवान्‌में प्रेम और श्रद्धा तथा भगवान्‌का चिन्तन भी बना रहता है, इसलिये ध्यानसे कर्मफलका त्याग श्रेष्ठ कहा है।

[सब भूतोंमें द्वेषभावसे रहित और मैत्री आदि गुणोंसे युक्त प्रिय भक्तके लक्षण।]

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥ १३॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ १४॥

अद्वेष्टा, सर्वभूतानाम्, मैत्रः, करुणः, एव, च,
निर्ममः, निरहङ्कारः, समदुःखसुखः, क्षमी॥ १३॥
सन्तुष्टः, सततम्, योगी, यतात्मा, दृढनिश्चयः,
मयि, अर्पितमनोबुद्धिः, यः, मद्भक्तः, सः, मे, प्रियः॥ १४॥

इस प्रकार शान्तिको प्राप्त हुआ—

यः = जो पुरुष
सर्वभूतानाम् = सब भूतोंमें
अद्वेष्टा = द्वेष-भावसे रहित,
मैत्रः = स्वार्थरहित सबका प्रेमी
च = और
करुणः = हेतुरहित दयालु है
एव = तथा*
निर्ममः = ममतासे रहित,
निरहङ्कारः = अहंकारसे रहित,
समदुःखसुखः = सुख-दुःखोंकी प्राप्तिमें सम (और)
क्षमी = क्षमावान् है अर्थात् अपराध करने-वालेको भी अभय देनेवाला है;

(तथा जो)
योगी = योगी
सततम् = निरन्तर
सन्तुष्टः = संतुष्ट है,
यतात्मा = मन-इन्द्रियोंसहित शरीरको वशमें किये हुए है (और)
दृढनिश्चयः = मुझमें दृढ़ निश्चयवाला है—
सः = वह
मयि = मुझमें
अर्पितमनोबुद्धिः = अर्पण किये हुए मन-बुद्धिवाला
मद्भक्तः = मेरा भक्त
मे = मुझको
प्रियः = प्रिय है।

* "एव" शब्द यहाँ सब गुणोंका समुच्चय करनेके लिये समझना चाहिये।

[हर्षादि विकारोंसे रहित और सबको अभय देनेवाले प्रिय भक्तके लक्षण।]

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥ १५॥

यस्मात्, न, उद्विजते, लोकः, लोकात्, न, उद्विजते, च, यः,
हर्षामर्षभयोद्वेगैः, मुक्तः, यः, सः, च, मे, प्रियः॥ १५॥

तथा—

यस्मात्	= जिससे	**च**	= तथा
लोकः	= कोई भी जीव	**यः**	= जो
न, उद्विजते	= उद्वेगको प्राप्त नहीं होता	**हर्षामर्षभयोद्वेगैः**	= हर्ष, अमर्ष[1] भय और उद्वेगादिसे
च	= और		
यः	= जो (स्वयं भी)	**मुक्तः**	= रहित है—
लोकात्	= किसी जीवसे	**सः**	= वह भक्त
न, उद्विजते	= उद्वेगको प्राप्त नहीं होता	**मे**	= मुझको
		प्रियः	= प्रिय है।

[निःस्पृहादि गुणोंसे युक्त सर्वत्यागी प्रिय भक्तके लक्षण।]

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥ १६॥

अनपेक्षः, शुचिः, दक्षः, उदासीनः, गतव्यथः,
सर्वारम्भपरित्यागी, यः, मद्भक्तः, सः, मे, प्रियः॥ १६॥

और—

यः	= जो पुरुष	**शुचिः**	= बाहर-भीतरसे शुद्ध[2]
अनपेक्षः	= आकांक्षासे रहित,		

१-दूसरेकी उन्नतिको देखकर संताप होनेका नाम "अमर्ष" है।

२-गीता अध्याय १३ श्लोक ७ की टिप्पणीमें इसका विस्तार देखना चाहिये।

दक्षः	= चतुर	**सः**	= वह
उदासीनः	= पक्षपातसे रहित (और)	**सर्वारम्भ-परित्यागी**	= सब आरम्भोंका त्यागी*
गतव्यथः	= दुःखोंसे छूटा हुआ है—	**मद्भक्तः**	= मेरा भक्त
		मे	= मुझको
		प्रियः	= प्रिय है।

[हर्ष-शोकादि विकारोंसे रहित निष्कामी प्रिय भक्तके लक्षण।]

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥ १७॥

यः, न, हृष्यति, न, द्वेष्टि, न, शोचति, न, काङ्क्षति, शुभाशुभपरित्यागी, भक्तिमान्, यः, सः, मे, प्रियः॥ १७॥

और—

यः	= जो		(तथा)
न	= न (कभी)	**यः**	= जो
हृष्यति	= हर्षित होता है,	**शुभाशुभ-परित्यागी**	= शुभ और अशुभ सम्पूर्ण कर्मोंका त्यागी है—
न	= न		
द्वेष्टि	= द्वेष करता है,		
न	= न	**सः**	= वह
शोचति	= शोक करता है,	**भक्तिमान्**	= भक्तियुक्त पुरुष
न	= न	**मे**	= मुझको
काङ्क्षति	= कामना करता है	**प्रियः**	= प्रिय है।

[शत्रु-मित्रादिमें समभाववाले स्थिरबुद्धि प्रिय भक्तके लक्षण।]

समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥ १८॥

---

* अर्थात् मन, वाणी और शरीरद्वारा प्रारब्धसे होनेवाले सम्पूर्ण स्वाभाविक कर्मोंमें कर्तापनके अभिमानका त्यागी।

समः, शत्रौ, च, मित्रे, च, तथा, मानापमानयोः,
शीतोष्णसुखदुःखेषु, समः, सङ्गविवर्जितः ॥ १८ ॥

और जो—

शत्रौ, मित्रे	= शत्रु-मित्रमें	**शीतोष्णसुख-दुःखेषु**	= सरदी, गरमी और सुख-दुःखादि द्वन्द्वोंमें
च	= और	**समः**	= सम है
मानापमानयोः	= मान-अपमानमें	**च**	= और
समः	= सम है	**सङ्गविवर्जितः**	= आसक्तिसे रहित है—
तथा	= तथा		

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

तुल्यनिन्दास्तुतिः, मौनी, सन्तुष्टः, येन, केनचित्,
अनिकेतः, स्थिरमतिः, भक्तिमान्, मे, प्रियः, नरः ॥ १९ ॥

तथा जो—

तुल्यनिन्दास्तुतिः	= निन्दा-स्तुतिको समान समझनेवाला,	**अनिकेतः**	= (और) रहनेके स्थानमें ममता और आसक्तिसे रहित है— (वह)
मौनी	= मननशील* (और)	**स्थिरमतिः**	= स्थिरबुद्धि
येन, केनचित्	= जिस किसी प्रकारसे भी शरीरका निर्वाह होनेमें	**भक्तिमान्**	= भक्तिमान्
सन्तुष्टः	= सदा ही संतुष्ट है	**नरः**	= पुरुष
		मे	= मुझको
		प्रियः	= प्रिय है।

* अर्थात् ईश्वरके स्वरूपका निरन्तर मनन करनेवाला है।

[उपर्युक्त गुणोंका सेवन करनेवाले भक्तकी महिमा।]

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥ २०॥

ये, तु, धर्म्यामृतम्, इदम्, यथा, उक्तम्, पर्युपासते,
श्रद्दधानाः, मत्परमाः, भक्ताः, ते, अतीव, मे, प्रियाः॥ २०॥

तु	= परंतु	**पर्युपासते**	= निष्काम प्रेमभावसे सेवन करते हैं,
ये	= जो	**ते**	= वे
श्रद्दधानाः	= श्रद्धायुक्त पुरुष[१]	**भक्ताः**	= भक्त
मत्परमाः	= मेरे परायण होकर[२]	**मे**	= मुझको
इदम्	= इस	**अतीव**	= अतिशय
यथा, उक्तम्	= ऊपर कहे हुए	**प्रियाः**	= प्रिय हैं।
धर्म्यामृतम्	= धर्ममय अमृतको		

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो
नाम द्वादशोऽध्यायः॥ १२॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖

१-वेद, शास्त्र, महात्मा और गुरुजनोंके तथा परमेश्वरके वचनोंपर प्रत्यक्षके सदृश विश्वासका नाम "श्रद्धा" है।

२-अर्थात् मेरेको परम आश्रय और परम गति एवं सबका आत्मरूप और सबसे परे परम पूज्य समझकर विशुद्ध प्रेमसे मेरी प्राप्तिके लिये "तत्पर" हुए।

ॐ श्रीपरमात्मने नमः

अथ त्रयोदशोऽध्यायः

प्रधान-विषय—*१ से १८ तक ज्ञानसहित क्षेत्र-क्षेत्रज्ञका विषय, (१९—३४) ज्ञानसहित प्रकृति-पुरुषका विषय।*

छिन्नसंशयः = संशयरहित,
मेधावी = बुद्धिमान् (और)
त्यागी = सच्चा त्यागी है।

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥ ११॥

न, हि, देहभृता, शक्यम्, त्यक्तुम्, कर्माणि, अशेषतः,
यः, तु, कर्मफलत्यागी, सः, त्यागी, इति, अभिधीयते॥ ११॥

हि = क्योंकि
देहभृता = शरीरधारी किसी भी मनुष्यके द्वारा
अशेषतः = सम्पूर्णतासे
कर्माणि = सब कर्मोंका
त्यक्तुम् = त्याग किया जाना
न, शक्यम् = शक्य नहीं है;
(तस्मात्) = इसलिये
यः = जो
कर्मफलत्यागी = कर्मफलका त्यागी है,
सः, तु = वही

त्यागी = त्यागी है—
इति = यह
अभिधीयते = कहा जाता है।

[त्यागी पुरुषोंके महत्त्वका प्रतिपादन।]

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्॥ १२॥

अनिष्टम्, इष्टम्, मिश्रम्, च, त्रिविधम्, कर्मणः, फलम्, भवति, अत्यागिनाम्, प्रेत्य, न, तु, सन्न्यासिनाम्, क्वचित्॥ १२॥

तथा—

अत्यागिनाम् = कर्मफलका त्याग न करनेवाले मनुष्योंके
कर्मणः = कर्मोंका (तो)
इष्टम् = अच्छा,
अनिष्टम् = बुरा
च = और
मिश्रम् = मिला हुआ—
(इति) = ऐसे
त्रिविधम् = तीन प्रकारका
फलम् = फल
प्रेत्य = मरनेके पश्चात् (अवश्य)
भवति = होता है,
तु = किंतु
सन्न्यासिनाम् = कर्मफलका त्याग कर देनेवाले मनुष्योंके (कर्मोंका फल)
क्वचित् = किसी कालमें भी
न = नहीं होता।

[सम्पूर्ण कर्मोंके होनेमें अधिष्ठानादि पंच हेतुओंका निरूपण।]

पञ्चैतानि महाबाहो कारणानि निबोध मे।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥ १३॥

पञ्च, एतानि, महाबाहो, कारणानि, निबोध, मे, साङ्ख्ये, कृतान्ते, प्रोक्तानि, सिद्धये, सर्वकर्मणाम्॥ १३॥

और—

महाबाहो = हे महाबाहो!
सर्वकर्मणाम् = सम्पूर्ण कर्मोंकी
सिद्धये = सिद्धिके*
एतानि = ये

* अर्थात् सम्पूर्ण कर्मोंके सिद्ध होनेमें।

पञ्च	= पाँच	**साङ्ख्ये**	= सांख्यशास्त्रमें
कारणानि	= हेतु	**प्रोक्तानि**	= कहे गये हैं,
कृतान्ते	= कर्मोंका अन्त करनेके लिये उपाय बतलानेवाले	**(तानि)**	= उनको (तू)
		मे	= मुझसे
		निबोध	= भलीभाँति जान।

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥ १४॥

अधिष्ठानम्, तथा, कर्ता, करणम्, च, पृथग्विधम्, विविधाः, च, पृथक्, चेष्टाः, दैवम्, च, एव, अत्र, पञ्चमम्॥ १४॥

और हे अर्जुन!—

अत्र	= इस विषयमें अर्थात् कर्मोंकी सिद्धिमें	**च**	= एवं
		विविधाः	= नाना प्रकारकी
अधिष्ठानम्	= अधिष्ठान[१]	**पृथक्**	= अलग-अलग
च	= और	**चेष्टाः**	= चेष्टाएँ (और)
कर्ता	= कर्ता	**तथा**	= वैसे
च	= तथा	**एव**	= ही
पृथग्विधम्	= भिन्न-भिन्न प्रकारके	**पञ्चमम्**	= पाँचवाँ हेतु
करणम्	= करण[२]	**दैवम्**	= दैव है।[३]

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥ १५॥

शरीरवाङ्मनोभिः, यत्, कर्म, प्रारभते, नरः, न्याय्यम्, वा, विपरीतम्, वा, पञ्च, एते, तस्य, हेतवः॥ १५॥

१-जिसके आश्रय कर्म किये जायँ उसका नाम "अधिष्ठान" है।

२-जिन-जिन इन्द्रियादिकों और साधनोंके द्वारा कर्म किये जाते हैं, उनका नाम "करण" है; इस प्रकार इसी अध्यायके श्लोक १८वेंमें आये हुए "करण" शब्दका भी यही अर्थ समझना चाहिये।

३-पूर्वकृत शुभाशुभ कर्मोंके संस्कारोंका नाम "दैव" है।

क्योंकि—

नरः	= मनुष्य	**यत्, कर्म**	= जो कुछ भी कर्म
शरीरवाङ्मनोभिः	= मन, वाणी और शरीरसे	**प्रारभते**	= करता है—
		तस्य	= उसके
न्याय्यम्	= शास्त्रानुकूल	**एते**	= ये
वा	= अथवा	**पञ्च**	= पाँचों
विपरीतम्, वा	= विपरीत	**हेतवः**	= कारण हैं।

[आत्माको कर्ता समझनेवालेकी निन्दा।]

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ १६॥

तत्र, एवम्, सति, कर्तारम्, आत्मानम्, केवलम्, तु, यः,
पश्यति, अकृतबुद्धित्वात्, न, सः, पश्यति, दुर्मतिः॥ १६॥

तु	= परंतु	**केवलम्**	= केवल शुद्धस्वरूप
एवम्	= ऐसा	**आत्मानम्**	= आत्माको
सति	= होनेपर भी	**कर्तारम्**	= कर्ता
यः	= जो मनुष्य	**पश्यति**	= समझता है,
अकृतबुद्धित्वात्	= अशुद्धबुद्धि* होनेके कारण	**सः**	= वह
		दुर्मतिः	= मलिन बुद्धिवाला अज्ञानी
तत्र	= उस विषयमें यानी कर्मोंके होनेमें	**न, पश्यति**	= यथार्थ नहीं समझता।

[कर्तृत्वाभिमानसे रहित होकर कर्म करनेवालेकी प्रशंसा।]

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते॥ १७॥

---

* सत्संग और शास्त्रके अभ्याससे तथा भगवदर्थ कर्म और उपासनाके करनेसे मनुष्यकी बुद्धि शुद्ध होती है, इसलिये जो उपर्युक्त साधनोंसे रहित है, उसकी "बुद्धि अशुद्ध" है, ऐसा समझना चाहिये।

यस्य, न, अहङ्कृतः, भावः, बुद्धिः, यस्य, न, लिप्यते,
हत्वा, अपि, सः, इमान्, लोकान्, न, हन्ति, न, निबध्यते॥ १७॥

और हे अर्जुन!—

यस्य	= जिस पुरुषके (अन्तःकरणमें)		होती;
अहङ्कृतः	= 'मैं कर्ता हूँ' (ऐसा)	**सः**	= वह पुरुष
भावः	= भाव	**इमान्**	= इन
न	= नहीं है (तथा)	**लोकान्**	= सब लोकोंको
यस्य	= जिसकी	**हत्वा**	= मारकर
बुद्धिः	= बुद्धि (सांसारिक पदार्थोंमें और कर्मोंमें)	**अपि**	= भी (वास्तवमें)
न, लिप्यते	= लिपायमान नहीं	**न**	= न (तो)
		हन्ति	= मारता है (और)
		न	= न
		निबध्यते	= पापसे बँधता* है।

[कर्म-प्रेरणा और कर्म-संग्रहका स्वरूप।]

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः॥ १८॥

ज्ञानम्, ज्ञेयम्, परिज्ञाता, त्रिविधा, कर्मचोदना,
करणम्, कर्म, कर्ता, इति, त्रिविधः, कर्मसङ्ग्रहः॥ १८॥

---

* जैसे अग्नि, वायु और जलके द्वारा प्रारब्धवश किसी प्राणीकी हिंसा होती देखनेमें आये तो भी वह वास्तवमें हिंसा नहीं है, वैसे ही जिस पुरुषका देहमें अभिमान नहीं है और स्वार्थरहित केवल संसारके हितके लिये ही जिसकी सम्पूर्ण क्रियाएँ होती हैं, उस पुरुषके शरीर और इन्द्रियोंद्वारा यदि किसी प्राणीकी हिंसा होती हुई लोकदृष्टिमें देखी जाय तो भी वह वास्तवमें हिंसा नहीं है; क्योंकि आसक्ति, स्वार्थ और अहंकारके न होनेसे किसी प्राणीकी हिंसा हो ही नहीं सकती तथा बिना कर्तृत्व-अभिमानके किया हुआ कर्म वास्तवमें अकर्म ही है, इसलिये वह पुरुष पापसे नहीं बँधता।

तथा हे अर्जुन!—

परिज्ञाता	= ज्ञाता[१]	**कर्ता**	= कर्ता,[४]
ज्ञानम्	= ज्ञान[२] (और)	**करणम्**	= करण (तथा)
ज्ञेयम्	= ज्ञेय[३]	**कर्म**	= क्रिया[५] —
त्रिविधा	= यह तीन प्रकारकी	**इति**	= यह
कर्मचोदना	= कर्म-प्रेरणा (है) (और)	**त्रिविधः**	= तीन प्रकारका
		कर्मसङ्ग्रहः	= कर्म-संग्रह है।

[ज्ञान, कर्म और कर्ताके त्रिविध भेद बतलानेकी प्रस्तावना।]

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि॥ १९॥

ज्ञानम्, कर्म, च, कर्ता, च, त्रिधा, एव, गुणभेदतः,
प्रोच्यते, गुणसङ्ख्याने, यथावत्, शृणु, तानि, अपि॥ १९॥

उन—

गुणसङ्ख्याने	= गुणोंकी संख्या करनेवाले शास्त्रमें	**त्रिधा**	= तीन-तीन प्रकारके
		एव	= ही
ज्ञानम्	= ज्ञान		
च	= और	**प्रोच्यते**	= कहे गये हैं;
कर्म	= कर्म	**तानि**	= उनको
च	= तथा	**अपि**	= भी (तू मुझसे)
कर्ता	= कर्ता	**यथावत्**	= भलीभाँति
गुणभेदतः	= गुणोंके भेदसे	**शृणु**	= सुन

१-जाननेवालेका नाम "ज्ञाता" है।
२-जिसके द्वारा जाना जाय उसका नाम "ज्ञान" है।
३-जाननेमें आनेवाली वस्तुका नाम "ज्ञेय" है।
४-कर्म करनेवालेका नाम "कर्ता" है।
५-करनेका नाम "क्रिया" है।

[सात्त्विक ज्ञानके लक्षण।]

सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥ २०॥

सर्वभूतेषु, येन, एकम्, भावम्, अव्ययम्, ईक्षते, अविभक्तम्, विभक्तेषु, तत्, ज्ञानम्, विद्धि, सात्त्विकम्॥ २०॥

हे अर्जुन!—

येन = जिस ज्ञानसे (मनुष्य)
विभक्तेषु = पृथक्-पृथक्
सर्वभूतेषु = सब भूतोंमें
एकम् = एक
अव्ययम् = अविनाशी
भावम् = परमात्मभावको
अविभक्तम् = विभागरहित (समभावसे स्थित)
ईक्षते = देखता है,
तत् = उस
ज्ञानम् = ज्ञानको (तो तू)
सात्त्विकम् = सात्त्विक
विद्धि = जान।

[राजस ज्ञानके लक्षण।]

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥ २१॥

पृथक्त्वेन, तु, यत्, ज्ञानम्, नानाभावान्, पृथग्विधान्, वेत्ति, सर्वेषु, भूतेषु, तत्, ज्ञानम्, विद्धि, राजसम्॥ २१॥

तु = किंतु
यत् = जो
ज्ञानम् = ज्ञान अर्थात् जिस ज्ञानके द्वारा मनुष्य
सर्वेषु = सम्पूर्ण
भूतेषु = भूतोंमें
पृथग्विधान् = भिन्न-भिन्न प्रकारके
नानाभावान् = नाना भावोंको
पृथक्त्वेन = अलग-अलग
वेत्ति = जानता है,
तत् = उस
ज्ञानम् = ज्ञानको (तू)
राजसम् = राजस
विद्धि = जान।

[तामस ज्ञानके लक्षण।]

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्॥ २२॥

यत्, तु, कृत्स्नवत्, एकस्मिन्, कार्ये, सक्तम्, अहैतुकम्, अतत्त्वार्थवत्, अल्पम्, च, तत्, तामसम्, उदाहृतम्॥ २२॥

तु = परंतु
यत् = जो ज्ञान
एकस्मिन् = एक
कार्ये = कार्यरूप शरीरमें (ही)
कृत्स्नवत् = सम्पूर्णके सदृश
सक्तम् = आसक्त है*
च = तथा (जो)
अहैतुकम् = बिना युक्तिवाला,
अतत्त्वार्थवत् = तात्त्विक अर्थसे रहित (और)
अल्पम् = तुच्छ है—
तत् = वह
तामसम् = तामस
उदाहृतम् = कहा गया है।

[सात्त्विक कर्मके लक्षण।]

नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥ २३॥

नियतम्, सङ्गरहितम्, अरागद्वेषतः, कृतम्, अफलप्रेप्सुना, कर्म, यत्, तत्, सात्त्विकम्, उच्यते॥ २३॥

तथा हे अर्जुन!—

यत् = जो
कर्म = कर्म
नियतम् = शास्त्रविधिसे नियत किया हुआ (और)
सङ्गरहितम् = कर्तापनके अभिमानसे रहित हो (तथा)
अफलप्रेप्सुना = फल न चाहनेवाले पुरुषद्वारा

* अर्थात् जिस विपरीत ज्ञानके द्वारा मनुष्य एक क्षणभंगुर नाशवान् शरीरको ही आत्मा मानकर उसमें सर्वस्वकी भाँति "आसक्त रहता" है।

अरागद्वेषतः = बिना राग-द्वेषके
कृतम् = किया गया हो—
तत् = वह
सात्त्विकम् = सात्त्विक
उच्यते = कहा जाता है।

[राजस कर्मके लक्षण।]

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्॥ २४॥

यत्, तु, कामेप्सुना, कर्म, साहङ्कारेण, वा, पुनः, क्रियते, बहुलायासम्, तत्, राजसम्, उदाहृतम्॥ २४॥

तु = परंतु
यत् = जो
कर्म = कर्म
बहुलायासम् = बहुत परिश्रमसे युक्त होता है
पुनः = तथा
कामेप्सुना = भोगोंको चाहनेवाले पुरुषद्वारा
वा = या
साहङ्कारेण = अहंकारयुक्त पुरुषद्वारा
क्रियते = किया जाता है,
तत् = वह कर्म
राजसम् = राजस
उदाहृतम् = कहा गया है।

[तामस कर्मके लक्षण।]

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते॥ २५॥

अनुबन्धम्, क्षयम्, हिंसाम्, अनवेक्ष्य, च, पौरुषम्, मोहात्, आरभ्यते, कर्म, यत्, तत्, तामसम्, उच्यते॥ २५॥

तथा—

यत् = जो
कर्म = कर्म
अनुबन्धम् = परिणाम,
क्षयम् = हानि,
हिंसाम् = हिंसा
च = और
पौरुषम् = सामर्थ्यको
अनवेक्ष्य = न विचारकर
मोहात् = केवल अज्ञानसे
आरभ्यते = आरम्भ किया जाता है,

तत् = वह कर्म
तामसम् = तामस
उच्यते = कहा जाता है।

[सात्त्विक कर्ताके लक्षण।]

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥ २६॥

मुक्तसङ्गः, अनहंवादी, धृत्युत्साहसमन्वितः, सिद्ध्यसिद्ध्योः, निर्विकारः, कर्ता, सात्त्विकः, उच्यते॥ २६॥

तथा हे अर्जुन! जो—

कर्ता = कर्ता
मुक्तसङ्गः = संगरहित,
अनहंवादी = अहंकारके वचन न बोलनेवाला,
धृत्युत्साह-समन्वितः = धैर्य और उत्साहसे युक्त (तथा)
सिद्ध्यसिद्ध्योः = कार्यके सिद्ध होने और न होनेमें
निर्विकारः = हर्ष-शोकादि विकारोंसे रहित है—(वह)
सात्त्विकः = सात्त्विक
उच्यते = कहा जाता है।

[राजस कर्ताके लक्षण।]

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥ २७॥

रागी, कर्मफलप्रेप्सुः, लुब्धः, हिंसात्मकः, अशुचिः, हर्षशोकान्वितः, कर्ता, राजसः, परिकीर्तितः॥ २७॥

और जो—

कर्ता = कर्ता
रागी = आसक्तिसे युक्त,
कर्मफलप्रेप्सुः = कर्मोंके फलको चाहनेवाला (और)
लुब्धः = लोभी है (तथा)
हिंसात्मकः = दूसरोंको कष्ट देनेके स्वभाववाला,
अशुचिः = अशुद्धाचारी (और)
हर्षशोकान्वितः = हर्ष-शोकसे लिप्त है—(वह)
राजसः = राजस
परिकीर्तितः = कहा गया है।

[तामस कर्ताके लक्षण।]

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥ २८॥

अयुक्तः, प्राकृतः, स्तब्धः, शठः, नैष्कृतिकः, अलसः, विषादी, दीर्घसूत्री, च, कर्ता, तामसः, उच्यते॥ २८॥

तथा जो—

कर्ता	= कर्ता	**विषादी**	= शोक करनेवाला,
अयुक्तः	= अयुक्त,	**अलसः**	= आलसी
प्राकृतः	= शिक्षासे रहित,	**च**	= और
स्तब्धः	= घमण्डी,		
शठः	= धूर्त	**दीर्घसूत्री**	= दीर्घसूत्री* है—(वह)
नैष्कृतिकः	= और दूसरोंकी जीविकाका नाश करनेवाला (तथा)	**तामसः**	= तामस
		उच्यते	= कहा जाता है।

[बुद्धि और धृतिके त्रिविध भेदोंको बतलानेकी प्रस्तावना।]

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय॥ २९॥

बुद्धेः, भेदम्, धृतेः, च, एव, गुणतः, त्रिविधम्, शृणु, प्रोच्यमानम्, अशेषेण, पृथक्त्वेन, धनञ्जय॥ २९॥

तथा—

धनञ्जय	= हे धनंजय! (अब तू)	**एव**	= भी
बुद्धेः	= बुद्धिका	**गुणतः**	= गुणोंके अनुसार
च	= और	**त्रिविधम्**	= तीन प्रकारका
धृतेः	= धृतिका	**भेदम्**	= भेद
		(मया)	= मेरे द्वारा

*"दीर्घसूत्री" उसको कहा जाता है, जो थोड़े कालमें होनेलायक साधारण कार्यको भी फिर कर लेंगे, ऐसी आशासे बहुत कालतक नहीं पूरा करता।

अशेषेण	= सम्पूर्णतासे	**प्रोच्यमानम्**	= कहा जानेवाला
पृथक्त्वेन	= विभागपूर्वक	**शृणु**	= सुन।

[सात्त्विकी बुद्धिके लक्षण।]

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥ ३०॥

प्रवृत्तिम्, च, निवृत्तिम्, च, कार्याकार्ये, भयाभये,
बन्धम्, मोक्षम्, च, या, वेत्ति, बुद्धिः, सा, पार्थ, सात्त्विकी॥ ३०॥

पार्थ	= हे पार्थ!	**च**	= तथा
या	= जो बुद्धि	**बन्धम्**	= बन्धन
प्रवृत्तिम्	= प्रवृत्तिमार्ग[१]	**च**	= और
च	= और	**मोक्षम्**	= मोक्षको
निवृत्तिम्	= निवृत्तिमार्गको[२]	**वेत्ति**	= यथार्थ जानती है—
कार्याकार्ये	= कर्तव्य और अकर्तव्यको,	**सा**	= वह
		बुद्धिः	= बुद्धि
भयाभये	= भय और अभयको	**सात्त्विकी**	= सात्त्विकी है।

[राजसी बुद्धिके लक्षण।]

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥ ३१॥

यया, धर्मम्, अधर्मम्, च, कार्यम्, च, अकार्यम्, एव, च,
अयथावत्, प्रजानाति, बुद्धिः, सा, पार्थ, राजसी॥ ३१॥

१-गृहस्थमें रहते हुए फल और आसक्तिको त्यागकर भगवदर्पण-बुद्धिसे केवल लोकशिक्षाके लिये राजा जनककी भाँति बरतनेका नाम "प्रवृत्तिमार्ग" है।

२-देहाभिमानको त्यागकर केवल सच्चिदानन्दघन परमात्मामें एकीभावसे स्थित हुए श्रीशुकदेवजी और सनकादिकोंकी भाँति संसारसे उपराम होकर विचरनेका नाम "निवृत्तिमार्ग" है।

और—

पार्थ	= हे पार्थ! (मनुष्य)	**अकार्यम्**	= अकर्तव्यको
यया	= जिस बुद्धिके द्वारा	**एव**	= भी
धर्मम्	= धर्म	**अयथावत्**	= यथार्थ नहीं
च	= और		
अधर्मम्	= अधर्मको	**प्रजानाति**	= जानता,
च	= तथा	**सा**	= वह
कार्यम्	= कर्तव्य	**बुद्धिः**	= बुद्धि
च	= और	**राजसी**	= राजसी है।

[तामसी बुद्धिके लक्षण।]

अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ ३२॥

अधर्मम्, धर्मम्, इति, या, मन्यते, तमसा, आवृता, सर्वार्थान्, विपरीतान्, च, बुद्धिः, सा, पार्थ, तामसी॥ ३२॥

और—

पार्थ	= हे अर्जुन!	**च**	= तथा (इसी प्रकार अन्य)
या	= जो	**सर्वार्थान्**	= सम्पूर्ण पदार्थोंको भी
तमसा	= तमोगुणसे	**विपरीतान्**	= विपरीत
आवृता	= घिरी हुई बुद्धि	**(मन्यते)**	= मान लेती है,
अधर्मम्	= अधर्मको (भी)	**सा**	= वह
धर्मम्	= 'यह धर्म है'	**बुद्धिः**	= बुद्धि
इति	= ऐसा	**तामसी**	= तामसी है।
मन्यते	= मान लेती है		

[सात्त्विकी धृतिके लक्षण।]

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥ ३३॥

धृत्या, यया, धारयते, मनःप्राणेन्द्रियक्रियाः, योगेन, अव्यभिचारिण्या, धृतिः, सा, पार्थ, सात्त्विकी॥ ३३॥

और—

पार्थ = हे पार्थ!
यया = जिस
अव्यभिचारिण्या = अव्यभिचारिणी[१]
धृत्या = धारणशक्तिसे (मनुष्य)
योगेन = ध्यानयोगके द्वारा
मनःप्राणेन्द्रियक्रियाः = मन, प्राण और इन्द्रियोंकी क्रियाओंको[२]
धारयते = धारण करता है,
सा = वह
धृतिः = धृति
सात्त्विकी = सात्त्विकी है।

[राजसी धृतिके लक्षण।]

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥ ३४॥

यया, तु, धर्मकामार्थान्, धृत्या, धारयते, अर्जुन,
प्रसङ्गेन, फलाकाङ्क्षी, धृतिः, सा, पार्थ, राजसी॥ ३४॥

तु = परंतु
पार्थ = हे पृथापुत्र
अर्जुन = अर्जुन!
फलाकाङ्क्षी = फलकी इच्छावाला मनुष्य
यया = जिस
धृत्या = धारणशक्तिके द्वारा
प्रसङ्गेन = अत्यन्त आसक्तिसे
धर्मकामार्थान् = धर्म, अर्थ और कामोंको
धारयते = धारण करता है,
सा = वह
धृतिः = धारणशक्ति
राजसी = राजसी है।

[तामसी धृतिके लक्षण।]

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी॥ ३५॥

१-भगवत्-विषयके सिवा अन्य सांसारिक विषयोंको धारण करना ही व्यभिचार-दोष है, उस दोषसे जो रहित है वह "अव्यभिचारिणी धारणाशक्ति" है।

२-मन, प्राण और इन्द्रियोंको भगवत्प्राप्तिके लिये भजन, ध्यान और निष्काम कर्मोंमें लगानेका नाम उनकी "क्रियाओंको धारण करना" है।

यया, स्वप्नम्, भयम्, शोकम्, विषादम्, मदम्, एव, च,
न, विमुञ्चति, दुर्मेधाः, धृतिः, सा, पार्थ, तामसी ॥ ३५ ॥

तथा—

पार्थ	= हे पार्थ!	**विषादम्**	= दुःखको (तथा)
दुर्मेधाः	= दुष्ट बुद्धिवाला मनुष्य	**मदम्**	= उन्मत्तताको
		एव	= भी
यया	= जिस	**न, विमुञ्चति**	= नहीं छोड़ता अर्थात् धारण किये रहता है—
(धृत्या)	= धारणशक्तिके द्वारा		
स्वप्नम्	= निद्रा,		
भयम्	= भय,	**सा**	= वह
शोकम्	= चिन्ता	**धृतिः**	= धारणशक्ति
च	= और	**तामसी**	= तामसी है।

[तीनों गुणोंके अनुसार सुखके भेदोंको सुननेके लिये भगवान्‌की आज्ञा एवं सात्त्विक सुखके लक्षण।]

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥

सुखम्, तु, इदानीम्, त्रिविधम्, शृणु, मे, भरतर्षभ,
अभ्यासात्, रमते, यत्र, दुःखान्तम्, च, निगच्छति ॥ ३६ ॥
यत्, तत्, अग्रे, विषम्, इव, परिणामे, अमृतोपमम्,
तत्, सुखम्, सात्त्विकम्, प्रोक्तम्, आत्मबुद्धिप्रसादजम् ॥ ३७ ॥

भरतर्षभ	= हे भरतश्रेष्ठ!	**मे**	= मुझसे
इदानीम्	= अब	**शृणु**	= सुन।
त्रिविधम्	= तीन प्रकारके	**यत्र**	= जिस सुखमें (साधक मनुष्य)
सुखम्	= सुखको		
तु	= भी (तू)	**अभ्यासात्**	= भजन, ध्यान और

		सेवा आदिके
		अभ्याससे
रमते	=	रमण करता है
च	=	और (जिससे)
दुःखान्तम्	=	दुःखोंके अन्तको
निगच्छति	=	प्राप्त हो जाता है—
यत्	=	जो (ऐसा सुख है),
तत्	=	वह
अग्रे	=	आरम्भकालमें (यद्यपि)
विषम्	=	विषके
इव	=	तुल्य प्रतीत होता
		है[1], (परंतु)
परिणामे	=	परिणाममें
अमृतोपमम्	=	अमृतके तुल्य है;
(अतः)	=	इसलिये
तत्	=	वह
आत्मबुद्धि-प्रसादजम्	=	परमात्मविषयक बुद्धिके प्रसादजम् उत्पन्न होनेवाला
सुखम्	=	सुख
सात्त्विकम्	=	सात्त्विक
प्रोक्तम्	=	कहा गया है।

[राजस सुखके लक्षण।]

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम्॥ ३८॥

विषयेन्द्रियसंयोगात्, यत्, तत्, अग्रे, अमृतोपमम्, परिणामे, विषम्, इव, तत्, सुखम्, राजसम्, स्मृतम्॥ ३८॥

और—

यत्	=	जो
सुखम्	=	सुख
विषयेन्द्रिय-संयोगात्	=	विषय और इन्द्रियोंके संयोगसे
(भवति)	=	होता है,
तत्	=	वह
अग्रे	=	पहले—भोगकालमें
अमृतोपमम्	=	अमृतके तुल्य प्रतीत होनेपर भी
परिणामे	=	परिणाममें
विषम्	=	विषके[2]

१-जैसे खेलमें आसक्तिवाले बालकको विद्याका अभ्यास मूढ़ताके कारण प्रथम विषके तुल्य भासता है, वैसे ही विषयोंमें आसक्तिवाले पुरुषोंको भगवद्भजन, ध्यान, सेवा आदि साधनोंका अभ्यास मर्म न जाननेके कारण प्रथम "विषके तुल्य प्रतीत होता" है।

२-बल, वीर्य, बुद्धि, धन, उत्साह और परलोकका नाशक होनेसे विषय और इन्द्रियोंके संयोगसे होनेवाले सुखको परिणाममें "विषके तुल्य" कहा है।

इव	= तुल्य है;	**राजसम्**	= राजस
(अतः)	= इसलिये		
तत्	= वह सुख	**स्मृतम्**	= कहा गया है।

[तामस सुखके लक्षण।]

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्॥ ३९॥

यत्, अग्रे, च, अनुबन्धे, च, सुखम्, मोहनम्, आत्मनः, निद्रालस्यप्रमादोत्थम्, तत्, तामसम्, उदाहृतम्॥ ३९॥

तथा—

यत्	= जो	**मोहनम्**	= मोहित करनेवाला है—
सुखम्	= सुख		
अग्रे	= भोगकालमें	**तत्**	= वह
च	= तथा	**निद्रालस्य-प्रमादोत्थम्**	= निद्रा, आलस्य और प्रमादसे उत्पन्न (सुख)
अनुबन्धे	= परिणाममें		
च	= भी	**तामसम्**	= तामस
आत्मनः	= आत्माको	**उदाहृतम्**	= कहा गया है।

[तीनों गुणोंके प्रसंगका उपसंहार।]

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥ ४०॥

न, तत्, अस्ति, पृथिव्याम्, वा, दिवि, देवेषु, वा, पुनः, सत्त्वम्, प्रकृतिजैः, मुक्तम्, यत्, एभिः, स्यात्, त्रिभिः, गुणैः॥ ४०॥

पृथिव्याम्	= पृथिवीमें	**देवेषु**	= देवताओंमें
वा	= या	**पुनः**	= तथा इनके सिवा और कहीं भी
दिवि	= आकाशमें		
वा	= अथवा	**तत्**	= वह (ऐसा कोई भी)

सत्त्वम्	= सत्त्व	**एभिः**	= इन
न	= नहीं	**त्रिभिः**	= तीनों
अस्ति	= है,	**गुणैः**	= गुणोंसे
यत्	= जो	**मुक्तम्**	= रहित
प्रकृतिजैः	= प्रकृतिसे उत्पन्न	**स्यात्**	= हो।

[वर्ण-धर्मके विषयका आरम्भ।]

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥ ४१॥

ब्राह्मणक्षत्रियविशाम्, शूद्राणाम्, च, परन्तप,
कर्माणि, प्रविभक्तानि, स्वभावप्रभवैः, गुणैः॥ ४१॥

इसलिये—

परन्तप	= हे परन्तप!	**कर्माणि**	= कर्म
ब्राह्मणक्षत्रिय-विशाम्	= ब्राह्मण, क्षत्रिय और वैश्योंके	**स्वभावप्रभवैः**	= स्वभावसे उत्पन्न
च	= तथा	**गुणैः**	= गुणोंके द्वारा
शूद्राणाम्	= शूद्रोंके	**प्रविभक्तानि**	= विभक्त किये गये हैं।

[ब्राह्मणके स्वाभाविक कर्मोंका वर्णन]

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥ ४२॥

शमः, दमः, तपः, शौचम्, क्षान्तिः, आर्जवम्, एव, च,
ज्ञानम्, विज्ञानम्, आस्तिक्यम्, ब्रह्मकर्म, स्वभावजम्॥ ४२॥

शमः	= अन्तःकरणका निग्रह करना;	**तपः**	= धर्म पालनके लिये कष्ट सहना;
दमः	= इन्द्रियोंका दमन करना;	**शौचम्**	= बाहर-भीतरसे शुद्ध* रहना;

* गीता अ० १३ श्लोक ७ की टिप्पणीमें देखना चाहिये।

क्षान्तिः = दूसरोंके अपराधोंको क्षमा करना;
आर्जवम् = मन, इन्द्रिय और शरीरको सरल रखना;
आस्तिक्यम् = वेद, शास्त्र, ईश्वर और परलोक आदिमें श्रद्धा रखना;
ज्ञानम् = वेद-शास्त्रोंका अध्ययन-अध्यापन करना
च = और
विज्ञानम् = परमात्माके तत्त्वका अनुभव करना—(ये सब-के-सब)
एव = ही
ब्रह्मकर्म, स्वभावजम् = ब्राह्मणके स्वाभाविक कर्म हैं।

[क्षत्रियके स्वाभाविक कर्मोंका वर्णन।]

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥ ४३॥

शौर्यम्, तेजः, धृतिः, दाक्ष्यम्, युद्धे, च, अपि, अपलायनम्, दानम्, ईश्वरभावः, च, क्षात्रम्, कर्म, स्वभावजम्॥ ४३॥

और—

शौर्यम् = शूर-वीरता,
तेजः = तेज,
धृतिः = धैर्य,
दाक्ष्यम् = चतुरता
च = और
युद्धे = युद्धमें
अपि = भी
अपलायनम् = न भागना,
दानम् = दान देना
च = और
ईश्वरभावः = स्वामिभाव*—(ये सब-के-सब ही)
क्षात्रम् = क्षत्रियके
स्वभावजम् = स्वाभाविक
कर्म = कर्म हैं।

[वैश्य और शूद्रके स्वाभाविक कर्मोंका वर्णन।]

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥ ४४॥

* अर्थात् निःस्वार्थभावसे सबका हित सोचकर शास्त्राज्ञानुसार शासनद्वारा प्रेमके सहित पुत्रतुल्य प्रजाको पालन करनेका भाव।

कृषिगौरक्ष्यवाणिज्यम्, वैश्यकर्म, स्वभावजम्,
परिचर्यात्मकम्, कर्म, शूद्रस्य, अपि, स्वभावजम् ॥ ४४ ॥

तथा—

कृषिगौरक्ष्यवाणिज्यम् = खेती, गोपालन और क्रय-विक्रयरूप सत्य-व्यवहार*(ये)

वैश्यकर्म, स्वभावजम् = वैश्यके स्वाभाविक कर्म हैं। (तथा)

परिचर्यात्मकम् = सब वर्णोंकी सेवा करना

शूद्रस्य = शूद्रका

अपि = भी

स्वभावजम् = स्वाभाविक

कर्म = कर्म है।

[अपने-अपने वर्ण-धर्मके पालनसे परम सिद्धिकी प्राप्ति एवं उसकी विधि।]

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

स्वे, स्वे, कर्मणि, अभिरतः, संसिद्धिम्, लभते, नरः,
स्वकर्मनिरतः, सिद्धिम्, यथा, विन्दति, तत्, शृणु ॥ ४५ ॥

एवं इन—

स्वे, स्वे = अपने-अपने (स्वाभाविक)

कर्मणि = कर्मोंमें

अभिरतः = तत्परतासे लगा हुआ

नरः = मनुष्य

संसिद्धिम् = भगवत्प्राप्तिरूप परम सिद्धिको

लभते = प्राप्त हो जाता है।

स्वकर्मनिरतः = अपने स्वाभाविक कर्ममें लगा हुआ मनुष्य

यथा = जिस प्रकारसे कर्म करके

सिद्धिम् = परम सिद्धिको

विन्दति = प्राप्त होता है,

तत् = उस विधिको (तू)

शृणु = सुन।

* वस्तुओंके खरीदने और बेचनेमें तौल-नाप और गिनती आदिसे कम देना अथवा अधिक लेना एवं वस्तुको बदलकर या एक वस्तुमें दूसरी (खराब) वस्तु मिलाकर दे देना अथवा (अच्छी) ले लेना तथा नफा, आढ़त और दलाली ठहराकर उससे अधिक दाम लेना या कम देना तथा झूठ, कपट, चोरी और जबरदस्तीसे अथवा अन्य किसी प्रकारसे दूसरेके हकको ग्रहण कर लेना इत्यादि दोषोंसे रहित जो सत्यतापूर्वक पवित्र वस्तुओंका व्यापार है, उसका नाम "सत्य-व्यवहार" है।

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥ ४६॥

यतः, प्रवृत्तिः, भूतानाम्, येन्, सर्वम्, इदम्, ततम्, स्वकर्मणा, तम्, अभ्यर्च्य, सिद्धिं, विन्दति, मानवः॥ ४६॥

हे अर्जुन!—

यतः	=	जिस परमेश्वरसे	**तम्**	=	उस परमेश्वरकी
भूतानाम्	=	सम्पूर्ण प्राणियोंकी	**स्वकर्मणा**	=	अपने स्वाभाविक कर्मोंद्वारा
प्रवृत्तिः	=	उत्पत्ति हुई है (और)	**अभ्यर्च्य**	=	पूजा करके[२]
येन	=	जिससे	**मानवः**	=	मनुष्य
इदम्	=	यह	**सिद्धिम्**	=	परम सिद्धिको
सर्वम्	=	समस्त (जगत्)	**विन्दति**	=	प्राप्त हो जाता है।
ततम्	=	व्याप्त है*,			

[स्वधर्म-पालनकी प्रशंसा।]

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ ४७॥

श्रेयान्, स्वधर्मः, विगुणः, परधर्मात्, स्वनुष्ठितात्, स्वभावनियतम्, कर्म, कुर्वन्, न, आप्नोति, किल्बिषम्॥ ४७॥

इसलिये—

स्वनुष्ठितात्	=	अच्छी प्रकार आचरण किये हुए	**विगुणः**	=	गुणरहित
			(अपि)	=	भी
परधर्मात्	=	दूसरेके धर्मसे	**स्वधर्मः**	=	अपना धर्म

१-जैसे बर्फ जलसे व्याप्त है, वैसे ही सम्पूर्ण संसार सच्चिदानन्दघन परमात्मासे व्याप्त है।

२-जैसे पतिव्रता स्त्री पतिको ही सर्वस्व समझकर पतिका चिन्तन करती हुई पतिके आज्ञानुसार पतिके ही लिये मन-वाणी-शरीरसे कर्म करती है, वैसे ही परमेश्वरको ही सर्वस्व समझकर परमेश्वरका चिन्तन करते हुए परमेश्वरके आज्ञानुसार मन, वाणी और शरीरसे परमेश्वरके ही लिये स्वाभाविक कर्तव्य कर्मका आचरण करना कर्मद्वारा ''परमेश्वरको पूजना'' है।

श्रेयान्	= श्रेष्ठ है;	**कुर्वन्**	= करता हुआ (मनुष्य)
(यस्मात्)	= क्योंकि	**किल्बिषम्**	= पापको
स्वभावनियतम्	= स्वभावसे नियत किये हुए	**न**	= नहीं
कर्म	= स्वधर्मरूप कर्मको	**आप्नोति**	= प्राप्त होता।

[स्वधर्म त्यागका निषेध।]

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥ ४८॥

सहजम्, कर्म, कौन्तेय, सदोषम्, अपि, न, त्यजेत्, सर्वारम्भाः, हि, दोषेण, धूमेन, अग्निः, इव, आवृताः॥ ४८॥

अतएव—

कौन्तेय	= हे कुन्तीपुत्र!	**धूमेन**	= धूएँसे
सदोषम्	= दोषयुक्त होनेपर	**अग्निः**	= अग्निकी
अपि	= भी	**इव**	= भाँति
सहजम्	= सहज*	**सर्वारम्भाः**	= सभी कर्म (किसी-न-किसी)
कर्म	= कर्मको	**दोषेण**	= दोषसे
न	= नहीं	**आवृताः**	= युक्त हैं।
त्यजेत्	= त्यागना चाहिये;		
हि	= क्योंकि		

[संन्यासयोगसे परम सिद्धिकी प्राप्ति।]

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति॥ ४९॥

---

* प्रकृतिके अनुसार शास्त्रविधिसे नियत किये हुए जो वर्णाश्रमके धर्म और सामान्य धर्मरूप स्वाभाविक कर्म हैं, उनको ही यहाँ "स्वधर्म", "सहजकर्म," "स्वकर्म", "नियतकर्म", "स्वभावजकर्म" और "स्वभावनियतकर्म" इत्यादि नामोंसे कहा है।

असक्तबुद्धिः, सर्वत्र, जितात्मा, विगतस्पृहः,
नैष्कर्म्यसिद्धिम्, परमाम्, सन्न्यासेन, अधिगच्छति॥ ४९॥

तथा हे अर्जुन!—

सर्वत्र = सर्वत्र
असक्तबुद्धिः = आसक्तिरहित बुद्धिवाला,
विगतस्पृहः = स्पृहारहित (और)
जितात्मा = जीते हुए अन्तः-करणवाला पुरुष
सन्न्यासेन = सांख्ययोगके द्वारा
परमाम् = उस परम
नैष्कर्म्यसिद्धिम् = नैष्कर्म्य सिद्धिको
अधिगच्छति = प्राप्त होता है।

[ज्ञानकी परानिष्ठाका वर्णन करनेकी प्रतिज्ञा।]

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥ ५०॥

सिद्धिम्, प्राप्तः, यथा, ब्रह्म, तथा, आप्नोति, निबोध, मे,
समासेन, एव, कौन्तेय, निष्ठा, ज्ञानस्य, या, परा॥ ५०॥

इसलिये—

या = जो (कि)
ज्ञानस्य = ज्ञानयोगकी
परा = परा
निष्ठा = निष्ठा है,
सिद्धिम् = उस नैष्कर्म्यसिद्धिको
यथा = जिस प्रकारसे
प्राप्तः = प्राप्त होकर मनुष्य
ब्रह्म = ब्रह्मको
आप्नोति = प्राप्त होता है,
तथा = उस प्रकारको
कौन्तेय = हे कुन्तीपुत्र! (तू)
समासेन = संक्षेपमें
एव = ही
मे = मुझसे
निबोध = समझ।

[ज्ञानयोगके अनुसार भगवत्प्राप्तिका पात्र बननेकी विधि।]

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥ ५१॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ ५२॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥ ५३॥

बुद्ध्या, विशुद्धया, युक्तः, धृत्या, आत्मानम्, नियम्य, च,
शब्दादीन्, विषयान्, त्यक्त्वा, रागद्वेषौ, व्युदस्य, च॥ ५१॥
विविक्तसेवी, लघ्वाशी, यतवाक्कायमानसः,
ध्यानयोगपरः, नित्यम्, वैराग्यम्, समुपाश्रितः॥ ५२॥
अहङ्कारम्, बलम्, दर्पम्, कामम्, क्रोधम्, परिग्रहम्,
विमुच्य, निर्ममः, शान्तः, ब्रह्मभूयाय, कल्पते॥ ५३॥

हे अर्जुन!—

विशुद्धया = विशुद्ध
बुद्ध्या = बुद्धिसे
युक्तः = युक्त (तथा)
लघ्वाशी = हलका, सात्त्विक और नियमित भोजन करनेवाला,
शब्दादीन् = शब्दादि
विषयान् = विषयोंका
त्यक्त्वा = त्याग करके
विविक्तसेवी = एकान्त और शुद्ध देशका सेवन करनेवाला,
धृत्या = सात्त्विक धारणशक्तिके द्वारा*
आत्मानम् = अन्तःकरण और इन्द्रियोंका
नियम्य = संयम करके
यतवाक्कायमानसः = मन, वाणी और शरीरको वशमें कर लेनेवाला,
रागद्वेषौ = राग-द्वेषको
व्युदस्य = सर्वथा नष्ट करके
वैराग्यम् = भलीभाँति दृढ़ वैराग्यका
समुपाश्रितः = आश्रय लेनेवाला
च = तथा
अहङ्कारम् = अहंकार
बलम् = बल,
दर्पम् = घमण्ड,
कामम् = काम,
क्रोधम् = क्रोध
च = और

* गीता अध्याय १८ श्लोक ३३ में जिसका विस्तार है।

परिग्रहम् = परिग्रहका
विमुच्य = त्याग करके
नित्यम् = निरन्तर
ध्यानयोगपरः = ध्यानयोगके परायण रहनेवाला,
निर्ममः = ममतारहित (और)
शान्तः = शान्तियुक्त पुरुष
ब्रह्मभूयाय = सच्चिदानन्दघन ब्रह्ममें अभिन्नभावसे स्थित होनेका
कल्पते = पात्र होता है।

[ज्ञानयोगसे परा भक्तिकी प्राप्ति।]

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥ ५४॥

ब्रह्मभूतः, प्रसन्नात्मा, न, शोचति, न, काङ्क्षति,
समः, सर्वेषु, भूतेषु, मद्भक्तिम्, लभते, पराम्, ॥ ५४॥

फिर वह—

ब्रह्मभूतः = सच्चिदानन्दघन ब्रह्ममें एकीभावसे स्थित,
प्रसन्नात्मा = प्रसन्न मनवाला योगी
न = न (तो किसीके लिये)
शोचति = शोक करता है (और)
न = न (किसीकी)
काङ्क्षति = आकांक्षा ही करता है। (ऐसा)
सर्वेषु = समस्त
भूतेषु = प्राणियोंमें
समः = समभाववाला[१] योगी
पराम्, मद्भक्तिम् = मेरी पराभक्तिको[२]
लभते = प्राप्त हो जाता है।

[पराभक्तिसे भगवत्प्राप्ति।]

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ ५५॥

१-गीता अध्याय ६ श्लोक २९ में देखना चाहिये।

२-जो तत्त्वज्ञानकी पराकाष्ठा है तथा जिसको प्राप्त होकर और कुछ जानना बाकी नहीं रहता, वही यहाँ "पराभक्ति", " ज्ञानकी परानिष्ठा", "परम नैष्कर्म्यसिद्धि" और "परमसिद्धि" इत्यादि नामोंसे कही गयी है।

भक्त्या, माम्, अभिजानाति, यावान्, यः, च, अस्मि, तत्त्वतः, ततः, माम्, तत्त्वतः, ज्ञात्वा, विशते, तदनन्तरम् ॥ ५५ ॥

और उस—

भक्त्या = पराभक्तिके द्वारा (वह)
माम् = मुझ परमात्माको
(अहम्) = मैं
यः = जो हूँ
च = और
यावान् = जितना
अस्मि = हूँ,
तत्त्वतः, अभिजानाति = ठीक वैसा-का-वैसा तत्त्वसे जान लेता है, (तथा)
ततः = उस भक्तिसे
माम् = मुझको
तत्त्वतः = तत्त्वसे
ज्ञात्वा = जानकर
तदनन्तरम् = तत्काल ही
विशते = मुझमें प्रविष्ट हो जाता है।

[भक्तिसहित निष्काम कर्मयोगसे भगवत्प्राप्ति।]

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥

सर्वकर्माणि, अपि, सदा, कुर्वाणः, मद्व्यपाश्रयः, मत्प्रसादात्, अवाप्नोति, शाश्वतम्, पदम्, अव्ययम्, ॥ ५६ ॥

और—

मद्व्यपाश्रयः = मेरे परायण हुआ कर्मयोगी (तो)
सर्वकर्माणि = सम्पूर्ण कर्मोंको
सदा = सदा
कुर्वाणः = करता हुआ
अपि = भी
मत्प्रसादात् = मेरी कृपासे
शाश्वतम् = सनातन
अव्ययम् = अविनाशी
पदम् = परम पदको
अवाप्नोति = प्राप्त हो जाता है।

[भक्तिसहित निष्काम कर्मयोगके अनुष्ठानहेतु भगवान्‌की आज्ञा।]

चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

चेतसा, सर्वकर्माणि, मयि, सन्न्यस्य, मत्परः, बुद्धियोगम्, उपाश्रित्य, मच्चित्तः, सततम्, भव॥ ५७॥

इसलिये हे अर्जुन तू!—

सर्वकर्माणि	= सब कर्मोंको	**उपाश्रित्य**	= अवलम्बन करके
चेतसा	= मनसे	**मत्परः**	= मेरे परायण (और)
मयि	= मुझमें	**सततम्**	= निरन्तर
सन्न्यस्य	= अर्पण करके * (तथा)	**मच्चित्तः**	= मुझमें चित्तवाला
बुद्धियोगम्	= समबुद्धिरूप योगको	**भव**	= हो।

[भगवच्चिन्तनसे उद्धार और भगवदाज्ञाके त्यागसे अधोगति।]

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि॥ ५८॥

मच्चित्तः, सर्वदुर्गाणि, मत्प्रसादात्, तरिष्यसि, अथ, चेत्, त्वम्, अहङ्कारात्, न, श्रोष्यसि, विनङ्क्ष्यसि॥ ५८॥

उपर्युक्त प्रकारसे—

मच्चित्तः	= मुझमें चित्तवाला होकर	**चेत्**	= यदि
त्वम्	= तू	**अहङ्कारात्**	= अहंकारके कारण (मेरे वचनोंको)
मत्प्रसादात्	= मेरी कृपासे	**न**	= न
सर्वदुर्गाणि	= समस्त संकटोंको (अनायास ही)	**श्रोष्यसि**	= सुनेगा (तो)
तरिष्यसि	= पार कर जायगा	**विनङ्क्ष्यसि**	= नष्ट हो जायगा अर्थात् परमार्थसे भ्रष्ट हो जायगा।
अथ	= और		

[प्रकृतिकी प्रबलताके कारण स्वाभाविक कर्मोंके त्यागमें सामर्थ्यका अभाव बतलाना।]

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥ ५९॥

* गीता अध्याय ९ श्लोक २७में जिसकी विधि कही है।

यत्, अहङ्कारम्, आश्रित्य, न, योत्स्ये, इति, मन्यसे,
मिथ्या, एषः, व्यवसायः, ते, प्रकृतिः, त्वाम्, नियोक्ष्यति॥ ५९॥

और—

यत्	= जो (तू)	**एषः**	= यह
अहङ्कारम्	= अहंकारका	**व्यवसायः**	= निश्चय
आश्रित्य	= आश्रय लेकर	**मिथ्या**	= मिथ्या है;
इति	= यह	**(यतः)**	= क्योंकि (तेरा)
मन्यसे	= मान रहा है (कि)	**प्रकृतिः**	= स्वभाव
न, योत्स्ये	= 'मैं युद्ध नहीं करूँगा',	**त्वाम्**	= तुझे
ते	= तेरा	**नियोक्ष्यति**	= जबरदस्ती युद्धमें लगा देगा।

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥ ६०॥

स्वभावजेन, कौन्तेय, निबद्धः, स्वेन्, कर्मणा,
कर्तुम्, न, इच्छसि, यत्, मोहात्, करिष्यसि, अवशः, अपि, तत्॥ ६०॥

और—

कौन्तेय	= हे कुन्तीपुत्र!	**अपि**	= भी
यत्	= जिस कर्मको (तू)	**स्वेन**	= अपने (पूर्वकृत)
मोहात्	= मोहके कारण	**स्वभावजेन**	= स्वाभाविक
कर्तुम्	= करना	**कर्मणा**	= कर्मसे
न	= नहीं	**निबद्धः**	= बँधा हुआ
इच्छसि	= चाहता,	**अवशः**	= परवश होकर
तत्	= उसको	**करिष्यसि**	= करेगा।

[सबके हृदयमें अन्तर्यामी परमात्माकी व्यापकताका कथन।]

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥ ६१॥

ईश्वरः, सर्वभूतानाम्, हृद्देशे, अर्जुन, तिष्ठति, भ्रामयन्, सर्वभूतानि, यन्त्रारूढानि, मायया ॥ ६१ ॥

क्योंकि—

अर्जुन = हे अर्जुन!
यन्त्रारूढानि = शरीररूप यन्त्रमें आरूढ़ हुए
सर्वभूतानि = सम्पूर्ण प्राणियोंको
ईश्वरः = अन्तर्यामी परमेश्वर
मायया = अपनी मायासे (उनके कर्मोंके अनुसार)
भ्रामयन् = भ्रमण कराता हुआ
सर्वभूतानाम् = सब प्राणियोंके
हृद्देशे = हृदयमें
तिष्ठति = स्थित है।

[ईश्वरकी शरण जाने-हेतु आज्ञा और उसका फल।]

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥ ६२ ॥

तम्, एव, शरणम्, गच्छ, सर्वभावेन, भारत, तत्प्रसादात्, पराम्, शान्तिम्, स्थानम्, प्राप्स्यसि, शाश्वतम् ॥ ६२ ॥

इसलिये—

भारत = हे भारत! (तू)
सर्वभावेन = सब प्रकारसे
तम् = उस परमेश्वरकी
एव = ही
शरणम् = शरणमें*
गच्छ = जा।
तत्प्रसादात् = उस परमात्माकी कृपासे (ही तू)
पराम् = परम
शान्तिम् = शान्तिको (तथा)
शाश्वतम् = सनातन
स्थानम् = परम धामको
प्राप्स्यसि = प्राप्त होगा।

* लज्जा, भय, मान, बड़ाई और आसक्तिको त्यागकर एवं शरीर और संसारमें अहंता-ममतासे रहित होकर केवल एक परमात्माको ही परम आश्रय, परम गति और सर्वस्व समझना तथा अनन्यभावसे अतिशय श्रद्धा, भक्ति और प्रेमपूर्वक निरन्तर भगवान्‌के नाम, गुण, प्रभाव और स्वरूपका चिन्तन करते रहना एवं भगवान्‌का भजन-स्मरण रखते हुए ही उनके आज्ञानुसार कर्तव्यकर्मोंका निःस्वार्थभावसे केवल परमेश्वरके लिये आचरण करना यह "सब प्रकारसे परमात्माके शरणमें" होना है।

[उपदेशका उपसंहार।]

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३॥

इति, ते, ज्ञानम्, आख्यातम्, गुह्यात्, गुह्यतरम्, मया, विमृश्य, एतत्, अशेषेण, यथा, इच्छसि, तथा, कुरु॥ ६३॥

इति = इस प्रकार (यह)
गुह्यात् = गोपनीयसे (भी)
गुह्यतरम् = अति गोपनीय
ज्ञानम् = ज्ञान
मया = मैंने
ते = तुझसे
आख्यातम् = कह दिया। (अब तू)
एतत् = इस रहस्ययुक्त ज्ञानको
अशेषेण = पूर्णतया
विमृश्य = भलीभाँति विचारकर,
यथा = जैसे
इच्छसि = चाहता है
तथा = वैसे ही
कुरु = कर।

[पुनः समस्त गीताके साररूप सर्वगुह्यतम रहस्यको सुननेके लिये आज्ञा।]

सर्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्॥ ६४॥

सर्वगुह्यतमम्, भूयः, शृणु, मे, परमम्, वचः, इष्टः, असि, मे, दृढम्, इति, ततः, वक्ष्यामि, ते, हितम्॥ ६४॥

इतना कहनेपर भी अर्जुनका कोई उत्तर न मिलनेके कारण श्रीकृष्णभगवान् फिर बोले कि हे अर्जुन!—

सर्वगुह्यतमम् = सम्पूर्ण गोपनीयोंसे अति गोपनीय
मे = मेरे
परमम् = परम रहस्ययुक्त
वचः = वचनको (तू)
भूयः = फिर (भी)
शृणु = सुन। (तू)
मे = मेरा
दृढम् = अतिशय
इष्टः = प्रिय
असि = है,
ततः = इससे
इति = यह

हितम् = { परम हितकारक वचन (मैं) | **ते** = तुझसे | **वक्ष्यामि** = कहूँगा।

[भगवान्‌की भक्ति करनेके लिये आज्ञा और उसका फल।]

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

मन्मनाः, भव, मद्भक्तः, मद्याजी, माम्, नमस्कुरु,
माम्, एव, एष्यसि, सत्यम्, ते, प्रतिजाने, प्रियः, असि, मे ॥ ६५ ॥

हे अर्जुन! तू—

मन्मनाः = मुझमें मनवाला
भव = हो,
मद्भक्तः = मेरा भक्त
(भव) = बन,
मद्याजी = { मेरा पूजन करनेवाला
(भव) = हो (और)
माम् = मुझको
नमस्कुरु = प्रणाम कर।
(एवम्) = ऐसा करनेसे (तू)
माम् = मुझे
एव = ही
एष्यसि = प्राप्त होगा, (यह मैं)
ते = तुझसे
सत्यम् = सत्य
प्रतिजाने = प्रतिज्ञा करता हूँ,
(यतः) = क्योंकि (तू)
मे = मेरा
प्रियः = अत्यन्त प्रिय
असि = है।

[सर्व धर्मोंका आश्रय त्यागकर केवल भगवत्-शरण होनेकी आज्ञा।]

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

सर्वधर्मान्, परित्यज्य, माम्, एकम्, शरणम्, व्रज,
अहम्, त्वा, सर्वपापेभ्यः, मोक्षयिष्यामि, मा, शुचः ॥ ६६ ॥

इसलिये—

सर्वधर्मान् = { सम्पूर्ण धर्मोंको अर्थात् सम्पूर्ण कर्तव्यकर्मोंको | (मुझमें) **परित्यज्य** = त्यागकर (तू केवल) **एकम्** = एक

माम्	= मुझ सर्वशक्तिमान् सर्वाधार परमेश्वरकी ही	**अहम्**	= मैं
शरणम्	= शरणमें[१]	**त्वा**	= तुझे
व्रज	= आ जा।	**सर्वपापेभ्यः**	= सम्पूर्ण पापोंसे
		मोक्षयिष्यामि	= मुक्त कर दूँगा, (तू)
		मा, शुचः	= शोक मत कर।

[चतुर्विध अनधिकारियोंके प्रति गीताका उपदेश न करनेका कथन।]

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥ ६७॥

इदम्, ते, न, अतपस्काय, न, अभक्ताय, कदाचन,
न, च, अशुश्रूषवे, वाच्यम्, न, च, माम्, यः, अभ्यसूयति॥ ६७॥

हे अर्जुन! इस प्रकार—

ते	= तुझे	**न**	= न
इदम्	= यह गीतारूप रहस्यमय उपदेश	**अशुश्रूषवे**	= बिना सुननेकी इच्छावालेसे ही
कदाचन	= किसी भी कालमें	**(वाच्यम्)**	= कहना चाहिये;
न	= न (तो)	**च**	= तथा
अतपस्काय	= तपरहित मनुष्यसे	**यः**	= जो
वाच्यम्	= कहना चाहिये,	**माम्**	= मुझमें
न	= न	**अभ्यसूयति**	= दोषदृष्टि रखता है,
अभक्ताय	= भक्तिरहितसे[२]	**(तस्मै)**	= उससे (तो कभी भी)
च	= और	**न**	= नहीं कहना चाहिये।

[श्रीगीताजीके प्रचारका माहात्म्य।]

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥ ६८॥

१-इसी अध्यायके श्लोक ६२ की टिप्पणीमें शरणका भाव देखना चाहिये।

२-वेद, शास्त्र और परमेश्वर तथा महात्मा और गुरुजनोंमें श्रद्धा, प्रेम और पूज्यभावका नाम "भक्ति" है।

यः, इमम्, परमम्, गुह्यम्, मद्भक्तेषु, अभिधास्यति,
भक्तिम्, मयि, पराम्, कृत्वा, माम्, एव, एष्यति,असंशयः ॥ ६८ ॥

क्योंकि—

यः	= जो पुरुष	**मद्भक्तेषु**	= मेरे भक्तोंमें
मयि	= मुझमें	**अभिधास्यति**	= कहेगा*,
पराम्	= परम	**(सः)**	= वह
भक्तिम्	= प्रेम	**माम्**	= मुझको
कृत्वा	= करके	**एव**	= ही
इमम्	= इस	**एष्यति**	= प्राप्त होगा—
परमम्	= परम		
गुह्यम्	= रहस्ययुक्त गीताशास्त्रको	**असंशयः**	= इसमें कोई संदेह नहीं है।

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च मे तस्मादन्यः प्रियतरो भुवि॥ ६९ ॥

न, च, तस्मात्, मनुष्येषु, कश्चित्, मे, प्रियकृत्तमः,
भविता, न, च, मे, तस्मात्, अन्यः, प्रियतरः, भुवि ॥ ६९ ॥

तस्मात्	= उससे बढ़कर	**च**	= तथा
मे	= मेरा	**भुवि**	= पृथ्वीभरमें
प्रियकृत्तमः	= प्रिय कार्य करनेवाला	**तस्मात्**	= उससे बढ़कर
		मे	= मेरा
मनुष्येषु	= मनुष्योंमें	**प्रियतरः**	= प्रिय
कश्चित्	= कोई	**अन्यः**	= दूसरा कोई
च	= भी	**भविता**	= भविष्यमें होगा भी
न	= नहीं है;	**न**	= नहीं।

* अर्थात् निष्कामभावसे प्रेमपूर्वक मेरे भक्तोंको पढ़ावेगा या अर्थकी व्याख्याद्वारा इसका प्रचार करेगा।

[श्रीगीताजीके पठनका माहात्म्य।]

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ ७०॥

अध्येष्यते, च, यः, इमम्, धर्म्यम्, संवादम्, आवयोः, ज्ञानयज्ञेन, तेन, अहम्, इष्टः, स्याम्, इति, मे, मतिः॥ ७०॥

यः	= जो पुरुष	**च**	= भी
इमम्	= इस	**अहम्**	= मैं
धर्म्यम्	= धर्ममय	**ज्ञानयज्ञेन**	= ज्ञानयज्ञसे*
आवयोः	= हम दोनोंके	**इष्टः**	= पूजित
संवादम्	= संवादरूप गीताशास्त्रको	**स्याम्**	= होऊँगा—
		इति	= ऐसा
अध्येष्यते	= पढ़ेगा,	**मे**	= मेरा
तेन	= उसके द्वारा	**मतिः**	= मत है।

[श्रीगीताजीके श्रवणका माहात्म्य।]

श्रद्धावाननसूयश्च शृणुयादपि यो नरः।
सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्॥ ७१॥

श्रद्धावान्, अनसूयः, च, शृणुयात्, अपि, यः, नरः, सः, अपि, मुक्तः, शुभान्, लोकान्, प्राप्नुयात्, पुण्यकर्मणाम्॥ ७१॥

यः	= जो	**सः**	= वह
नरः	= मनुष्य	**अपि**	= भी (पापोंसे)
श्रद्धावान्	= श्रद्धायुक्त	**मुक्तः**	= मुक्त होकर
च	= और		
अनसूयः	= दोष-दृष्टिसे रहित होकर (इस गीताशास्त्रका)	**पुण्यकर्मणाम्**	= उत्तम कर्म करनेवालोंके
		शुभान्	= श्रेष्ठ
शृणुयात्, अपि	= श्रवण भी करेगा,	**लोकान्**	= लोकोंको
		प्राप्नुयात्	= प्राप्त होगा।

* गीता अध्याय ४ श्लोक ३३ का अर्थ देखना चाहिये।

[गीताश्रवणसे अर्जुनका मोह नष्ट हुआ या नहीं—
यह जाननेके लिये भगवान्‌का प्रश्न।]

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा।
कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनञ्जय॥ ७२॥

कच्चित्, एतत्, श्रुतम्, पार्थ, त्वया, एकाग्रेण, चेतसा,
कच्चित्, अज्ञानसम्मोहः, प्रनष्टः, ते, धनञ्जय॥ ७२॥

**इस प्रकार गीताका माहात्म्य कहकर आनन्दकन्द भगवान्
श्रीकृष्णचन्द्रने अर्जुनसे पूछा—**

पार्थ = हे पार्थ!
कच्चित् = क्या
एतत् = इस गीताशास्त्रको
त्वया = तूने
एकाग्रेण, चेतसा = एकाग्रचित्तसे
श्रुतम् = श्रवण किया? (और)
धनञ्जय = हे धनंजय!
कच्चित् = क्या
ते = तेरा
अज्ञानसम्मोहः = अज्ञानजनित मोह
प्रनष्टः = नष्ट हो गया?

**[अपने मोहका नाश तथा स्मृतिकी प्राप्ति कर अर्जुनका संशयरहित हो
जाना एवं आज्ञापालनकी प्रतिज्ञा करना।]**

अर्जुन उवाच

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥ ७३॥

नष्टः, मोहः, स्मृतिः, लब्धा, त्वत्प्रसादात्, मया, अच्युत,
स्थितः, अस्मि, गतसन्देहः, करिष्ये, वचनम्, तव॥ ७३॥

इस प्रकार भगवान्‌के पूछनेपर अर्जुन बोले—

अच्युत = हे अच्युत!
त्वत्प्रसादात् = आपकी कृपासे
(मम) = मेरा
मोहः = मोह
नष्टः = नष्ट हो गया (और)
मया = मैंने
स्मृतिः = स्मृति
लब्धा = { प्राप्त कर ली है, (अब मैं) }
गतसन्देहः = संशयरहित होकर
स्थितः = स्थित
अस्मि = हूँ, (अतः)

तव	= आपकी	**करिष्ये**	= पालन करूँगा।
वचनम्	= आज्ञाका		

[श्रीकृष्ण और अर्जुनके संवादकी महिमा।]

संजय उवाच

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।
संवादमिममश्रौषमद्भुतं रोमहर्षणम्॥ ७४॥

इति, अहम्, वासुदेवस्य, पार्थस्य, च, महात्मनः,
संवादम्, इमम्, अश्रौषम्, अद्भुतम्, रोमहर्षणम्॥ ७४॥

इसके पश्चात् संजय बोले—हे राजन्!—

इति	= इस प्रकार	**इमम्**	= इस
अहम्	= मैंने	**अद्भुतम्**	= अद्भुत रहस्ययुक्त
वासुदेवस्य	= श्रीवासुदेवके		
च	= और	**रोमहर्षणम्**	= रोमांचकारक
महात्मनः	= महात्मा	**संवादम्**	= संवादको
पार्थस्य	= अर्जुनके	**अश्रौषम्**	= सुना।

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम्।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम्॥ ७५॥

व्यासप्रसादात्, श्रुतवान्, एतत्, गुह्यम्, अहम्, परम्,
योगम्, योगेश्वरात्, कृष्णात् साक्षात्, कथयतः, स्वयम्,॥ ७५॥

कैसे कि—

व्यासप्रसादात्	= श्रीव्यासजीकी कृपासे (दिव्य दृष्टि पाकर)	**गुह्यम्**	= गोपनीय
		योगम्	= योगको (अर्जुनके प्रति)
अहम्	= मैंने		
एतत्	= इस	**कथयतः**	= कहते हुए
परम्	= परम	**स्वयम्**	= स्वयं

योगेश्वरात् = योगेश्वर
कृष्णात् = भगवान् श्रीकृष्णसे
साक्षात् = प्रत्यक्ष
श्रुतवान् = सुना है।

[श्रीकृष्ण और अर्जुनके संवादसे संजयका हर्षित होना।]

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः॥ ७६॥

राजन्, संस्मृत्य, संस्मृत्य, संवादम्, इमम्, अद्भुतम्, केशवार्जुनयोः, पुण्यम्, हृष्यामि, च, मुहुर्मुहुः॥ ७६॥

इसलिये—

राजन् = हे राजन्!
केशवार्जुनयोः = भगवान् श्रीकृष्ण और अर्जुनके
इमम् = इस (रहस्ययुक्त)
पुण्यम् = कल्याणकारक
च = और
अद्भुतम् = अद्भुत
संवादम् = संवादको
संस्मृत्य, संस्मृत्य = पुनः-पुनः स्मरण करके (मैं)
मुहुर्मुहुः = बार-बार
हृष्यामि = हर्षित हो रहा हूँ।

[भगवान्‌के विश्वरूपका स्मरण कर संजयका हर्षित होना।]

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः।
विस्मयो मे महान् राजन्हृष्यामि च पुनः पुनः॥ ७७॥

तत्, च, संस्मृत्य, संस्मृत्य, रूपम्, अति, अद्भुतम्, हरेः, विस्मयः, मे, महान्, राजन्, हृष्यामि, च, पुनः, पुनः॥ ७७॥

तथा—

राजन् = हे राजन्!
हरेः = श्रीहरिके*
तत् = उस
अति = अत्यन्त
अद्भुतम् = विलक्षण
रूपम् = रूपको
च = भी
संस्मृत्य, संस्मृत्य = पुनः-पुनः स्मरण करके
मे = मेरे (चित्तमें)

* जिसका स्मरण करनेसे पापोंका नाश होता है उसका नाम "हरि" है।

महान्	=	महान्	**(अहम्)**	=	मैं
विस्मयः	=	आश्चर्य (होता है)	**पुनः, पुनः**	=	बार-बार
च	=	और	**हृष्यामि**	=	हर्षित हो रहा हूँ।

[श्रीकृष्ण और अर्जुनके प्रभावका कथन।]

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ ७८॥

यत्र, योगेश्वरः, कृष्णः, यत्र, पार्थः, धनुर्धरः,
तत्र, श्रीः, विजयः, भूतिः, ध्रुवा, नीतिः, मतिः, मम॥ ७८॥

हे राजन्! विशेष क्या कहूँ!—

यत्र	=	जहाँ	**श्रीः**	=	श्री,
योगेश्वरः	=	योगेश्वर	**विजयः**	=	विजय,
कृष्णः	=	भगवान् श्रीकृष्ण हैं (और)	**भूतिः**	=	विभूति (और)
			ध्रुवा	=	अचल
यत्र	=	जहाँ	**नीतिः**	=	नीति है—
धनुर्धरः	=	गाण्डीव-धनुषधारी	**(इति)**	=	ऐसा
पार्थः	=	अर्जुन हैं,	**मम**	=	मेरा
तत्र	=	वहींपर	**मतिः**	=	मत है।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे मोक्षसन्न्यासयोगो
नामाष्टादशोऽध्यायः॥ १८॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

❖❖❖